# आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलिग्रन्थयोः* तुलनात्मकसमीक्षा

यादवपुरविश्वविद्यालयस्य संस्कृतविभागे विद्यावारिधिः(पि-एइच्. डि.) इत्युपाधिप्राप्तये
प्रस्तुतोऽयं शोधप्रबन्धः


**गवेषिका**

देवश्री-खाँडा

**शोधनिर्देशकः**

प्राध्यापकः तपनशङ्कर-भट्टाचार्य्यः

संस्कृतविभागः
यावदपुरविश्वविद्यालयस्य
कलकातायाम्



२०२२

# Ātmaviṣaye *Ātmatattvaviveka-Nyāyakusumāñjali*granthayoḥ Tulanātmakasamīkṣā

**Thesis Submitted to Jadavpur University for the Degree of Doctor of Philosophy**

**Submitted by**

Debasri Khanra

**Supervisor**

Prof. Tapan Sankar Bhattacharyya

*Department of Sanskrit*
*Jadavpur University*
*Kolkata*
*2022*

## Certified that the thesis entitled

**आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलिग्रन्थयोः* तुलनात्मकसमीक्षा**

submitted by me for the award of the Degree of **Doctor of Philosophy** in Arts at Jadavpur University. The thesis is based upon my own work and is carried out under the supervision of **Prof. Dr. Tapan Sankar Bhattacharyya** and that neither thesis nor any part of it has been submitted before for any degree or diploma anywhere /elsewhere.

Countersigned by

The Supervisor:

Dated:

Candidate:

Dated:

# कार्तज्ञनिवेदनम्

**‘तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति’**

यादवपुरविश्वविद्यालये संस्कृतविभागे विद्यावारिधिः(पि-एइच्. डि.) इत्युपाधये समर्प्यमाणस्य **आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलिग्रन्थयोः* तुलनात्मकसमीक्षा** इति शीर्षकान्वितशोधप्रबन्धस्य समाप्तिरूपाभीष्टसिद्धये जगद्गुरुं परमेश्वरं वन्दे। परमपुरुषार्थमोक्षस्य साक्षात्कारणरूपात्मज्ञानलाभार्थमात्मविषय-कमालोचनमवलम्ब्योदयनाचार्यविरचितग्रन्थद्वयस्यात्मविषयकतुलनात्मकसमीक्षाप्रदर्श-नाय परमेश्वरकृपया यथामति शोधप्रबन्धनिर्माणे प्रयते।

शोधप्रबन्धस्यास्य निर्माणाय येषां परमकारुणिकानामकृपणसाहाय्येन पूर्णाऽहम्, तेभ्यो कृतज्ञताज्ञापनाय कानिचन वाक्यान्येव नोपयुक्तानि। तथापि तेभ्यो परमकारुणिकेभ्यः कृतज्ञताज्ञापनायास्य मुखबन्धस्यावतरणम्। प्रपञ्चेऽस्मिन् येषामनिर्वचनीयकृपावशाद् यादवपुरविश्वविद्यालये विद्यावारिधौ लब्धावसराऽहं तेषां पदवाक्यप्रमाणनिपुणानां सारस्वतानां वैयाकरणशिरोमणीनां लब्धयशसामध्यापक-तपनशङ्कर-भट्टाचार्य्यमहाभागानां चरणकमलं शिरसा प्रणमामि। बहुव्यस्तशीलत्वेऽपि तेषां सुदृढपरामर्शेन बौद्धिकप्रेरणया च कार्यस्यास्य ऋजुता प्राप्ता। यद्विना शोधप्रबन्धस्य सुष्ठुसमाप्तिर्न सम्भवति।

येषां निर्देशनेन शोधप्रबन्धोऽयं पूर्णतामागच्छति तेभ्योऽध्यापकचिन्मय-मण्डलमहोदयेभ्यः तथाऽध्यापिकामधुमिता-चट्टोपाध्यायमहोदयाभ्यो हार्दं कार्तज्ञं निवेदयामि। तथा च सर्वदैवछात्रहितरतेभ्योऽध्यापकमृणालकान्ति-वन्द्योपाध्याय-महोदयेभ्योऽध्यापकविष्णुपद-महापात्रमहोदयेभ्यश्च हार्दं हार्दं कार्तज्ञं प्रणामञ्च

विनिवेदयामि। एवञ्च संस्कृतविभागस्य विभागीयप्रधानाध्यक्षाभ्यः काकली-घोषमहोदयाभ्योऽशोककुमार-माहातमहोदयप्रभृतिभ्योऽध्यापिकाभ्योऽध्यापकेभ्यश्च स्वीयां प्रणतिमाविष्कृत्य हार्दं कार्तज्ञं विज्ञापयामि। एवञ्च विविधशास्त्रनिष्णातृभ्योऽध्यापिका-शर्वाणी-गाङ्गुलीमहोदयाभ्योऽध्यापकमृणालकान्ति-गङ्गोपा-ध्यायमहोदयेभ्यश्च सश्रद्धं प्रणामं निवेदयामि। तथा च शोधकर्मण्युत्साहप्रदर्शनपूर्वकं समुपस्थितानां संशयानामपि निरसनकृतेभ्यः पथप्रदर्शकेभ्यो हाराधन-खाँडामहोदयेभ्यः, मच्छुभचिन्तकेभ्योऽग्रजकल्पेभ्योऽध्यापकदिवाकर-मान्नामहोदयेभ्योऽरूपरतन-खाँडाप्रभृतिमहोदयेभ्यश्च सश्रद्धं प्रणामं कार्तज्ञञ्च विज्ञापयामि।

अपि च शोधकर्मणि साहाय्यकृतवद्भ्योऽध्यापकभूतनाथ-जानामहोदयेभ्योऽरिन्दम-मण्डलप्रभृत्यग्रजेभ्यः शुभङ्कर-सामन्तः, रूपाली-मुर्मुः, नीलाद्रि-घडा, हरिपद-सों, गणेश-टुडुः, प्रसेनजित्-वेराप्रभृतिमित्रेभ्योश्चापि हार्दिकान् धन्यवादान् व्याहरामि। तथा च स्वामी-निःसम्बलानन्दमहाविद्यालयस्य प्रधानाध्यक्षाभ्यः चन्दना-चट्टोपाध्याय-महोदयाभ्योऽध्यापकराजु-करप्रभृत्यध्यापिकाभ्योऽध्यापकेभ्यश्च कार्तज्ञं ज्ञापयामि। एवञ्च शोधकार्यनिर्माणे दृष्टेभ्योऽदृष्टेभ्यश्च सर्वेभ्यः सहायकेभ्यः पौनःपुन्येन हार्दं कार्तज्ञं विज्ञापयामि। पुनश्च येभ्यो ग्रन्थागारेभ्यः साहाय्यं प्राप्य शोधप्रबन्धोऽयं परिपूर्णो जातः तेभ्यो यादवपुरविश्वविद्यालयविभागीयग्रन्थागार-केन्द्रीयग्रन्थागार-गोलपार्करामकृष्ण-मिशनग्रन्थागार-संस्कृतसाहित्यपरिषद्ग्रन्थागारेभ्योऽपि च ग्रन्थपालकेभ्यो विनम्रं कार्तज्ञं समर्पयामि।

सर्वोपरि येषामनुग्रहं विना कार्यस्यास्य पूर्णता नागच्छति तेषां प्रत्यक्षदेव-स्वरूपपितरौ(माता– भारती-खाँडा, पिता– स्वर्गीयमहादेव-खाँडा) प्रणमामि मुहुर्मुहुः। अन्तिमे वाग्देवीं सरस्वतीं प्रणम्य विरमामि।

स्थानम्– यादवपुरविश्वविद्यालयः। देवश्री-खाँडा

# संकेतसूची

अ. सि.– अद्वैतसिद्धिः।
आ. अ.– आचारोऽध्यायः।
आत्म. वि.– आत्मतत्त्वविवेकः।
उप. नि.– उपनिषद्।
उप. सं.– उपनिषद् संग्रहः।
ऋ. वे.– ऋग्वेदः।
कि. वली.– किरणावली।
खण्ड. खाद्य.– खण्डनखण्डखाद्यम्।
च. खण्डः– चतुर्थः खण्डः।
त. चिन्ता.– तत्त्वचिन्तामणिः।
तर्क. सं.– तर्कसंग्रहः।
तृ. खण्डः– तृतीयः खण्डः।
न्या. कु.– न्यायकुसुमाञ्जलिः।
न्या. द.– न्यायदर्शनम्।
न्या. म.– न्यायमञ्जरी।
न्या. वार्त्ति.– न्यायवार्त्तिकम्।
न्या. वि.– न्यायविन्दुः।
पात. द.– पातञ्जलदर्शनम्।
पृ.– पृष्ठाङ्कः।
प्र. खण्डः– प्रथमः खण्डः।
प्र. वार्त्ति.– प्रमाणवार्त्तिकम्।
भा. दर्श.– भारतीयदर्शनम्।
भा. परि.– भाषापरिच्छेदः।
म. सं.– मनुसंहिता।
मा. मेय.– मानमेयोदयः।
याज्ञ. सं.– याज्ञवल्कसंहिता।
वा. सा. अव.– वाङ्गालीर-सारस्वत-अवदानम्।
वे. द.– वेदान्तदर्शनम्।
वे. सा.– वेदान्तसारः।
वै. सू.– वैशेषिकसूत्रम्।
रा. धर्मः– राजधर्मः।
लक्ष. व.– लक्षणावली।
शा. भा.– शाङ्करभाष्यम्।
शिक्षा. ओ शिक्षा.– शिक्षातत्त्वम् ओ शिक्षादर्शनम्।
श्री. गीता.– श्रीमद्भगवद्गीता।
श्लो. वार्त्ति.– श्लोकवार्त्तिकम्।
सर्व. सं.– सर्वदर्शनसंग्रहः।
सर्व. बौ. ओ दर्श.– सर्वदर्शनसंग्रहे बौद्धदर्शनम् ओ जैनदर्शनम्।
सं. सा. इति.– संस्कृत साहित्येर इतिहासः।
सां. कारि.– सांख्यकारिका।
सां. तत्त्व.– सांख्यतत्त्वकौमुदी

# सूचीपत्रम्


| **विषयः** | **पृष्ठाङ्काः** |
|---|---|
| **उपोद्घातः** | १-७ |
| **प्रथमोऽध्यायः** | ८-२९ |
| उदयनाचार्यस्य जीवनपरिचयः कृतित्वञ्च । | |
| **द्वितीयोऽध्यायः** | ३०-४६ |
| न्यायदर्शनानुसारेण आत्मस्वरूपविचारः। | |
| **तृतीयोऽध्यायः** | ४७-८४ |
| *आत्मतत्त्वविवेक*ग्रन्थस्य आत्मविषयकं पर्यालोचनम्। | |
| **चतुर्थोऽध्यायः** | ८५-१२४ |
| *न्यायकुसुमाञ्जलि*ग्रन्थस्य आत्मविषयकं पर्यालोचनम्। | |
| **पञ्चमोऽध्यायः** | १२५-२०७ |
| आत्मविषये ग्रन्थद्वयस्य तुलनात्मकमालोचनम्। | |
| **उपसंहारः** | २०८-२१२ |
| **ग्रन्थसूची** | २१२-२१९ |

# उपोद्घातः

'दृश्यते अनेन' इति व्युत्पत्त्या प्रेक्षणार्थकाद् दृश्धातोः करणे 'करणाधिकरणयोश्च' इति सूत्रेण ल्युट्प्रत्यये अनुबन्धलोपे 'युवोरनाकौ' इति सूत्रेणानादेशे 'दर्शनम्' इति शब्दो निष्पद्यते। दर्शनशब्दविवेचनेन ज्ञातुं शक्यते यत्, ज्ञायते वा लभ्यते वा प्राप्यते वा पदार्थतत्त्वमात्मतत्त्वं विवक्षितार्थं येन तद् दर्शनम्। 'नीयते प्राप्यते विवक्षार्थो येन' इति व्युत्पत्त्या 'न्यायः' इति शब्दो निपूर्वकाद् गत्यर्थकादिण्धातोः करणे घञ्प्रत्यये निष्पद्यते। न्यायश्चासौ दर्शनञ्चेति न्यायदर्शनम्। न्यायविषये प्रसिद्धमस्ति–

'प्रमाणैरर्थपरीक्षणं न्यायः'।[१]

अस्यार्थः प्रमाणेनार्थस्यार्थाद्विषयस्य परीक्षणमेव न्यायः। वस्तुतः प्रसिद्धेषु षड्विधेष्वास्तिकदर्शनेष्वन्यतमन्दर्शनमिदं न्यायदर्शनम्। आन्वीक्षिकीविद्येति नाम्नापि न्यायदर्शनस्य प्रसिद्धिर्वर्तते। मनुस्मृतावान्वीक्षिकी नाम्नास्याभिधानं यथा–

'त्रैविद्येभ्यस्त्रयी विद्याद् दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः'॥[२]

न्यायदर्शनमिदं स्वमाहात्म्येन सर्वशास्त्रस्य प्रदीपस्वरूपं वर्तते, वर्णितञ्च–

'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता'॥[३]

न्यायदर्शनस्येतिहासपर्यालोचनेन ज्ञायते, प्राचीनकालादेव न्यायदर्शनस्यास्य प्रसिद्धिरासीदिति नास्ति कश्चन संशयः। दर्शनस्यास्य नामोल्लेखं स्मृत्यादिषु बहुधा दृश्यते श्रूयते च। यथा *मुण्डकोपनिषदि* प्रोच्यते–

'द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति– परा चैवापरा च। तत्रापरा– ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। इतिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीत्यपरा' इति।[४]

याज्ञवल्क्येनापि प्रोक्तम्–

'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश'॥[५]

एतेन श्रुतिस्मृत्यादिवचनेन ज्ञातुं शक्यते न्यायशास्त्रस्य प्राचीनत्वम्। कालानुसारेण तथा विषयानुसारेण प्राचीननव्यभेदेन दर्शनमिदं द्विविधं वर्तते। सुप्राचीनन्यायशास्त्रस्य प्रवर्तको महर्षिर्गौतमोऽस्ति। *पद्मपुराण*स्योत्तरखण्डे च दृश्यते–

'कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत्।
गौतमेन तथा न्यायः सांख्यं तु कपिलेन वै'॥[६]

गौतमस्य समयविषये पण्डितेषु मतवैविध्यं वर्तत एव। किन्तु पुराणादिषु नामोल्लेखत्वादस्य प्राचीनत्वं सुप्रसिद्धमेव। गौतमकृतन्यायसूत्रमवलम्ब्य चत्वारः प्रमुखनिबन्धा विरचिताः। ते च न्यायसूत्रभाष्यम्, न्यायसूत्रवार्त्तिकम्,

तात्पर्यटीका, तात्पर्यपरिशुद्धिरिति। एते चत्वारश्चतुर्ग्रन्थी नाम्नापि प्रसिद्धाः। तत्र न्यायसूत्रम्, न्यायवार्त्तिकतात्पर्यटीकाञ्चेत्यवलम्ब्य तात्पर्यपरिशुद्धिग्रन्थं विरचयामासाचार्योदयनः। वस्तुतो वैशेषिकदर्शनस्थसप्तपदार्थवादं न्यायदर्शनस्थप्रमाणचतुष्टयञ्चेत्यवलम्ब्य विद्वत्समाजे तर्कशास्त्रं प्रचारयामास उदयनाचार्यः। उदयनाचार्य एव नव्यन्यायस्योद्बोधक आसीत्। यद्यपि गङ्गेशोपाध्यायाद् नव्यन्यायस्य प्रचारो दरीदृश्यते तथापि गङ्गेशोपाध्यायेनैव बहुत्र स्थलेषूदयनाचार्यस्य सिद्धान्ताः स्वीकृताः।[७] एतेन नव्यन्यायस्योद्बोधक-रूपेणोदयनाचार्यं स्वीकर्तुं शक्यते। उदयनाचार्यस्य जन्मस्थानविषये पण्डितेषु मतवैविध्यं भूरिशो दरीदृश्यते। अनुमीयते यत्, दशमशताब्द्यामुदयनाचार्य आविर्बभूव। उदयनाचार्यस्य विषये प्रथमाध्याये विशेषरूपेण विधास्यते इति हेतोर्नाधिकमत्र प्रतिपाद्यते। उदयनाचार्यविरचितेषु ग्रन्थराजिष्वन्यतमावात्म-तत्त्वविषयप्रतिपादकौ ग्रन्थौ वर्तेते *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*श्चेति।

*आत्मतत्त्वविवेक* इत्यस्मिन् ग्रन्थे परिच्छेदचतुष्टये पर्यायेण बौद्धसम्मतक्षणभङ्गवादस्य, बाह्यार्थभङ्गवादस्य, गुणगुणिभेदभङ्गवादस्य, अनुपलब्ध्यभावसाधकवादस्य च खण्डनेनात्मस्थापनं वर्तते। ग्रन्थेऽस्मिन् पूर्वपक्षिरूपेण बौद्धान् स्वीकृत्य तेषां विविधमतानां खण्डनपुरःसरं न्यायसम्मतस्य शरीराद्यतिरिक्तनित्यविभुज्ञानवत्सुखादेराश्रयरूपेण जीवात्मनः प्रतिपादनं कृतम्।

आत्मविषयकचर्चापरकग्रन्थसमूहेषु सुप्रसिद्धो ग्रन्थो *न्यायकुसुमाञ्जलिः*। निरीश्वरवादिनां खण्डनपूर्वकं प्रमाणेन तर्केण वेश्वरसाधनमेव *न्यायकुसुमाञ्जलि*ग्रन्थस्य मूलोद्देश्यम्। परन्तु केषाञ्चन मतं वर्तते बौद्धसम्प्रदायाचार्यकल्याणरक्षितप्रणीतस्येश्वरभङ्गकारिकाग्रन्थस्य खण्डनार्थमस्य ग्रन्थस्य रचना। परन्त्विदं समीचीनं नास्ति। यतो हि कुत्रापि *न्यायकुसुमाञ्जलि*ग्रन्थे कल्याणरक्षितस्य नाम न प्राप्यते। तस्य ग्रन्थस्योद्धरणमपि न दृश्यते। अतो बहुभिर्मतमिदं नाङ्गीक्रियते। *न्यायकुसुमाञ्जलि*ग्रन्थस्य नामकरणेनै वाचार्येणोदयनेन ज्ञाप्यते यत्, न्यायरूपकुसुमस्याञ्जलिरेव *न्यायकुसुमाञ्जलि*रिति। *न्यायकुसुमाञ्जलि*ग्रन्थे ईश्वरविषये पञ्चप्रकारविप्रतिपत्तिप्रदर्शनम्, निरीश्वरवादिचार्वाकमतखण्डनमित्यादयः सिद्धान्ता दरीदृश्यन्ते। न केवलमेतदपि तु तत्रादृष्टाधिष्ठातृरूपेणेश्वरसाधनं वेदस्य प्रणेतृरूपेणेश्वर-साधनञ्चेत्यादयः सुस्पष्टतया परिलक्ष्यन्ते।

*आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*श्चेति ग्रन्थद्वये गुरुगम्भीरतया वर्णितमात्मविषयकमालोचनमवलम्ब्य 'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोः तुलनात्मकसमीक्षा' इति शीर्षकान्वितसन्दर्भरचनायां प्रवर्ते। शोधप्रबन्धपरिपूरणार्थं प्रथमाध्याये उदयनाचार्यस्य जीवनपरिचयः कृतित्वञ्च प्रतिपाद्येते। आत्मस्वरूपज्ञानं विनाऽऽत्मविषयकालोचना यथार्था न भवति, अतो द्वितीयाध्याये न्यायसम्मतात्मस्वरूपविचारः प्रदर्श्यते। तृतीयाध्याये

चतुर्थाध्याये च यथाक्रमेण *आत्मतत्त्वविवेक*ग्रन्थे आत्मविषयकं पर्यालोचनम्, *न्यायकुसुमाञ्जलि*ग्रन्थे आत्मविषयकं पर्यालोचनञ्च क्रियते। अन्तिमे आत्मविषये ग्रन्थद्वयस्य तुलनात्मकालोचनेनाऽभीष्टपूरणं क्रियते।

*आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*रित्युभयोर्ग्रन्थयोर्मूलोद्देश्यमात्मविषयकबाधकमतखण्डनेन साधकप्रमाणेनात्मप्रतिष्ठा। उभावपि ग्रन्थौ स्वतन्त्रग्रन्थविशेषौ वर्तेते। पृथग्रूपेण विद्यमानत्वाद्ग्रन्थयोर्मध्येऽवश्यमेव सादृश्यमिव वैसादृश्यमपि दरीदृश्यतेऽस्मिन्विषये सन्देहावकाशो नास्ति– इति विषयं शिरसि निधाय 'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयो: तुलनात्मकसमीक्षा' इत्यमुं विषयमधिकृत्य शोधकार्ये प्रयते। पुरुषार्थेष्वन्यतमपरमपुरुषार्थस्य मोक्षस्याऽऽत्मसाक्षात्कारः प्रधानोपायः। तत्रात्मन्निति शब्देन यथा जीवात्मनः सूचनं भवति तथैव परमात्मनोऽपि सूचनं भवति।[८] एवंरूपेण ग्रन्थयोर्मध्ये जीवात्मपरमात्मनोर्विशेषरूपेणालोचना विद्यते। अतो मोक्षप्राप्त्यर्थं ग्रन्थद्वयमत्यन्तमुपयोगी। *आत्मतत्त्वविवेके* प्राधान्येन जीवात्मविषयकमालोचनं वर्तते। तत्र चात्मविषये बाधकखण्डनेनैव न्यायसम्मतात्मनः स्वतःसिद्धत्वं दरीदृश्यते। परन्तु *न्यायकुसुमाञ्जलौ* प्राधान्येन परमात्मविषयेऽर्थादीश्वरविषये आलोचनं विद्यते। अन्यत्राप्यीश्वरविषयकालोचना तिष्ठति चेदप्यत्रेश्वरस्य मननात्मकोपासनं ग्रन्थस्य मुख्यविषयः।

अत उभयोर्ग्रन्थयोरात्मबाधकप्रमाणखण्डनस्यात्मसाधकप्रमाणस्य चाधिक्येन दृश्यमानत्वादस्मिन् शोधकार्येऽप्यात्मबाधकानामात्मसाधकानाञ्च विषये आधिक्येनालोचनं विहितम्। वस्तुतोऽत्र 'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोः तुलनात्मकसमीक्षा' इति शीर्षकस्थितस्य 'आत्मविषये' इत्यस्याशयो न केवलमात्मस्वरूपप्रतिपादनम्, अत्रात्मप्रसङ्गे आगतानां बाधकानां तथा साधकानामपि विषयोऽपि समागच्छति। एवञ्च ग्रन्थद्वयस्यात्मविषयकतुलनात्मकसमीक्षणेनात्मविषयकानुभवो सुदृढतया परिस्फुट्यते, येन मोक्षप्राप्तेरुपायो वर्धते। एतत् सर्वं शोधनिबन्धस्य मुख्योद्देश्यरूपेण प्रतिभातम्। अपि चात्मविषयकगूढतत्त्वेन सुसमृद्धस्य *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वयस्य भाषाविषययोरत्यन्तं काठिन्यादध्येतॄणां बोधोऽतीव दुष्करो भवति। अतो गवेषणकार्यमाध्यमेन ग्रन्थद्वयस्याऽऽत्मविषयकतुलनात्मकसमीक्षणेनाध्येतॄणां समीपे सरलरूपेण ग्रन्थविषयस्योपस्थापनमपि मम लक्ष्यमिति।

निबन्धोत्कर्षताविषये मौनतावश्यमेव ग्रहणीया। अन्तिमे जयन्तभट्टस्य वचनमुद्धृत्योपोद्घातोऽयं परिसमाप्यते।

'असंखैरपि नात्मीयेरल्पैरपि परस्थितैः।
गुणैः सन्तः प्रहृष्यन्ति चित्रमेषां विचेष्टितम्'॥[१]

**तथ्यसूत्राणि–**

१. *न्या.* द. (प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– २९।

२. *म. सं.*(रा. धर्मः), ७/४३, पृ.– १०३।

३. *न्या.* द. (प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– ६०।

४. मुण्डकोपनिषद्, *उप. सं.*, सम्पा. चित्तरञ्जनघोषालः, पृ.– १६७।

५. *याज्ञ.* सं.(आ. अ.), १/३, पृ.– १।

६. *आ. वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– १।

७.'परमाण्वदृष्टाद्यधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः'।– *त. चिन्ता.*, सम्पा. कामाखानाथतर्कवागीशः, पृ.– ८२।

८.'आत्मा वा अरे इत्यादिश्रुतिघटकात्मपदं ज्ञानवत्त्वरूपेण जीवात्मपरमात्मोभयपरम्'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– १७।

९. *न्या. म.*, सम्पा. पञ्चाननतर्कवागीशः, पृ.– २।

# प्रथमोऽध्यायः

## उदयनाचार्यस्य जीवनपरिचयः कृतित्वञ्च

भारतीयदर्शनेतिहासपर्यालोचनेन ज्ञायतेऽस्माकं भारतीयदर्शनमत्यन्तं सुप्राचीनं गौरवमयञ्च। दर्शनस्यास्य विकाशो वस्तुतो विविधप्रमुखदार्शनिकानां गम्भीरयुक्तिमाधुर्येणैव। सुप्राचीनकालाद् विविधप्रमुखदार्शनिकानाम् आविर्भावेनास्माकन्दर्शनसाहित्यम्प्रंरम्यते। विविधप्रतिभामण्डितदार्शनिकानां दर्शनेनास्माकन्दर्शनसाहित्यमतीव सुसज्जितं वर्तते। भारतीयदर्शनस्य क्रमविकाशपर्यालोचनेन ज्ञायतेऽस्मिन् दर्शने क्रमपरम्परा काचन वर्तते। वस्तुतस्तु दर्शनतत्त्वज्ञानमात्रेणैव भारतीयदार्शनिका न स्तब्दीभूता भवन्ति, अपि तु तस्य तत्त्वस्य प्रतिपादनाय सर्वथा सचेष्टपराः। पाश्चात्त्यदर्शनेऽपि विविधसमये विविधमतमुत्थाप्य तस्य मतस्य पोषणं वर्तते। पुनश्च कालानुसारेण पूर्वोक्तमतस्य खण्डनं विधाय नूतनमतस्य पोषणं क्रियते। किन्तु पाश्चात्त्यदार्शनिका ज्ञानतृष्णाचारितार्थ्येनैव तुष्णीभूता भवन्ति, जनजीवने प्रतिस्थापनाय तेषामौत्सुक्यं नास्त्येव। अयमेव पाश्चात्त्यभारतीयदर्शनयोर्भेदः। भारतीयदर्शनेषु सांख्यादिभेदेन दर्शनवैविध्येऽपि तत्र महत्साम्यं सर्वथा परिलक्ष्यते, दार्शनिकास्तत्र परिवारसदस्यस्वरूपाः। व्याख्यानपद्धतिपर्यालोचानायां ज्ञायते यत्, पारस्परिकसम्मानप्रदर्शनं तेषामाङ्गिकविषयः। परसम्प्रदायमतखण्डन-निमित्ताद्दार्शनिकाः परसम्प्रदायतत्त्वं विदधते। यतो हि सुष्ठुज्ञानं विहाय

परमतखण्डनपुरःसरं स्वमतप्रतिस्थापनं नैव सम्भवति। विविधसमये आविर्भूता दार्शनिकाः स्वतन्त्रग्रन्थभाष्यव्याख्यानादिमाध्यमेन स्वाधिपत्यं तन्वते। तत्र केवलं न वादिरूपेणापि तु प्रतिवादिरूपेणापि स्वाधिपत्यं प्रतिस्थापयन्ति। अत्रैव भारतीयदार्शनिकानां दर्शनतत्त्वचिन्ताया महान् परिचयो लभ्यते। भारतीयदर्शनप्रकृतिः परिलक्ष्यते चेज्ज्ञायते भारतीयदर्शनस्य मार्गद्वयं वर्तते। आस्तिकदर्शनं नास्तिकदर्शनञ्च। वेदं प्रामाण्यत्वेन ये स्वीकुर्वन्ति ते आस्तिकदार्शनिकाः। यथा– सांख्यम्, योगः, न्यायः, वैशेषिकः, मीमांसा, वेदान्तश्चेति। ये तावद् वेदं प्रमाणत्वेन नाङ्गीकुर्वन्ति ते नास्तिकाः। यथा– चार्वाकः, बौद्धः, जैनश्चेति। एतेषु दर्शनेष्वन्यतमसुप्रसिद्धं दर्शनं न्यायदर्शनमिति।

नैयायिकानां स्वमहिममाधुर्येण न्यायदर्शनमिदं सुसमृद्धं गौरवान्वितञ्च। दार्शनिका यथा प्रतिद्वन्द्विरूपेण समालोचिता भवन्ति तथैव स्वदर्शनप्रतिभया श्रद्धेया अपि भवन्ति। एतेषु दार्शनिकेष्वन्यतमप्रमुखदार्शनिक उदयनाचार्यः। यथा नक्षत्रेषु सूर्यस्स्वमहिम्ना स्वगौरवं विधत्ते तथैव नैयायिकेषु वैशेषिकेषु च दार्शनिकेषूदयनाचार्यस्स्वगौरवं विधत्ते। अर्थादुदयनाचार्यो यथा नैयायिकस्तथैव वैशेषिकोऽप्यासीत्। उदयनाचार्यस्य मौलिकयुक्तिमाधुर्यं विविधसमये प्रमुखदार्शनिकानां मार्गदर्शनमकरोत्। उदयनाचार्यस्याविर्भावकालादिविषये दार्शनिकेषु मतानैक्यं वर्तते। न केवलमुदयनाचार्योऽपितु संस्कृतसाहित्येतिहासस्य गम्भीरपर्यालोचनं क्रियते चेद्दृश्यते बहूनां दार्शनिकानाम्, नाट्यकाराणाम्,

कवीनाञ्च व्यक्तिगतजीवनविषये तथाविर्भावकालादिविषये दार्शनिकेषु मतवैविध्यं वर्तते। यथा कालिदासस्य ग्रन्थसमूहविषये ज्ञायते चेदपि तस्य व्यक्तिगतजीवनविषये तथा तस्याविर्भावकालविषयेऽद्यापि दार्शनिकेषु मतानैक्यं वर्तते एव। अत एव कालिदासस्य विषये विश्वकविरवीन्द्रनाथेनोच्यते–

'हायरे कवे केटे गेछे कालिदासेर काल
पण्डितेरा विवाद करे लये तारिख साल'॥[१]

अर्थात् हा! कालिदासस्य समयो बहुदिनेभ्यः प्रागेव गतस्तथापि पण्डितास्तस्य कालादिविषयेऽद्यापि विवादे रतास्सन्तीत्याशयः।

उदयनाचार्यस्य विषयेऽप्यस्य व्यतिक्रमो नाभवत्। केवलं व्यक्तिगतविषये एव नास्ति तस्याविर्भावकालविषयेऽपि यथोपयुक्तन्तथ्यं नोपलभ्यते इति हेतोः पण्डितेषु मतानैक्यं वर्तते। वस्तुतस्तूदयनाचार्य उद्योतकरश्चोभावप्य-भिन्नपुरुषाविति दार्शनिकेषु प्रसिद्धिरस्ति चेदप्येतद्यथार्थं नास्ति। उभौ नैयायिकावास्तामपि न्यायवार्त्तिककार आसीदुद्योतकरः। अत एवोदयनाचार्यस्तथोद्योतकर उभावपि भिन्नौ वर्तेते। उदयनाचार्यस्य जन्मस्थानविषये पण्डितेषु मतपार्थक्यं वर्तते। तथा प्रसिद्धिरस्ति तस्य मिथिलानिवासित्वम्। *भविष्यपुराणस्य* परिशिष्टांशे परिलक्ष्यते–

'अथ वक्ष्ये तृतीयस्य हरेरंशस्य धीमतः।
उदयनाचार्यनाम्नस्तु माहात्म्यं लोमहर्षणम्॥

भूत्वा स मिथिलायान्तु शास्त्राण्यधैष्ट सर्वशः।
विशेषतो न्यायशास्त्रे साक्षाद्वै गौतमो मुनिः'॥[२]

उदयनाचार्यस्य मिथिलास्थदारभाङ्गाया उत्तरस्थितकमलानदीतीरस्थमनरोणिनामके ग्रामे जन्माभूत्। किञ्चोदयनाचार्यस्स्वयं तस्य *प्रबोधसिद्धौ* तथा *बोधसिद्धौ* मङ्गलश्लोकेऽवोचत्–

'मातः सरस्वति पुनः पुनरेष नत्वा
बद्धाञ्जलिः किमपि विज्ञापयाम्यवेहि।
वाक्चेतसोर्मम तथा भव सावधाना
वाचस्पतेर्वचसि न स्खलतो यथैते'॥[३]

एतेन ज्ञायते उदयनाचार्यश्शैव आसीत्। केचन बौद्धपण्डिता मन्यन्ते स वरेन्द्रब्राह्मण आसीत्।

आस्तिकशिरोमण्युदयनाचार्य ईश्वरस्य परमभक्त आसीत्। *भविष्यपुराणस्य* परिशिष्टांशे तस्य भक्तिपरिचयो विद्यते। अत्रोदयनाचार्यबौद्धधर्मावलम्बिनोस्तर्कयुद्धवर्णनं लभ्यते। एकदोदयनाचार्य ईश्वरसत्ताविषये बौद्धपण्डितैस्साकं तर्कयुद्धे लिप्तोऽभवत्। दीर्घसमयेऽतिवाहिते सत्यपि सिद्धान्तो नायातः। अतस्समाधानरूपेण सिद्धान्तितन्तालवृक्षाद् नीचैरुभावपि पतितव्यौ। यो जीवेत् स एव विजेतृरूपेणोद्घोष्यते। उदयनाचार्य ईश्वरस्मरणपूर्वकन्तालवृक्षादपतत्। परन्तु नास्तिकबौद्धपण्डित ईश्वरस्मरणं विनैव पतनमात्रं

मृत्युमलभत। तेनोदयनाचार्यस्य जयोद्घोषणं जातम्। परन्तु बौद्धपण्डितस्य मृत्युकारणं स एवेति हेतोः स्वं दोषीं मत्वा समाधानकल्पेऽर्थात् प्रायश्चित्तकरणाय पुरीं जगाम। किन्तु दिनत्रयं यावदपेक्षायामपि जगन्नाथद्वारं नैवोद्घाटितम्। तदा ईषद्धसनमुखः सन्नुवाच–

'ऐश्वर्यमदमत्तोऽसि मामवज्ञाय वर्तसे।
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः'॥[४]

इत्युक्ते सति जगन्नाथमन्दिरद्वारोद्घाटनमभवत्। द्वारोद्घाटिते सति जगन्नाथदर्शनपूर्वकं मिथिलां प्रत्यागच्छत्। इत्थं प्रसिद्धेऽपि पण्डितेषु प्रमाणाभावाद्वैमत्यं वर्तते। न केवलं जन्मस्थानविषये एवापितूदयना-चार्यस्याविर्भावकालविषये यथेष्टं मतविविधता वर्तते एव। उदयनाचार्यो बहून् ग्रन्थान् विरचयामास। तेषु ग्रन्थराजिषु *लक्षणावली*ग्रन्थे उवाचोदयनाचार्यः–

'तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्'॥[५]

उक्तश्लोके 'तर्काम्बराङ्कः' इति पदेन ज्ञायते ९०६शकाब्दोऽर्थात् ९८४ख्रीष्टाब्दः *लक्षणावली* इति ग्रन्थस्य रचनाकालः। तेनानुमीयते दशमशताब्द्यामुदयनाचार्य आविर्बभूव। अन्यत्प्रामाणिकदृष्टान्तमपि परिलक्ष्यते यथा–

'युग्माश्वाङ्कैर्निरुक्ते शकनृपतिसमे कान्यकुब्जेश्वरस्य,

आदेशं प्राप्य यत्नान्नलचरितमहाकाव्यटीकां व्यधत्त।
सूरिर्भूदेवसंज्ञो दिनमणितनयः कूर्मपूर्वागजन्मा,
तुष्यात् तेनान्तरात्मा त्रिभुवनजनकोमापतिश्रीमहेशः'॥[६]

श्रीहर्षविरचित*नैषधीयचरित*ग्रन्थस्य टीका ९७२शकाब्दे विरचिता। एतेन ज्ञाप्यते श्रीहर्षोऽवश्यं ९७२शकाब्दात् पूर्ववर्त्यासीत्। पुनश्च श्रीहर्षः *खण्डनखण्डखाद्य*ग्रन्थे *न्यायकुसुमाञ्जलि*स्थितामेकां कारिकामखण्डयत्। तत्र *खण्डनखण्डखाद्य*-स्थितकारिका यथा–

'शङ्का चेदनुमास्त्येव न चेच्छङ्का कुतस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधि कुतः'॥[७]

*कुसुमाञ्जलि*स्थितकारिका यथा–

'शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः'॥[८]

एतेन ज्ञायते उदयनाचार्योऽवश्यं श्रीहर्षस्य पूर्ववर्त्यासीत्। किञ्च बहुभिर्दार्शनिकैरुच्यते *प्रशस्तपादभाष्य*ग्रन्थस्योपर्युदयनाचार्यः श्रीधराचार्य-श्चोभावपि टीकां विरचयामासतुः। उदयनाचार्यः स्वग्रन्थे श्रीधराचार्यस्य वचनमुद्धृतवान्। एतेन ज्ञायते श्रीधराचार्यस्य काल उदयनाचार्यस्य पूर्वमासीत्। भारतीयदर्शनस्य प्रख्यातटीकाकारो वाचस्पतिमिश्रः तस्य ग्रन्थाज्ज्ञायते तस्य समयकालो दशमशतकः। श्रीधराचार्यो वाचस्पतिमिश्रश्चोभावपि समकालिकौ

वर्तेते। किञ्चोदयनाचार्यो वाचस्पतिमिश्रस्य सुपरिचितोऽप्यासीत्। यतो हि वाचस्पतिमिश्रकृतस्य *भामती*ग्रन्थस्य *न्यायवार्त्तिकतात्पर्यटीका* इति व्याख्यान-मुदयनाचार्यश्चकार। अत उदयनाचार्यो न दशमशतकस्य, अपि तु पूर्ववर्ती।

बहवः पण्डिता भिन्नरीत्योदयनाचार्यस्याविर्भावकालं प्रतिपादितवन्तः। तेषां मतं यत्, उदयनाचार्यस्स्वग्रन्थे बौद्धपण्डितस्य 'ज्ञानश्री' इत्यस्य नामोल्लेखमकरोत् तस्य मतञ्च निराचकार। बौद्धपण्डितो दीपङ्करः श्रीज्ञानस्य जीवितावस्थायाम् 'तिवेत्' इति स्थानमटितुमगच्छत्। तस्य समयः प्रायः १०३८-४१ख्रीष्टाब्दः। किञ्चोदयनाचार्यः श्रीवत्सस्य शिष्य आसीत्। तस्य समयकालः १०००-५०ख्रीष्टाब्दः। एवं पर्यालोचनेन ज्ञायते उदयनाचार्यस्य समयकाल: १०५०ख्रीष्टाब्दस्य पूर्वम्। पर्यालोचनेन वक्तुमिदं न शक्यते यदुदयनाचार्यो दशमशताब्द्यामाविर्भूतोऽभूत्। उदयनाचार्यविरचिते *लक्षणावली* इत्यस्मिन् ग्रन्थे उल्लिखितम् 'तर्काम्बराङ्क:' इति पदं मूलत: 'तर्कस्वराङ्क:' इति कैश्चन पण्डितैरुद्घोषितम् । अत उदयनाचार्यस्य समयकाल: ९७६शकाब्द: अर्थात् १०५४ख्रीष्टाब्द इति। अतो नास्ति काचन समस्या।[१]

भारतीयदर्शनेतिहासं पर्यालोचनेन ज्ञायते भारतीयदार्शनिकाः साधारणतो ग्रन्थारम्भे शिक्षागुरोः श्रद्धाज्ञापनपूर्वकं नामोल्लेखं कुर्वन्ति। किन्तूदयनाचार्यस्य शिक्षागुरुविषये तादृशं न किमपि तथ्यं परिलक्ष्यते। किन्तु *न्यायभाष्ये* तथा *परिशुद्धौ* च ग्रन्थद्वये श्रीवत्सस्य गुरोर्नामोल्लेखो दृश्यते। उदयनाचार्यस्तु

श्रीवत्सग्रन्थाद् वचनांशमुद्धृतवान्। अन्यत्र ग्रन्थसमूहे श्रीवत्सस्य नामोल्लेखो नास्ति चेदपि श्रीवत्सं प्रत्युदयनाचार्य अतीव श्रद्धावान् आसीदिति विषये नास्ति संशयः।

**उदयनाचार्यस्य कृतित्वम्–**

अद्यत्वे दर्शनचर्चाया उत्कर्षतानुत्कर्षतायाः प्रकृष्टनिदर्शनं प्रदीपस्वरूपो दार्शनिकर्विरचितग्रन्थसमूह एव। रत्नस्वरूपग्रन्थमाध्यमेनैवोदयनाचार्यो दर्शनाकाशेऽमरत्वमप्राप्नोत्। अत उदयनाचार्यस्य माहात्म्यकीर्तनं तस्य ग्रन्थसमूहेनैव सम्भवति। तस्य विद्यावत्तापरिचयज्ञापनन्तु साध्यबहिर्भूतम्। तस्य सप्त ग्रन्था वर्तन्ते। तेषु सर्वेऽपि ग्रन्थाः सुविस्तृताः। सर्वेष्वपि ग्रन्थेषु निहितं वर्तते न्यायशास्त्रस्य बीजम्। नव्यन्यायस्य सूक्ष्मातिसूक्ष्मविचारस्याभिव्यक्तिस्तस्य रचनायां सर्वत्र परिलक्ष्यते। वैशेषिकशास्त्रेऽप्यसाधारणप्रातिभावान् आसीदुदयनाचार्यः। न केवलं ग्रन्थानेव विरचयामासाऽपितु टीकाग्रन्थानपि विरचितवान् उदयनाचार्यः। अतो ग्रन्थरचनानुसारेण तस्य द्विविधा रीतिः परिलक्ष्यते– स्वतन्त्रग्रन्थोऽपरश्च टीकाग्रन्थः।

**उदयनाचार्यविरचितस्वतन्त्रग्रन्थाः–**

**क.** उदयनाचार्यविरचितग्रन्थेषु संक्षिप्तग्रन्थो *लक्षणावली।* ग्रन्थोऽयं सूत्रग्रन्थवदतीव संक्षिप्तः। वस्तुतस्तु वैशेषिकदर्शनस्य सारभूतविषयान्

संक्षेपेणोपस्थापयत्ययं ग्रन्थः। पारिभाषिकशब्दः तस्य लक्षणञ्च ग्रन्थस्यास्योपजीव्यविषयः। ग्रन्थस्यास्य रचनाकालः स्वयमुदयनाचार्येण समुल्लेखितः। ग्रन्थोऽयं ९०६शकाब्दे अर्थात् ९८४ख्रीष्टाब्दे विरचितः। *न्यायमुक्तावली* इति व्याख्यया सह वाराणसीतो ग्रन्थोऽयं प्रकाशितः। बहुपूर्वाद् ग्रन्थोऽयं समुपलभ्यते।

**ख.** सूत्रकारविरचितो द्वितीयग्रन्थो *लक्षणमाला*। न्यायसंक्रान्तग्रन्थविशेषोऽयम्। *तार्किकरक्षा*ग्रन्थे वरदराजोऽस्माद् ग्रन्थादुद्धृतिं स्वीचकार। साम्प्रतं ग्रन्थोऽयं नैव समुपलभ्यते।

**ग.** उदयनाचार्यकृतान्यतमस्वतन्त्रग्रन्थविशेष *आत्मतत्त्वविवेकः*। ग्रन्थस्य नाम्नैव ज्ञायते ग्रन्थे आत्मविषयकालोचनं विद्यते। याथार्थ्येन ग्रन्थनिष्ठतत्त्वस्य प्रतिपादनाय परपक्षखण्डनपूर्वकं सपक्षस्थापनमवश्यम्भावी। साधकप्रमाण-वद्बाधकप्रमाणज्ञानमपि यथार्थरूपेणापेक्षते। यतो ह्यनभिप्रेतस्य खण्डनाय तद्विषये सम्यग् ज्ञानमपेक्षते, किञ्च बाधकप्रमाणस्याधिक्येऽप्यभीष्टं न सिद्ध्यति। अतो बाधकप्रमाणखण्डनपूर्वकं सिद्धान्तस्य प्रतिष्ठा भवति। मधुसूदनसरस्वती तस्य *अद्वैतसिद्धि*ग्रन्थेऽवोचत्– ‘उपपादनं च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवति’।[१०] *आत्मतत्त्वविवेक*ग्रन्थेऽपि तादृशी रीतिस्स्पष्टरूपेण परिलक्ष्यते। विषयस्य सम्यक् पर्यालोचनेन ज्ञायते, ग्रन्थेऽस्मिन् बौद्धमतस्य ग्रहणपूर्वकं

खण्डयित्वा न्यायसिद्धान्तान् प्रतिस्थापयत्युदयनाचार्यः। बौद्धानां प्राधान्याद् ग्रन्थोऽयं *बौद्धाधिकारो बौद्धधिक्कारो* वेति नाम्ना ख्यातः।–

> 'श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः।
> बौद्धाधिकारविवृतिं व्याकरोति शिरोमणेः'॥[११]

ग्रन्थोऽयमवश्यं प्रकरणलक्षणसमन्वितः–

> 'शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितिम्।
> आहुः प्रकरणं नाम ग्रन्थभेदो विपश्चितः'॥[१२]

ग्रन्थेऽस्मिन् सुदृढरूपेणात्मानं प्रतिस्थापितवान् उदयनाचार्यः, यद् मोक्षरूपपरमपुरुषार्थस्य प्राप्तिमार्गं दर्शयति। बौद्धदर्शने तथा न्यायदर्शने उभयत्रात्मसत्ता स्वीक्रियते चेदप्यात्मनः स्वरूपवर्णनविषये उभयदर्शने मतवैविध्यं वर्तत एव। उदयनाचार्यस्य समये बौद्धानां प्रभावः कथमासीत्तद्दृढतया बौद्धमतखण्डनेन सुस्पष्टं भवति। *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*-श्चोभयग्रन्थस्य पौर्वापर्यविचारेण परिलक्ष्यते *आत्मतत्त्वविवेक* इत्ययं ग्रन्थोऽवश्यं पूर्ववर्त्यासीत्। *न्यायकुसुमाञ्जलिरिति* ग्रन्थपङ्क्तिद्वारा स्पष्टरूपेण ज्ञायतेऽयं ग्रन्थोऽवश्यं परवर्त्यासीत्। *न्यायकुसुमाञ्जलौ* च दृश्यते– 'तदेव अन्यत्र विस्तरेण प्रतिसिद्धम्'।[१३] अत्र 'अन्यत्र' इति पदेन *आत्मतत्त्वविवेक*ग्रन्थस्य निर्देशः कृतः। *आत्मतत्त्वविवेक*ग्रन्थे परिच्छेदचतुष्टये यथाक्रमेण बौद्धसम्मतक्षणभङ्गवादस्य,

बाह्यार्थभङ्गवादस्य, गुणगुणिभेदभङ्गवादस्य, अनुपलब्ध्यभावसाधकवादस्य च खण्डनेनात्मस्थापनं वर्तते।

बौद्धानां क्षणिकत्ववादे क्षणिकविज्ञानप्रवाहो भवत्यात्मा। क्षणिकत्वादस्वीकारे न्यायसम्मतात्मनो नित्यत्वं व्याख्यायितुं नैव शक्यते इति हेतोः प्रथमपरिच्छेदे बौद्धानां क्षणभङ्गवादस्य खण्डनेनात्मस्थापनं कृतमुदयनाचार्येण।

बौद्धमते ज्ञानमेव वस्तु। ज्ञानातिरिक्तं ज्ञेयवस्तु नास्त्येव। बाह्यार्थभङ्गवादस्वीकारे न्यायसम्मतज्ञानवत आत्मनो व्याख्यानं न सम्भवतीति हेतोर्द्वितीयपरिच्छेदे बौद्धानां बाह्यार्थभङ्गवादस्य खण्डनञ्चकारोदयनाचार्यः।

बौद्धमते गुणगुणिनोः सम्बन्धोऽभेदसंसर्गविशिष्टः। घटादयः पदार्था रूपरसगन्धादीनां समष्टिमात्रम्। रूपादिगुणेभ्यो भिन्नं रूपादिमद्द्रव्यमन्यन्नास्त्येव। किन्तु बौद्धसम्मतगुणगुणिभेदभङ्गवादस्वीकारे नैयायिकानां सुखदुःखाद्याश्रयरूपात्मनो व्याख्यानं न सम्भवतीति कारणात्तृतीयपरिच्छेदे बौद्धानां गुणगुणिभेदभङ्गवादस्य खण्डनम-करोदुदयनाचार्यः।

बौद्धमते देहाद्यतिरिक्तस्थिरात्मन उपलब्धिर्न सम्भवतीति कारणादनुपलब्धिवशादात्मा न सिद्ध्यति। बौद्धमतेऽनुपलब्ध्यभावसाधकवादस्य स्वीकारे सति नैयायिकानां शरीराद्यतिरिक्तात्मनो व्याख्यानं नैव

सम्भवतीत्यस्मात् कारणाच्चतुर्थपरिच्छेदे बौद्धमतस्यानुपलब्ध्यभावसाधकवादं निराचकारोद-यनाचार्यः।

**घ.** उदयनाचार्यविरचितान्यतमस्वतन्त्रग्रन्थो *न्यायकुसुमाञ्जलिः*। *न्यायकुसुमा-ञ्जलि*ग्रन्थस्थितपञ्चस्तवकेषु क्रमेण निरीश्वरवादिनां युक्तिपूर्वकं खण्डनमकरोदुदयनाचार्यः। निरीश्वरवादिनां चार्वाकाणां मते एकमेव प्रमाणं प्रत्यक्षम्। अर्थात्तेषां मते प्रत्यक्षागोचरीभूतवस्तु नास्त्येव। अत ईश्वरस्य प्रत्यक्षगोचराभावात्तस्य सत्ता नास्ति। चार्वाकमतस्यास्य खण्डना-दनन्तरमदृष्टाधिष्ठातृरूपस्येश्वरस्य साधनं प्रथमस्तवकस्य मूलोपजीव्यविषयः। कर्मफलभोक्ता जीवोऽदृष्टस्येश्वरस्यैवाधीनस्थः। अतो जीवः पुण्यापुण्यकर्मानुसारेण फलभोगं करोति। किञ्च धर्मस्य तथाऽधर्मस्य जाड्यात्तस्याधिष्ठातृरूपेण कस्यापि चेतनस्य परिचालकस्य स्वीकारः कर्तव्य एव। अल्पज्ञाल्पशक्तिसम्पन्नजीवः कदापि तादृशश्चेतनः परिचालको भवितुं नार्हतीति हेतोरवश्यं चेतनरूपेण सर्वज्ञसर्वशक्तिसम्पन्नस्येश्वरस्य स्वीकारः कर्तव्य एव।

निरीश्वरवादिनां मीमांसकानां मतस्य खण्डनं द्वितीयस्तवके वर्तते। मीमांसका वेदद्रष्टृरूपेणेश्वरस्य सत्तां नाङ्गीकुर्वन्ति। वेदेनैव यागानां सम्भवादीश्वरकल्पनं निरर्थकम्। किन्त्वल्पज्ञाल्पबुद्धिसम्पन्नेन केनापि जगतः सृष्टिस्तथा प्रलयो न सम्भवतीति कारणात् सर्वज्ञसर्वशक्तिसम्पन्नस्येश्वरस्य

सत्तावश्यमङ्गीकार्या। अतो वेदप्रणेतृरूपेणेश्वरसाधनं द्वितीयस्तवकस्य मूलोपजीव्यविषयः।

मीमांसकस्वीकृतषट्प्रमाणेनेश्वरस्य बाधकत्वस्थापनं न सम्भवति, नैयायिकसम्मतप्रमाणेनेश्वरसत्तास्थापनमिति तृतीयस्तवकस्य मूलविषयः। अनुपलब्धिवशादीश्वरोऽस्वीकार्य इति शङ्कायामीश्वरो योग्यानुपलब्धिविषयो न भवतीति युक्त्या तृतीयस्तवके खण्डनञ्चकारोदयनाचार्यः।

ईश्वरीयज्ञानस्य प्रामाण्यप्रतिष्ठानिमित्तं चतुर्थस्तवके उदयनाचार्यो भाट्टमीमांसकसम्मतप्रमाणलक्षणस्य तथा जैनसम्मतस्मृतिप्रामाण्यस्य खण्डनञ्चकार।

पञ्चमस्तवके ईश्वरस्यानुमानप्रमाणेन सत्तां स्थापितवान् उदयनाचार्यः। तत्र ईश्वरसाधकानुमानस्य ग्रन्थस्थितहेतवो यथा– कार्यत्वम्, आयोजनत्वम्, धृतिमत्त्वम्, विनाशित्वम्, व्यवहारत्वम्, शाब्दप्रमात्वम्, वेदत्वम्, व्याक्यत्वम्, संख्यात्वञ्चेति।[१४] अत उदयनाचार्यः साधकप्रमाणेनेश्वरबाधकप्रमाणस्य खण्डन-मकरोत्।

**ङ.** उदयनाचार्यविरचितान्यग्रन्थस्य नाम *प्रबोधसिद्धिः*। न्यायग्रन्थविशेषोऽयम्। वस्तुतो वात्स्यायनमुद्योतकरं वाचस्पतिमिश्रञ्चावलम्ब्योदयनाचार्यो ग्रन्थमिमं

विरचयामास। वरदाराजेन बहुत्र *तार्किकरक्षा*ग्रन्थे *प्रबोधसिद्धि*ग्रन्थस्य विविधवचनमुद्धृतवान्।

**उदयनाचार्यविरचितव्याख्यानग्रन्थाः**–

**क.** महर्षिगौतमविरचितन्यायसूत्रमवलम्ब्योदयनाचार्येण *न्यायपरिशिष्टम्* इति ग्रन्थो विरचितः। *न्यायसूत्र*ग्रन्थस्वीकृतानां षोडशपदार्थानां जातिपदार्थं निग्रहस्थानञ्चाश्रित्य ग्रन्थोऽयं विरचितः। ग्रन्थोऽयं *परिशिष्टप्रकाश*टीकया सह मुद्रितो जातः।

**ख.** वैशेषिक*प्रशस्तपादभाष्य*ग्रन्थमाश्रित्य रचितष्टीकाग्रन्थः *किरणावली*। भारतीयदर्शनसाहित्येऽस्य ग्रन्थस्य तात्पर्यपूर्णमवदानमत्यन्तं प्रशंसनीयम्। *आत्मतत्त्वविवेकस्य न्यायकुसुमाञ्जले*श्च वचनमस्मिन् ग्रन्थे दरीदृश्यते।

**ग.** वाचस्पतिमिश्रकृत*न्यायवार्त्तिकतात्पर्यटीका*ग्रन्थमवलम्ब्योदयनाचार्यः *तात्पर्यपरिशुद्धि*ग्रन्थं रचयामास।

ईश्वरं प्रत्यत्यन्तश्रद्धाकारणादेवोदयनाचार्यो निरीश्वरवादिनां मतोच्छेदपूर्वकमीश्वरसत्तास्थापने निरतोऽभवत्। उदयनाचार्यस्य रचनारीत्यैव ज्ञायते यत्कियदास्तिकत्वमुदयनाचार्ये आसीत्। ख्रीष्टीयनवमशतकस्य प्रारब्धे बौद्धलेखकः कल्याणरक्षित *ईश्वरभङ्गकारिका*ग्रन्थमरचयत्। ग्रन्थनाम्नैव ज्ञायते ईश्वरसत्ताखण्डनायैव ग्रन्थमिमं रचितवान्। श्रूयते यदुदयनाचार्यः

कल्याणरक्षितस्य ग्रन्थस्थितमतखण्डनायैव *न्यायकुसुमाञ्जलि*ग्रन्थमिमं रचितवान्। विषयेऽस्मिन् बहूनां सन्देहो वर्तते। यतो ह्युदयनाचार्यः कुत्रापि बौद्धलेखकस्य नामोल्लेखं न कृतवान्। किञ्च ग्रन्थे कुत्रापि तस्य ग्रन्थस्योद्धृतिर्नास्ति।

उदयनाचार्यो *न्यायकुसुमाञ्जलि*ग्रन्थस्य रचयितासीदिति विषये नास्ति सन्देहस्यावकाशः। किन्तु समीचीनतया ग्रन्थस्य पर्यालोचनेन ज्ञायते ग्रन्थस्य प्रारम्भविषयोऽत्यन्तमाकर्षणीयः। वस्तुतो ग्रन्थकाराः प्रारम्भे इष्टदेवतास्मरणं गुरुस्मरणं वेति कुर्वन्ति। किन्तूदयनाचार्यः पुष्पाञ्जल्यर्पणवदीश्वरसत्तासाधकग्रन्थमिममीश्वरस्य पदयुगलेऽर्पितवान्। एतेनेश्वरं प्रत्युदयनाचार्यस्योत्कृष्टभक्तिपरिचयः प्राप्यते। ग्रन्थस्य नाम *न्यायकुसुमाञ्जलि*-श्चेदपि प्रारम्भिककारिकायां *न्यायप्रसूनाञ्जलिरि*ति शब्दस्य प्रयोगो दृश्यते। वस्तुतस्तु 'कुसुमम्' 'प्रसूनम्' चेति शब्दद्वयमपि समपर्यायवाची, अतः छन्दसः साम्यताकारणात् कुसुमशब्दस्य स्थाने प्रसूनशब्दस्य प्रयोगः कृत उदयनाचार्येण। वस्तुतस्त्वस्य यौक्तिकता सन्दिग्धा वर्तते। विषयेऽस्मिन् उदयनाचार्यो मौनी बभूव। परन्तूदयनाचार्यविरचित*किरणावल्यां* बहुत्र *न्यायकुसुमाञ्जलिरि*ति नामोल्लेखो वर्तते।[१५] एतेन ज्ञायते ग्रन्थस्य नामावश्यं *न्यायकुसुमाञ्जलिरि*ति। उदयनाचार्येण व्यक्तिगतजीवनविषये न किमप्युच्यते चेदपीश्वरं प्रति श्रद्धाज्ञापने तस्य कापि त्रुटिर्न विहिता।

*लक्षणावली*ग्रन्थस्य रचयितोदयनाचार्य इत्यस्मिन् विषयेऽपि सन्देहस्यावकाशो नास्त्येव। किन्तु *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*श्चेति ग्रन्थद्वयस्य रचयितोदयनाचार्य इत्यस्मिन् विषये का युक्तिः? सम्यग्रूपेणोदयनाचार्यस्य ग्रन्थसमूहानां पर्यालोचनेनैव सन्देहस्य समाप्तिर्भवेत्। उदयनाचार्यस्य *न्यायवार्त्तिकतात्पर्यपरिशुद्धिरि*त्यस्मिन् ग्रन्थे *न्यायकुसुमाञ्जलि-रि*ति ग्रन्थस्य नामोल्लेखः प्राप्यते– 'प्रपञ्चितोऽयं न्यायकुसुमाञ्जलाविति'।[१६] पुनश्च *किरणावली*ग्रन्थे स्वयं प्रोवाच– 'आत्मतत्त्वविवेके न्यायकुसुमाञ्जलौ चानलसधियां सुलभ इति'।[१७] एवंरूपेण विभिन्नग्रन्थपर्यालोचनेन ज्ञायते यत्, *आत्मतत्त्वविवेकः*, *न्यायकुसुमाञ्जलिः*, *किरणावली*, *न्यायवार्त्तिकतात्पर्यटीका*, *न्यायपरिशिष्टम्*, *लक्षणावली* चेति ग्रन्था उदयनाचार्येणैव विरचिताः।

**वेदान्तिरूपेणोदयनाचार्यः**–

न्यायवैशेषिकदार्शनिकरूपेण लब्धप्रतिष्ठायामपि केचन मन्यन्ते उदयनाचार्यो वेदान्त्यप्यासीत्। यतो ह्युदयनाचार्यस्य ग्रन्थे वेदान्तदर्शनस्य स्थानमपि सुस्पष्टरूपेण परिलक्ष्यते। वेदान्तिवद्विज्ञानवादिनो बाह्यवस्तुसत्तां नाङ्गीकुर्वन्ति। एतस्य मतस्य खण्डने उदयनाचार्योऽवोचद् शून्यवादिनो वेदान्तिस्वीकृतचिन्मात्राद्वैतवादं स्वीकुर्युः न्यायसम्प्रदायस्वीकृतद्वैतवाद-मर्थाद्बाह्यवस्तुसत्तामङ्गीकुर्युर्वा। अन्यथा शून्यवादिनां मतस्यावकाशो न स्यात्। अत *आत्मतत्त्वविवेक* इति ग्रन्थ उच्यते–

'न ग्राह्यभेदमवधूय धियोऽस्तिवृत्ति-
स्तद्बाधने बलिनि वेदनये जयश्रीः।
नो चेदनित्यमिदमीदृशमेव विश्वं
तथ्यं तथागतमतस्य तु कोऽवकाशः'॥[१८]

केवलं न्यायदर्शने एव न, अपि तु वेदान्तदर्शनेऽपि न्यायमतस्य यथेष्टं माहात्म्यं वर्तते। उदयनाचार्य ईश्वरवादिरूपेणाद्वैतवेदान्तिनो नामोल्लेखं कृतवान्। अतो *न्यायकुसुमाञ्जलि*ग्रन्थस्य प्रथमस्तवकस्यान्तिमकारिकायामद्वैतवेदान्तिनां मतानुसारेणोच्यते–

'देवोऽसौ विरत प्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात् साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम'॥[१९]

उपर्युक्तयुक्त्योदयनाचार्यं वेदान्तिरूपेण मन्यन्ते चेदपि बहवः पण्डिता अस्य विरोधितां कृतवन्तः। वस्तुतस्तु *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*-श्चेत्यादिग्रन्थान् पर्यालोचनेन ज्ञायते, उदयनाचार्य एको नैयायिक आसीत्। उदयनाचार्यस्य भक्तिनिष्ठाया मूलकेन्द्रविन्दुरीश्वरः। तत्र च दृश्यते–

'स्वर्गापवर्गयोर्मार्गमामयन्ति मनीषिणः।
यदुपास्तिमसावत्र परमात्मा निरूप्यते'॥[२०]

वेदान्तदर्शनस्य मूलकेन्द्रविन्दुर्ब्रह्म। ब्रह्म सत्यम्, अन्यत्सर्वं मिथ्या। तदेव ब्रह्म जगतः कारणम्।[२१] वेदान्तदर्शने ईश्वरस्य स्वीकारेऽपि सर्वोच्चस्थाने तस्य सत्ता न

स्थिता। इदमेवोदयनाचार्यवेदान्तदर्शनयोर्भेदः। तेन वक्तुं शक्यते, उदयनाचार्यं वेदान्तिरूपेण मन्यन्ते चेदपि मूलत उदयनाचार्यो नैयायिक आसीत्।

भारतीयदर्शनं मूलतो मोक्षशास्त्रम्। धर्मार्थकाममोक्षेषु परमपुरुषार्थो मोक्षः। आत्मसाक्षात्कार एव मोक्षस्य साक्षात्कारणम्। श्रुतौ यथार्थमुच्यते– 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'।[२२] अर्थादात्मविषयकश्रवण-मनननिदिध्यासनादिनाऽऽत्मविषयकसाक्षात्कारो भवति। अत्र आत्मन्निति शब्देन जीवात्मा परमात्मा चेति बोध्यते। अस्मिन् विषये श्रुतिप्रमाणमपि वर्तते यथा– 'तमेव विदित्वातिमृत्युमेति'[२३] इति श्रुतिवाक्ये तत्पदेन 'जीवात्मा' तथा 'परमात्मा' च बोध्यते। 'द्वे ब्रह्मणी वेदितव्ये'[२४] इति श्रुतिवाक्येऽपि समविषयो ज्ञाप्यते। उदयनाचार्यस्या*त्मतत्त्वविवेको न्यायकुसुमाञ्जलि*श्चेति ग्रन्थद्वये आत्मनः प्रतिष्ठाभवत्। गद्यात्मक*ात्मतत्त्वविवेक*ग्रन्थे नैरात्म्यवादिबौद्धसम्मत-विविधमतखण्डनपूर्वकं न्यायमतस्य शरीराद्यतिरिक्तनित्यविभुज्ञानवत्सुखाश्रयस्य जीवात्मनः प्रतिपादनं कृतवान्।

*न्यायकुसुमाञ्जलि*ग्रन्थो गद्यपद्यात्मकः। ग्रन्थस्थितकारिका सूत्राकारे-ऽनुष्टुब्वृत्तेन रचिता। स्वल्पाक्षरविशिष्टकारिकाया गूढार्थोन्मोचनाय तस्या व्याख्यानं कृतवान् उदयनाचार्यः। तथ्यपूर्णव्याख्यानमाध्यमेनोदयनाचार्येण स्वस्य शास्त्रनैपुण्यं प्रदर्शितम्। निरीश्वरवादिनां खण्डनपूर्वकमीश्वरप्रतिष्ठाया एतादृशी सुचारुविचारशैल्यन्यत्रातीव दुर्लभा।

**उदयनाचार्यकृतग्रन्थाः –**

१. आत्मतत्त्वविवेको बौद्धाधिकारो वा।

२. प्रबोधसिद्धिः।

३. न्यायकुसुमाञ्जलिः।

४. किरणावली।

५. तात्पर्यपरिशुद्धिः।

६. लक्षणावली।

७. लक्षणमाला।

***आत्मतत्त्वविवेक*ग्रन्थस्य टीकासमूहः–**

१. दीधितिः(रघुनाथशिरोमणिरचिता)।

२. माथुरी (मधुरानाथतर्कवागीशरचित्ता।

३. प्रकाशिका(भगीरथटक्कररचिता)।

४. कल्पलता(शङ्करमिश्ररचिता)।

***न्यायकुसुमाञ्जलि*ग्रन्थस्य टीकासमूहः–**

१. प्रकाशः(वर्धमानोपाध्यायरचिता)।

२. आमोदः(शङ्करमिश्ररचिता)।

३. बोधनी(वरदराजरचिता)।

४. मकरन्दः(रुचिदत्तोपाध्यायरचिता)।

५. परिमलः(दिवाकरोपाध्यायरचिता)।

**तथ्यसूत्राणि**–

१. *सं. सा. इति.*, सम्पा. देवकुमारदासः, पृ.– ११७।

२. *आत्म. वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– १३।

३. *न्या. कु.*, सम्पा.  चन्दनभट्टाचार्यः, पृ.– ख।

४. *आत्म. वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– १९।

५. *लक्ष. व.*, पृ.– १३।

६. *आत्म. वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– १३।

७. *खण्ड. खाद्य.*, पृ.– ३६४।

८. *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, ३/७, पृ.– ३४१।

९. *वा. सा. अव.*, सम्पा. दीनेशचन्द्रभट्टाचार्य्यः, पृ.– ८।

१०. *अ. सि.*, पृ.– १४।

११. *आत्म. वि.*(प्र. खण्डः), सम्पा. दीननाथत्रिपाठी, पृ.– ७।

१२. *वे. सा.*, सम्पा. विपद्भञ्जनपालः, पृ.– २४।

१३. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– ९१।

१४.  *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, ५/१,  पृ.– ४७९।

१५. 'आत्मतत्त्वविवेके न्यायकुसुमाञ्जलौ  चानलसधियां सुलभ इति'।– *कि. वली.*, सम्पा. नगेन्द्रचन्द्रवेदान्ततीर्थः, पृ.– ३८३।

१६. *आत्म.वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– १४।

१७. *कि. वली.*, सम्पा. नगेन्द्रचन्द्रवेदान्ततीर्थः, पृ.– ३८३।

१८. *आत्म. वि.*, सम्पा. ढुण्ढिराजशास्त्री, पृ.– २३०।

१९. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– झ।

२०. तदेव, १/२, पृ.– ४।

२१. 'सर्वज्ञं ब्रह्म जगतः कारणम्, नाऽचेतनं प्रधानमन्यद्वेति सिद्धम्'।– *शा. भा.*, ५/११, पृ.– २६९।

२२. बृहदारण्यकोपनिषद्, *उप. सं.*, सम्पा. चित्तरञ्जनघोषालः, २/४/५, पृ.– ५४२।

२३. श्वेताश्वतरोपनिषद्, तदेव, ६/१५, पृ.– १४१।

२४. अमृतविन्दूपनिषद्, तदेव, पृ.– १५७।

# द्वितीयोऽध्यायः

## न्यायदर्शनानुसारेण आत्मस्वरूपविचारः

दार्शनिकैस्स्वस्वमार्गमवलम्ब्यैव स्वस्वशास्त्राणि प्रणीतानि। प्रायस्सर्वेषा-न्दर्शनानां पन्थानो भिन्ना इति दृश्यते चेदपि तेषां सर्वेषामुद्देश्यमेकमेव दरीदृश्यते। एवञ्च न्यायदर्शनस्याप्यन्यशास्त्रेभ्यो भिन्नत्वं दरीदृश्यते चेदपि शास्त्रान्तरवदस्यापि मोक्षप्रदिपादनमेव मूलोद्देश्यम्। अद्यत्वे जिज्ञासोरभावादा-त्मतत्त्वानुसन्धाने भारतीयदर्शनभूमिकाया न्यूनत्वे दृश्यमानेऽप्यतिसूक्ष्म-तत्त्वविचारे न्यायदर्शनस्याऽस्य मुख्यत्वमाबहोः कालादेव वरीवर्ति। कालगततारतम्यानुसारेण विषयगततारतम्यानुसारेण वा प्राचीन-नव्यभेदेन दर्शनमिदं द्विविधम्। द्वयोर्दर्शनयोः पारस्परिकभिन्नत्वमभिन्नत्वमुत्कर्षतानु-त्कर्षता च तद्रचितविविधग्रन्थादेव निरबोधि।

आबहोः कालान्मनुष्यजन्मनां प्रधानमभीप्सितं लक्ष्यं पुरुषार्थः। पुरुषार्थेष्वन्यतमः परमपुरुषार्थो मोक्षः। आत्मसाक्षात्कारो मोक्षस्य प्रधानोपायः। अतश्च विरुद्धमतखण्डनपूर्वकन्तथा गौतमीयन्यायसूत्रस्य व्याख्यानपुरःसरं न्यायमतस्थापनं नैयायिकानां प्रधानकार्यं चेदपि मोक्षसाक्षात्कारकारण-रूपतत्त्वज्ञानप्रतिस्थापनमपि नैयायिकानां प्रधानोद्देश्यं वरीवर्ति।

न्यायनये स्वीकृतपदार्थानां विभाजनस्य प्रधानमाश्रयस्थलमात्मैव। स्थूलत्ववर्जितकारणाच्छृङ्गग्राहिकन्यायेनाऽऽत्मनो बोधो न भवति। इतरव्यावृत्त्याऽर्थादात्मा देहो न, इन्द्रियं न, मनो नेत्यादिरूपेणाऽऽत्मा बोधव्यः। इतरव्यावृत्त्यर्थमात्मेतरवस्तुनो बोधोऽपेक्षते। यतो ह्यनभिप्रेतस्य वस्तुनः खण्डनाय तज्ज्ञानमपेक्षत एव। आत्मेतराणां वस्तूनां ज्ञानाय निरूपणाय च विभाजनकौशलमवलम्ब्यते। प्राचीनन्याये षोडशपदार्थज्ञानान्निःश्रेयसोऽ-र्थान्मोक्षस्य लाभो भवति। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जातिनिग्रह-स्थानानां तत्त्वज्ञा-नान्निःश्रेयसप्राप्तिर्भवति।[१] प्रेत्युपसर्गपूर्वकान्माञ्माने इति धातोर्घञ्प्रत्ययेन निष्पन्नस्य प्रमेयशब्दस्याऽर्थः प्रकृष्टज्ञानमिति, पारिभाषिकार्थश्चास्य मोक्षजनकज्ञानविषयः। उद्देशसूत्रे आत्मनस्साक्षादुल्लेखो नास्ति चेदपि प्रमेयपदार्थरूपेणात्मन उल्लेखो वर्तत एव।[२] पुरुषार्थेषु परमपुरुषार्थस्य मोक्षस्य कारणरूपेण *बृहदारण्यकोपनिषद्युच्यते*– 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'।[३] अतधातोर्मनिन्प्रत्ययेन निष्पन्नेनाऽऽत्मन्निति शब्देन यथा जीवात्मनः सूचनं भवति तथा परमात्मनोऽपि सूचनं भवति।[४] एतद्वेदेऽपि प्रसिद्धम्।[५] *मुण्डकोपनिषद्यप्यात्मनो* द्विविधत्वं स्वीकृतम्। आत्मना सह पक्षिद्वयस्य सादृश्यं दर्शितम्। एकः पक्षी फलं भुङ्क्तेऽपरश्च केवलं पश्यति। पक्षिद्वयोर्मध्ये एको जीवात्माऽपरश्च भवति परमात्मा।[६]

भेदसाधकसुखदुःखादिविशेषज्ञानस्य विद्यमानत्वाज्जीवात्मा प्रतिशरीरं भिन्नमेव। यतो हि शरीरे विद्यमानेऽप्येकस्मिन् शरीरे सुखानुभवे सत्यप्यपरस्मिन् शरीरे सुखं नाऽनुभूयते। एवञ्च परमात्मेश्वरः सर्वज्ञो विभुरेक एव।[७]

न्यायशास्त्रस्य प्रतिपादनशैली दृश्यते चेज्ज्ञायते न्यायनये शास्त्रस्य त्रिविधा प्रवृत्तिर्वर्तते– उद्देशः, लक्षणम्, परीक्षा चेति।[८] 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्हि भवति'– इति नियमवशात् प्रमेयपदार्थरूपेणात्मन उद्देशानन्तरमात्मलक्षणस्य विचारः परीक्षा वाऽपेक्षते। तर्कशास्त्रस्य न्यायशास्त्रस्य वा प्रवृत्तेर्मूलं भवति संशयः।[९] अतो भाष्यकारेणात्मपरीक्षायाः पूर्वं संशयः कृतो यत्, आत्मा देहादिसंघातमात्रमुत देहादिव्यतिरिक्त इति।[१०] संशयवशाद् जीवात्मनस्स्वरूप-पर्यालोचनेन जीवात्मनो वैशिष्ट्यं परिलक्ष्यते। यथा– जीवात्मा देहादिव्यतिरिक्तः, सगुणः, नित्यः, बहुः, निरवयवश्चेति। जीवात्मनस्स्वरूपाणां पर्यायेण पर्यालोचनं क्रियते। नास्तिकचार्वाका देहात्मवादं स्वीकुर्वन्ति। आस्तिकनैयायिका देहात्मवादस्य खण्डनं कृत्वा देहादिव्यतिरिक्तस्य जीवात्मनः प्रतिष्ठां कुर्वन्ति। देहादिभिन्नत्वमिति पदं श्रुत्वा प्रश्नो भवति देहादिभिन्नत्वं नाम किमिति? देहादिभिन्नत्वं नाम देह-बाह्येन्द्रिय-मनोऽन्तरेन्द्रियप्रभृतिभ्यो भिन्नत्वं बोध्यते। चार्वाका आत्मनस्स्वीकारेऽपि देहादिव्यतिरिक्तस्याऽऽत्मनः स्वीकारं नैवाङ्गीकुर्वन्ति। चैतन्यविशिष्टदेह एवात्मा। चैतन्यन्देहस्यैव गुणः। 'अहं कृशः', 'अहं स्थूलः' चेत्यादिलौकिकप्रयोगेण 'अहम्' इति पदेन देहस्यैव बोधो भवति।

कृशत्वम्, स्थूलत्वमित्यादयो देहेस्य धर्माः। अत आत्मा देहादिभिन्नो न भवति। नैयायिकैस्स्वयुक्त्या मतस्याऽस्य खण्डनमकारि। अचेतनत्वाच्चैतन्यं देहस्य गुणो भवितुं नार्हति। मृतदेहे कदापि चैतन्यं नैव दृश्यते। चैतन्यमात्मनो गुणः, देहस्य नास्ति।[११] मरणादनन्तरं देहे दग्धे सत्यात्मनो विनाशः कदापि न भवति।[१२] देहस्य जन्ममरणशीलत्वेऽप्याऽऽत्मा तद्विनिर्मुक्तो भवति। शरीरस्याऽचेतनत्वात्कदापि कर्ता भवितुं नार्हति। ज्ञानस्याऽधिकरणमेवात्मा लक्षणमिदमात्मनः।[१३]

बौद्धाः क्षणिकात्मनः स्वीकारं कुर्वन्ति। परन्तु तन्मतस्य नैयायिकैः स्वयुक्त्या खण्डनमकारि। *कठोपनिषदि* रथादिरूपकेणाऽऽत्मतत्त्वं प्रतिपादितम्। देहस्य रथेन साकम्, जीवात्मनो रथस्वामिना साकम्, बुद्धेः सारथिना सह, मनसः प्रगृह्येण साकञ्चेति सादृश्यमाध्यमेनात्मतत्त्वस्य प्रतिपादनं कृतम्।[१४] आत्मा न केवलन्देहादिव्यतिरिक्तोऽपि तु बाह्येन्द्रियव्यतिरिक्तोऽपि। इन्द्रियस्यात्म-रूपेणोपपत्तिर्नैव भवितुमर्हति। कस्यापि विषयस्यानुभवकर्ता स्मरणकर्ता चैक एव भवति। कस्यापि विषयस्याऽनुभवो विशेषेन्द्रियजन्यं भवति चेत्तस्येन्द्रियस्य विनाशे सत्यपि तस्य स्मरणे बाधा न भवति। अर्थात्कोऽपि परवर्तिसमयेऽन्धः स्याच्चेदपि पूर्वदृष्टविषयस्य स्मरणे बाधा न भवति। किञ्चेन्द्रियस्य कर्तृत्व-स्वीकारे एककर्तृत्वस्य हानिः स्यात्।[१५] चक्षुरिन्द्रियेण रूपस्य श्रोत्रेन्द्रियेण च शब्दस्य ग्रहणं भवति। एवं बहुकर्तृत्वस्य प्रादुर्भावः स्याद्यदयौक्तिकम्। इन्द्रियादयः स्वस्वविषयग्रहणे समर्थाश्चेच्चेतनपदार्थस्य काऽऽवश्यकतेत्येवं प्रश्ने

सत्युच्यते– इन्द्रियादयः स्वस्वविषयग्रहणे सत्यपि ते ज्ञानाश्रयात्मनः सहकारिमात्रमिति।[१६] अत आलोचनेनेन्द्रियस्यात्मत्वं दूरीभवति।

आत्मा यथा बहिरिन्द्रियेभ्यो भिन्नस्तथाऽन्तरिन्द्रियेभ्योऽपि भिन्नः। आत्मना साकं मनस्संयोगाद्वस्तुज्ञाने सत्यप्यात्मा कदापि मनो न भवति। अणुपरिमाणाद् एकस्मिन्समये एकेनेन्द्रियेण साकं संयोगस्थापने समर्थे सति न तु सर्वैर्बहिरिन्द्रियैः साकम्। अणुपरिमाणत्वात्प्रत्यक्षगोचरीभूताः सुखादयोऽपि मनसो गुणा न भवितुमर्हन्ति। अतो मनः सुखदुःखादीनां करणं भवति चेदपि कर्ता भोक्ता चाऽऽत्मैव।

न्यायनये आत्मनः स्वरूपविश्लेषणे सति येषां वैशिष्ट्यानां भूरिश उद्भासितं भवेत्तेष्वन्यतममात्मनो नित्यत्वम्। आत्मनो नित्यत्वप्रतिपादनात्पूर्वम् 'नित्यम्' इति पदस्य ज्ञानमावश्यकम्। अतश्चोच्यते– 'प्रागभावाप्रतियोगित्वे सति ध्वंसाभावाप्रतियोगित्वं नित्यत्वम्'।[१७] तर्कसंग्रहकारेणाप्यस्य मतस्य पोषणं कृतम्– 'नित्यत्वं ध्वंसाप्रतियोगित्वम्'।[१८] नित्यत्वस्य लक्षणमवश्यं न्याय-सम्मतात्मना संगच्छते। आत्मनो नित्यत्वप्रसङ्गे उपनिषद्युच्यते– 'न हन्यते हन्यमाने शरीरे'।[१९] नैयायिकाः स्वस्वयुक्त्यात्मनो नित्यत्वसाधनं कृतवन्तः। आत्मनो नित्यत्वस्थापनप्रकल्पे नैयायिकानां स्वसमर्थनयुक्तयो वर्तन्ते। यथा– नवजातशिशवो हर्षभयशोकप्रभृतीनां कारणाज्ञातेऽपि वस्तुनः प्राप्तौ यथा हर्षिता भवन्ति तथा वस्तुनोऽप्राप्तौ दुःखिता भवन्ति। सुखदुःखयोरनुभवो यथा

पूर्वाभ्यासस्मरणं विना न भवति तथा पूर्वाभ्यासः पूर्वजन्म विना न सम्भवति। अतोऽस्थायिदेहस्यापरिवर्तनीयवस्तु भवति आत्मा।[२०] किञ्चाऽऽत्मनो नित्यत्वस्थापनाय शिशोः प्रवृत्तिरप्युपमारूपेण प्रतिस्थापिता। सद्यजातशिशोः स्तन्यपानजनितक्षुधानिवृत्तिः पूर्वाभ्यासस्मरणं विना नास्ति किमपि। एतादृशः पूर्वाभ्यासः पूर्वजन्म विना न सम्भवति। अत आत्मनो नित्यत्वविषये सन्देहस्याऽवकाशो न भवति।[२१] न केवलं भारतीयर्शने आत्मनो नित्यत्वप्रतिपादनं वर्ततेऽपितु पाश्चात्त्यदर्शनेऽप्यात्मनो नित्यत्वं प्रतिपादितम्। पाश्चात्त्यग्रिसदार्शनिकप्लेटोमहोदयेन शिक्षाविषये उच्यते– शिक्षा भवत्यात्मनः पुनर्विन्यासस्य प्रक्रियेति। वचनस्य पर्यालोचनेन ज्ञायते, आत्मनो जन्मान्तरप्रक्रिया तेनैव स्वीक्रियते। तेनोच्यते– 'The purpose of Education is to turn whole soul round, in order that the eye of the soul or reason may be directed to the right quarter. Education does not generate or infuse a new principle: it only guides and directs a principle already in existence'.[२२] अतो न केवलं भारतीयदर्शने पाश्चात्त्यदर्शनेऽप्यात्मनो नित्यत्वं स्पष्टरूपेण स्वीकृतम्। आत्मनो नित्यत्वविषये नैयायिकयुक्तिं विना शास्त्रीयप्रमाणमपि वर्तते। यथा– 'जीवपेतं वाव किलेदं म्रियते, न जीवो म्रियत इति'।[२३] उदयनाचार्येण *आत्मतत्त्वविवेक*ग्रन्थे

बौद्धसम्मतक्षणिकत्ववादस्य खण्डनं कृत्वैकस्मिन्परिच्छेदे आत्मनो नित्यत्वप्रतिपादनं कृतम्। अत आलोचनेनानेनाऽऽत्मनो नित्यत्वं प्रतिपादितम्।

जीवात्मनः संख्यात्वविषये शङ्कोत्थापिते सति प्रतिशरीरं विद्यमानत्वाद् जीवात्मनो बहुत्वं सिद्ध्यति।[२४] स्मरणविषयस्य भिन्नताकारणाद् एकोऽपरदृष्टविषयं स्मर्तुं न शक्नोतीति हेतोरवश्यमेवात्मनो बहुत्वं स्वीकर्तव्यम्।[२५]

न्यायसम्मतस्याऽऽत्मनः शरीरभेदाद्भिन्नत्वादेकस्मिन् सुखानुभवे सत्यपरस्मिन्दुःखानुभवो भवति। अर्थात्कश्चन सुखी, कश्चन दुःखी, कश्चन मूर्खः, कश्चन पण्डितश्चेत्यादिवैलक्षण्यमेकस्मिन्नात्मनि नैव सम्भवति। अतः सुखदुःखादीनामनुभववैषम्यादात्मनो बहुत्वं सिद्ध्यत्येव। अस्मिन् विषये ऋषिकल्पेन कणादेनोच्यते– प्रतिव्यक्ति वैचित्र्यवशाज्जीवात्मनो बहुत्वमिति।[२६] सांख्यदर्शनेऽपि वर्तते–

'जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव'॥[२७]

केवलन्दार्शनिकयुक्तिरेव नास्त्यपित्वस्मिन्विषये शास्त्रीयमपि प्रमाणं वर्तत एव। *श्वेताश्वतरोपनिषद्युच्यते*–

'अजामेकां लोहितशुक्लकृष्णां, बह्वीः प्रजाः सृजमानां सरूपाः।

अजो ह्येको जुषाणोऽनुशेते, जहात्येनां भुक्तभोगामजोऽन्यः'॥[२८]

महत्परिमाणत्वं प्रत्यक्षीभूतवस्तुनः कारणत्वं भवति चेत् प्रत्यक्षग्राह्यवस्तूनां परिमाणविषये सर्वेषु दर्शनेष्वौत्सुक्यं वर्तत एव। अस्मिन्विषये जीवात्मनोऽपि व्यतिक्रमो नास्ति। जीवात्मनः परिमाणत्वविषये दार्शनिकेषु मतविरुद्धता वर्तत एव। न्यायसम्मत आत्मा भवति विभुपरिमाणम्।[२९] अहं सुखी, अहं दुःखीप्रभृतिगुणानां प्रत्यक्षगोचरत्वात्तेषामाश्रयोऽवश्यमणुपरिमाणं भवितुं नार्हतीत्यतो विभुपरिमाणम्। आत्मनोऽणुपरिमाणत्वस्वीकारेऽनुभवकर्तावश्यमेक-देशस्थः स्यात्। फलतो देहादिसर्वावयवे सुखदुःखादीनामनुभवो न स्यात्। परन्त्वेकस्मिन् समये सर्वावयवे सुखदुःखादीनामनुभवसिद्धत्वादा-त्मनोऽणुपरिमाणत्वन्नैव सिद्ध्यति। परन्त्वात्मनो विभुपरिमाणत्वे प्रश्नो भवति यज्जीवात्मनो विभुपरिमाणत्वे सति संयोगविद्यमानत्वात् सर्वेषां जीवानामेकस्मिन् समये ज्ञानमुत्पद्येत। प्रश्नस्याऽस्य समाधानायोच्यते– विभुकारणाज्जीवात्मनः सर्वेषु जीवेषु संयोगेऽप्यदृष्टविशेषत्वाद्यस्य शरीरस्योत्पन्नं भवति तस्मिन् शरीरावच्छिन्नात्मनि ज्ञानमुत्पद्येत। अन्यशरीरावच्छिन्नात्मनि च ज्ञानन्नैवोत्पद्येत।[३०] अतश्च जीवात्मनो विभुत्वस्वीकारे प्रतिबन्धकता नास्त्येव। जीवात्मनो विभुत्वविषये शास्त्रीयप्रमाणमपि वर्तते। यथा–

'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः'।[३१]

प्रमेयपदार्थजीवात्मन आलोचनायाः परं परमात्मनस्तथेश्वरस्याऽऽलोचनं वितन्यते। परमात्मविषये भाष्यकारेणोच्यते– 'गुणविशिष्टमात्मान्तरमीश्वरः'।[३२] तर्कसंग्रहकारेणोच्यते– 'नित्यज्ञानाधिकरणत्वमीश्वरत्वम्'।[३३] जगतः सृष्टिस्थितिप्रलयानां नियन्त्रकः परमात्मेश्वर एव। जगतः सृष्टावीश्वर उपादान-कारणं नास्ति चेदपि निमित्तकारणं भवति। परमाणुसंयोगे जागतिकवस्तूनां सृष्टिकारणात्कार्यवस्तुपटादिवज्जागतिकवस्तूनामप्यवश्यं सृष्टिकर्ता वर्तत एव। विश्वनाथाचार्येणोच्यते– 'घटप्रभृतिकार्यं यथा कर्तृजन्यं तथा क्षित्यङ्कुरा-दिकमपि, न च तत् कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत् कर्तृत्वेनेश्वरसिद्धिः'।[३४] किञ्चोपादानकारणस्य ज्ञानजनिता या चिकीर्षा तस्या आश्रयत्वं कर्तृत्वम्।[३५] जगति द्व्यणुकादिक्रमेण विद्यमानानां पर्वतादिकार्यवस्तूनां सृष्टिं कर्तुमल्पज्ञा अल्पशक्तिसम्पन्नाः(जीवाः) नैव समर्थाः। अत एतेषां सृष्टिकारणरूपेण सर्वज्ञः सर्वशक्तिमान् ईश्वर एव स्वीकरणीयः। यद्यपि कर्मत्ववादिनां मतानुसारेण जीवानां कर्मैव धर्मः। कर्मवशादेव जगतः सृष्टिः। जीवः कृतकर्मानुसारेणादृष्टवशात् फलभोगं करोति, तदर्थमतिरिक्ततयेश्वरो नैवाङ्गीकर्तव्यः।[३६] नैयायिकास्तस्य सम्पूर्णरूपेण खण्डनञ्चक्रुः। अदृष्टकर्माण्यचेतनानि भवन्ति। अतो जीवानां शुभाशुभकर्म पर्यालोचनेन तस्य फलप्रदानमचेतनादृष्टेन न सम्भवति। अतोऽदृष्टाश्रयरूपेणेश्वरस्य ग्रहणमवश्यं कर्तव्यम्। जगतो निमित्तकारण-स्वरूपमीश्वर एको विभुर्नित्यश्च। जगतः सृष्टिविषये एकस्येश्वरस्याऽस्वीकारे-

ऽनेकेश्वरस्य स्वीकारे स्वेच्छाचारिता परिलक्षिता भवेत्। यतो हि कोऽपि सृष्टिकर्मणि कोऽपि ध्वंसकर्मणि लिप्तः स्यात्। *पातञ्जलयोगदर्शने*ऽपि क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष एक एवेश्वर इत्युक्तम्।[३७] अस्मिन्प्रसङ्गे श्रुतिरपि प्रमाणम्– ईश्वर एको भवति चेदपि बह्वभिलषितवस्तुप्रदाने समर्थः।[३८] न्यायवार्त्तिककारेणोच्यते– आत्मनि सामान्यगुणरूपेण संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेत्यादयो बुद्धिश्च विशेषगुणो वर्तन्ते।[३९] आचार्यविश्वनाथेन *भाषापरिच्छेदे* ग्रन्थे ईश्वरस्य गुणविषये उच्यते– संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेत्येते पञ्च सामान्यगुणाः, बुद्धिः, इच्छा, प्रयत्नश्चेत्येते ईश्वरस्य विशेषगुणाः। एवमीश्वरस्याऽष्टौ गुणा वर्तन्ते।[४०] ईश्वरस्य गुणविषये मतविरुद्धं भवति चेदपि ईश्वरो गुणवानिति विषये मतैक्यं वर्तत एव। ईश्वरोऽशरीरी भवति चेत्कुम्भकारादिवज्जगतः सृष्टिं कर्तुं नैव समर्थस्स्यादिति शंकाऽऽगच्छत्येव। परमात्माऽशरीरी भवति चेदपि तस्याऽलौकिकशक्तिवशाज्जगतः सृष्टिं कर्तुं समर्थो भवति। अस्मिन्विषये श्रुतिवाक्ये उच्यते– स हस्तपादहीनश्चेदपि गतिशीलः, चक्षुर्विनाऽपि दर्शनशीलः, कर्णं विनापि श्रवणशीलः इति।[४१] *कठोपनिषद्य*प्येकस्मिन्मन्त्रे विभिन्नोपमया भूषितं यत्, शब्दहीनः, स्पर्शहीनः, रूपहीनः, अव्ययञ्चेत्यादिरूपेणाभिहितम्।[४२]

अतः कुम्भकारादिवदनित्यशरीरस्याऽधिकारी नास्ति चेदपि जगतः सृष्टौ कापि प्रतिबन्धकता नास्ति। किञ्च नित्येच्छावशात्क्रमेण जगत उपादानकारणात्परमाणौ क्रियामुत्पादयति। किञ्च द्व्यणुकादिक्रमेण जगतः सृष्टिं कुर्वन्ति। जगतः सृष्ट्यर्थं शरीरस्याऽपेक्षा नास्त्येव। परमाणौ या क्रिया सा भिन्नक्रियाऽपेक्षया निरपेक्षा। परमाणुमध्ये एतादृशक्रियायाः सत्त्वात्परमाणुरीश्वरस्य शरीरम्। परमाणोर्नित्यत्वादीश्वरस्य नित्यशरीरं स्वीकृतम्।[४३]

किञ्च कुम्भकारादीनामिव परमात्मनोऽनित्यशरीरस्य स्वीकारे शरीरस्य स्रष्टृरूपेणाऽनित्यशरीरस्य स्वीकारः कर्तव्योऽर्थात्परमात्मनः शरीरोत्पत्त्यर्थमपरस्य परमात्मनः स्वीकारः कर्तव्यः। फलतोऽनवस्थादोषः स्यात्। अतः परमात्माऽशरीरीति।

न्यायदर्शने सुपरिचितग्रन्थराजिषूदयनाचार्यस्य *न्यायकुसुमाञ्जलि*रिति ग्रन्थो वस्तुत ईश्वरस्य मननात्मकोपासना। अस्मिन्ग्रन्थे निरीश्वरवादिनां मतखण्डनपुरःसरमीश्वरस्याऽस्तित्वस्थापनमकारि।[४४] न्यायदर्शने जीवात्मना सार्धं परमात्मनः सम्बन्धः सुस्पष्टरूपेण परिलक्ष्यते। अस्मिन् प्रसङ्गे न्यायभाष्यकारेणोच्यते– पित्रा साकं पुत्रस्य यादृक्सम्बन्धस्तथा समस्तप्राणिवर्गेण सह परमात्मनः सम्बन्धः पितृभूतोऽर्थात्पितृतुल्यम्।[४५] परमात्मनः पितृस्थानित्वविषये ऋच्युद्घोषितम्–

'यो नः पिता जनिता यो विधाता
धामानि वेद भुवनानि विश्वा'।[४६]

मिथ्याज्ञानवशाज्जीवः संसारे आबद्धो भवति। बन्धनवशाज्जीवाः स्वयमेव कर्ता भोक्ता चेत्यादिरूपेण दुःखादीनामनुभवं कुर्वन्ति। तत्त्वज्ञानेन मिथ्याज्ञानस्य दूरीकरणं भवति। मिथ्याज्ञाने नाशे क्रमेण दोषप्रवृत्तिजन्मदुःखादीनां निवृत्तिर्भवति।[४७] तत्त्वज्ञानलाभात्परमपि शरीरविनाशो न भवतीति हेतोः तत्त्वज्ञः सशरीरं विद्यमानादेतादृश्यवस्था जीवनमुक्तिरिति कथ्यते। अस्यान्दशायां शरीरमनसोस्संयोगो दृश्यते। प्रारब्धकर्मणां क्षयकारणाच्छरीरस्य विनाशरूपमुक्तिरेव विदेहमुक्तिर्या दुःखस्याऽऽत्यन्तिकनिवृत्तिरूपपरममुक्तिरिति।[४८]

**तथ्यसूत्राणि**–

१. 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'।– *न्या.* द. (प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, १/१/१, पृ.– १९।

२. 'आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गस्तु प्रमेयम्'।– तदेव, पृ.– १९६।

३. बृहदारण्यकोपनिषद्, *उप. सं*, सम्पा. चित्तरञ्जनघोषालः, २/४/५, पृ.– ५४२।

४. 'तथा च तमेव विदित्वेति श्रुत्या द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति श्रुत्या च आत्मा वा अरे इत्यादिश्रुतिघटकात्मपदं ज्ञानवत्त्वरूपेण जीवात्मपरमात्मोभयपरम्'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– १७।

५. 'आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किञ्चनमिषत्। स ईक्षत लोकान् नु सृजा'।– ऐतरेयोपनिषद्, *उप. नि.*, सम्पा. अतुलचन्द्रसेनः सीतानाथतत्त्वभूषणः महेशचन्द्रघोषश्च, १/१, पृ.– ३२७।

६. 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'॥– मुण्डकोपनिषद्, *उप. नि.*, तदेव, ३/१/१, पृ.– २३८।

७. 'तत्रेश्वरः सर्वज्ञः परमात्मैक एव। जीवात्मा प्रतिशरीरं भिन्नः विभुर्नित्यश्च'।– *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ४३।

८. 'त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति'।– *न्या. द.* (प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– ८१।

९. 'नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशयितेऽर्थे'।– तदेव, पृ.– २७।

१०. तदेव, पृ.– २०२।

११. 'शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः'।– *भा. परि.,* सम्पा. अनामिकारायचौधुरी, पृ.– १०९।

१२. 'न हन्यते हन्यमाने शरीरे'।– *श्री. गीता*, विनायकगणेशः आपटे, २/२०, पृ.– ४९।

१३. 'ज्ञानाधिकरणमात्मा'।– *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ४३।

१४. 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च'॥– कठोपनिषद्, *उप. नि.*, सम्पा. अतुलचन्द्रसेनः सीतानाथतत्त्वभूषणः महेशचन्द्रघोषश्च, १/३/३, पृ.– १०६।

१५. *भा. दर्श.*, सम्पा. समरेन्द्रभट्टाचार्यः, पृ.– ८५।

१६. 'चेतनोपकरणत्वेऽपि सतीन्द्रियाणामेतद् भवितुमर्हति यथा प्रदीपस्य सद्भावे रूपग्रहणं भवत्यसति न भवति, न च रूपग्रहणं प्रदीपस्य'।– *न्या. वार्त्ति.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी, ३/१/२, पृ.– ३४९।

१७. *न्या.* द.(तृ. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, ३/१/१८, पृ.– ५९।

१८. *तर्क. सं.,* सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– २१।

१९. *श्री. गीता*, सम्पा. विनायकगणेशः आपटे, २/२०, पृ.– ४९।

२०. ‘पूर्वाभ्यस्तस्मृत्यबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः’।– *न्या.* द.(तृ. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, ३/१/१८, पृ.– ५९।

२१. ‘पूर्वाभ्यासश्च पूर्वजन्मनि सति नान्यथेति सिध्यत्येतदवतिष्ठतेऽयमूर्ध्वं शरीरभेदादिति’।– तत्रैव।

२२. *शिक्षा. ओ शिक्षा.*, पृ.– ६४७।

२३. छान्दोग्योपनिषद्, *उप. नि.*, सम्पा. अतुलचन्द्रसेनः सीतानाथ-तत्त्वभूषणः महेशचन्द्रघोषश्च, ६/११/३, पृ.– ५९१।

२४. ‘जीवात्मा प्रतिशरीरं भिन्नः विभुर्नित्यश्च’।– *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ४३।

२५. ‘नान्यदृष्टमन्यः स्मरतीति’।– *न्या.* द.(तृ. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, ३/१/१२, पृ.– ४०।

२६. ‘व्यवस्थातो नाना’।– *वै. सू.*, सम्पा. प्रद्योतकुमारमण्डलः, ३/२/२०, पृ.– १२।

२७. *सां. कारि.*, सम्पा. दिवाकरानन्दः, पृ.– ३५।

२८. श्वेताश्वतरोपनिशद्, *उप. नि.*, सम्पा. अतुलचन्द्रसेनः सीतानाथतत्त्वभूषणः महेशचन्द्रघोषश्च, ४/५, पृ.– ३८१।

२९. ‘विभुर्बुद्ध्यादिगुणवान्’।– *भा. परि.*, सम्पा. अनामिकारायचौधुरी, पृ.– १३३।

३०. ‘शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म’।– *न्या.* द.(तृ. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, ३/२/६६, पृ.– ३४६।

३१. *श्री. गीता*, सम्पा. विनायकगणेशः आपटे, २/२४, पृ.– ५९।

३२. *न्या.* द.(प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– ६१।

३३. *तर्क. सं.,* सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ४३।

३४. 'यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि, न च तत् कर्तृत्वमस्मदादीनां सम्भवतीत्यस्तत् कर्तृत्वेनेश्वरसिद्धिः'।– *भा. परि.*, सम्पा. अनामिकारायचौधुरी, पृ.– २।

३५. 'सकर्तृकत्वम् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमिति'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, ५/१, पृ.– १९६।

३६. 'नेश्वराधिष्ठेः फलनिष्पत्तिः कर्मणा तत्सिद्धेः'।– *सां. सू.*, सम्पा. रामशङ्करभट्टाचार्यः, ५/२, पृ.– ६७।

३७. 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'।– *पात.* द., सम्पा. पूर्णचन्द्रशर्मा, १/२४, पृ.– ४५।

३८. 'एको बहूनां यो विदधाति कामान्'।– श्वेताश्वेतरोपनिषद्, *उप. नि.,* सम्पा. अतुलचन्द्रसेनः सीतानाथतत्त्वभूषणः महेशचन्द्रघोषश्च, ६/१३, पृ.– ३३९।

३९. 'संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एव तस्य गुणाः'।– *न्या. वार्त्ति.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी, ४/१/२१, पृ.– ४६५।

४०. 'संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे'।– *भा. परि.*, सम्पा. अनामिकारायचौधुरी, पृ.– ६७।

४१. 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः'।– श्वेताश्वेतरोपनिषद्, *उप. नि.*, सम्पा. अतुलचन्द्रसेनः सीतानाथतत्त्वभूषणः महेशचन्द्रघोषश्च, ३/१९, पृ.– ३७८।

४२. 'अशब्दमस्पर्शमरूपमव्ययम्'।– कठोपनिषद्, तदेव, १/३/१५, पृ.– ११४।

४३. 'आचार्यमतानुयायिनस्तु नेश्वरस्यातिरिक्तशरीरसिद्धिः परमाणूनामेव तच्छरीरत्वोपगमात्'।– *भा. परि.*, सम्पा. हरिरामशुक्लः, पृ.– ५।

४४. 'न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।

उपासनैव क्रियते श्रवणान्तरागता'॥– *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– ६।

४५. 'आप्तकल्पश्चायम्। यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम्'।– *न्या. द.*(च. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, ४/१/२१, पृ.– ७४।

४६. *ऋ. वे.*, १०/८/२३।

४७. 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः'।– *न्या. द.*(प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– ६३।

४८. 'जीवन्मुक्तिश्च मिथ्याज्ञानजन्यवासनाराहित्ये सति जीवित्वम्, जीवित्वञ्च शरीरप्राणसंयोगः परममुक्तिः चरमदुःखध्वंसः, आत्यन्तिकी दुःखनिवृत्तिरिति यावत्'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, १/२, पृ.– १७।

# तृतीयोऽध्यायः

## *आत्मतत्त्वविवेक*ग्रन्थे आत्मविषयकं पर्यालोचनम्

निखिलेऽस्मिन् जगति सर्वजनसंवेदनीयं निसर्गप्रतिकूलस्वभावं दुःखं परिहर्तुं सर्वे तदुपायमनुसन्धित्सवः सन्ति। प्राचीनकालादेव चैतस्य दुःखत्रयस्य निवारकत्वेनाऽऽत्मतत्त्वज्ञानमेव सर्वे आकर्णयन्ति। यथा च श्रूयते *सांख्यतत्त्वकौमुद्याम्*–

'दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्'॥[१]

न्यायसूत्रे चोच्यते– 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क-निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेय-साधिगमः'[२] इति।

अत एव दुःखत्रयस्य निवारणार्थं तथा च नास्तिकवादिभिः प्रदत्तेभ्योऽपवादेभ्यश्चात्मतत्त्वं रक्षितुम् *आत्मतत्त्वविवेक*ग्रन्थः प्रणीत आचार्येणो-दयनेन। तत्र चात्मतत्त्वस्य प्रतिपादनपूर्वकं बौद्धप्रदत्तबाधकानामपि खण्डनञ्चक्रे। वस्तुत *आत्मतत्त्वविवेक* इत्यस्मिन्ग्रन्थे परिच्छेदचतुष्टये यथाक्रमेण बौद्धानाञ्चतुर्णां वादानां यथा– क्षणिकत्ववादस्य, बाह्यार्थभङ्गवादस्य,

गुणगुणिभेदभङ्गवादस्य, अनुपलब्धिवादस्य चैतेषां खण्डनङ्कृत्वात्मतत्त्वं सुष्ठुरूपेण प्रतिपादितम्।

**क्षणिकत्ववादखण्डनमात्मतत्त्वप्रतिष्ठा च–**

प्रथमपरिच्छेदे बौद्धसम्मतक्षणभङ्गवादस्य खण्डनं वर्तते। तत्र क्षणभङ्गस्य किं स्वरूपमिति चेत् शिरोमणिना क्षणिकत्वस्य लक्षणमित्थमवोचि– 'स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वम् उत्पत्तिमत्त्वं वा'।[३] स्वस्य योऽधिकरणभूतसमयस्ततः प्राक् योऽधिकरणभूतः समयः, तस्मिन् समयेऽनुत्पन्नः, परन्तु तस्मात् क्षणात्परं कदाचिद्विद्यमानोऽथवा उत्पन्नो यः पदार्थः स क्षणिकपदार्थः।

दीधितिकारेण प्रागभावो नैव स्वीक्रियते इति हेतोः क्षणिकत्वस्य लक्षणमित्थमवोचि– 'स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोग्यवृत्तित्वं क्षणिकत्वम्'।[४] अर्थात्स्वाधिकरणक्षणे विद्यमानो यो ध्वंसः, तस्य ध्वंसस्य यत्प्रतियोगी तत्रावृत्तित्वं क्षणिकत्वम्।

क्षणिकत्वज्ञानानन्तरं प्रश्नोऽवश्यमुत्पद्येतात्मापि क्षणिकपदार्थो न वा। अस्य संशयस्य निवारणार्थमेवोदयनाचार्येण *आत्मतत्त्वविवेक*ग्रन्थे क्षणभङ्ग-वादोऽवतारितः। आत्मा कथं न क्षणिकपदार्थस्तदध आलोच्यते।

**क्षणिकत्ववादः–**

क्षणवादेऽस्मिन् समापतितं यदात्मापि क्षणिकपदार्थो न वेति। तद्विचारावसरे आदावेव *आत्मतत्त्वविवेके* उच्यते 'क्षणभङ्गो बाधकं भवितुं नार्हति प्रतिबन्धासिद्धेः'।[५] अत्र प्रतिबन्धो व्याप्तिः, व्याप्तेरसिद्धत्वात् क्षणभङ्गवादो बाधकं भवितुं नार्हतीति।

**क्षणिकत्वसाधने बौद्धानां युक्तिः–**

बौद्धैः क्षणिकत्ववादसाधनाय 'यत्सत्तत्क्षणिकं यथा जलधरः' इत्यनुमानं प्रदर्शितम्। अनुमानस्थसत्पदं पारिभाषिकत्वेन व्यवह्रियते। सत्पदस्य लक्षणप्रसङ्गे उच्यते बौद्धैः 'अर्थक्रियाकारित्वं सत्त्वम्' इति। उदाहरणं यथा– घटः। अत्र घटेन जलाहरणमित्यर्थः प्रयोजनं वा सम्पद्यते। अत्र 'अर्थः' इति शब्दो जलाहरणादिप्रयोजनवशाद्वर्तते। क्रियाशब्दस्यार्थो निष्पत्तिः। *न्यायविन्दु*टीकायामर्थक्रियाकारित्वस्यार्थनिर्णयप्रसङ्गे दर्शितं यत्– 'अर्थस्य प्रयोजनस्य क्रिया निष्पत्तिः, तस्यां सामर्थ्यं शक्तिरिति'।[६]

एवमुपर्युक्तविषयस्य सम्यक् पर्यालोचनेन ज्ञायते यत्, बौद्धदृशा-ऽर्थक्रियाकारित्वरूपसत्त्वं क्रमेणाक्रमेण वा व्याप्तं वर्तते। अत्र व्याप्तिर्यथा– यत्र यत्रार्थक्रियाकारित्वं तत्र तत्र क्रमत्वं यौगपद्यत्वं वा। अर्थादर्थक्रियासम्पादनं क्रमेण वा यौगपद्येन वा भवति। 'व्यापकधर्मनिवृत्तौ व्याप्यस्यापि निवृत्तिः'– इति

न्यायानुसारेण व्यापकधर्मनिवृत्तौ सत्यां व्याप्यधर्मः स्वतो निवर्तते। यथा– वृक्षत्वं व्यापकधर्मः शिंशपात्वञ्च व्याप्यधर्मः। न्यायानुसारेण वृक्षत्वनिवृत्तौ सत्यां शिंशपात्वस्य निवृत्तिरवश्यंभावी। तेन च यो वृक्षो न भवति, किं स शिंशपेति विचारस्य प्रसङ्ग एव न भवति। एवञ्च क्रमाक्रमरूपव्यापकधर्मे निवृत्ते सत्यर्थक्रियाकारित्वरूपसत्त्वमपि निवर्तते।

उपर्युक्तपर्यालोचनेन स्थिरघटोऽर्थक्रियाकारीति वक्तुं न शक्यते। यतो हि क्रमेण यौगपद्येन वा घटस्यार्थक्रियाकारित्वं वक्तव्यम्। एवञ्च तत्र कर्तृत्वाकर्तृत्वयोरपि प्रसङ्ग आगच्छति। अस्य किञ्चिद्विस्तृततयालोचनमधो विधीयते। यथा– केनचित् स्थिरघटेन जीवद्दशायां विंशतिरर्थक्रियाः सम्पादिताः। इदञ्चार्थक्रियासम्पादनं क्रमेण यौगपद्येन वा सम्पादितम्। यदि क्रमशः क्रियते तर्ह्येकक्षणेऽनेन घटेनैकाऽर्थक्रिया सम्पादिता, तस्या अर्थक्रियायाः कर्ता अयं घटः, अन्यासां क्रियाणाञ्चाकर्ता। एवमेकस्मिन्नेव घटे कर्तृत्वाकर्तृत्व-विरुद्धधर्मद्वयस्य समावेशापत्तिः, यत्कदापि न सम्भवति। यदि च स्थिरघटेन यौगपद्येन यावदर्थक्रिया सम्पादिता इत्युच्येत तदाप्ययमेव प्रसङ्गः, यतो हि विशेषक्षणे स्थिरघटो यावदर्थक्रियायाः कर्ता परवर्तिसमये चाकर्ता। अतः स्थिरघटे क्रमाक्रमरूपव्यापकधर्मस्य निवृत्तावर्थक्रियाकारित्वरूपसत्त्वमपि निवर्तते। अस्मिंश्च प्रसङ्गे *सर्वदर्शनसंग्रहे* उच्यते– 'व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकाऽसत्त्वव्यावृत्तेः

सिद्धत्वाच्चेति'।[७] अर्थात् स्थिरघटेऽर्थक्रियाकारित्वरूपं सत्त्वं कदापि न तिष्ठति, किन्तु जलाहरणरूपकार्यसम्पादनाद् घटेऽर्थक्रियाकारित्वस्य प्रतीतिर्भवति। अत एवेदं स्वीकार्यमर्थक्रियाकारित्वरूपसत्त्वं क्षणिके घटे एव वर्तते। एवंरूपेण बौद्धैः क्षणिकत्वस्य प्रतिष्ठा दर्शिता। वस्तुतोऽस्य खण्डनमात्*मतत्त्वविवेके* कुशूलस्थाद्युदाहरणप्रदर्शनकाले संसर्गस्यैवासिद्धत्वमिति प्रदर्शितम्।

वस्तुतः 'यत्सत्तत् क्षणिकम्, यथा घटः। संश्च विवादाध्यासितः शब्दादिः'।[८] इत्यत्रोदयनाचार्येण दर्शितं यत्, यत्सत्तत् क्षणिकमियं व्याप्तिरेवासिद्धेति। ग्रन्थकारस्याशय एवं वर्तते यत्– 'हेतुव्यापकसाध्य-सामानाधिकरण्यं व्याप्तिः'।[९] परन्तु चरमध्वंसे क्षणिकत्वं वर्तते किन्तु सत्त्वं तत्र न वर्तते। अतः 'सत्' इति हेतौ चरमध्वंसान्तर्भावे साध्यसामानाधिकरण्यं न वर्तते। अन्तिमे शब्दे क्षणिकत्वं तिष्ठति चेदपि नास्ति तत्रार्थक्रियाकारित्वम्। घटे च सत्त्वस्थितेऽपि क्षणिकत्वाभावात् सत्त्वहेतुर्व्यभिचार इति। प्रसङ्गेऽस्मिन् कल्पलताटीकायामुच्यते– 'प्रतिबन्धो व्याप्तिस्तस्याः क्षणिकत्वनिरूपिताया असिद्धेरित्यर्थः। क्षणिकत्वनिरूपिता व्याप्तिरन्त्यशब्दत्वादौ प्रसिद्धा सत्त्वे प्रतिषिध्यत इति नाप्रसिद्धिः'।[१०]

एवं क्षणिकत्वसाधनाय बौद्धैरपरमेकमुदाहरणं प्रदर्शितम्, तच्चाध आलोच्यते।

क्षेत्रस्थबीजमङ्कुरमुत्पादयति किन्तु कुशूलस्थितबीजमङ्कुरं नोत्पादयति। अतः क्षेत्रस्थाङ्कुरोत्पादकबीजेभ्यः कुशूलस्थितबीजस्य भेदोऽवश्यमङ्गीकार्यः। तद्वदेकस्मिन्कुशूलस्थितबीजेऽपि प्रतिक्षणं विभिन्नक्रिया दरीदृश्यते। अतः कुशूलस्थितबीजेष्वपि भेदोऽवश्यं स्वीकर्तव्यः। सामर्थ्या-सामर्थ्यविरुद्धधर्मद्वयस्य संसर्गखण्डनार्थमुदयनाचार्येण स्वग्रन्थे उच्यते– 'सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गेण भेदसिद्धौ तत्सिद्धिरिति चेन्न विरुद्धधर्मसंसर्गासिद्धेः'।[११] अर्थात्सामर्थ्यासामर्थ्यरूपविरुद्धधर्मयोः संसर्ग एव न सम्भवतीत्यत्रासिद्धत्वविषये *आत्मतत्त्वविवेक*स्थमतस्य यथायथं स्पष्टीकर्तुं दीधितिकारेणोच्यते– 'किञ्चित्सामर्थ्यादिकमविरुद्धं किञ्चिच्चासिद्धमि-त्यादिशयेनाह'।[१२]

वस्तुतो बौद्धैः सामर्थ्यपदेन फलोपधायकत्वमसामर्थ्यपदेन च फलानुपधायकत्वमर्थः स्वीक्रियतेऽथवा सामर्थ्यपदेन स्वरूपयोग्यत्वमसामर्थ्य-पदेन स्वरूपायोग्यत्वञ्च स्वीक्रियते इति प्रश्नः कृतः स्वग्रन्थे *आत्मतत्त्वविवेके*। परन्तु यदि सामर्थ्यासामर्थ्ययोः फलजनकत्वं फलाजनकत्वञ्चेति स्वीक्रियेते तर्हि फलोपधायकत्वमर्थात्फलजनकत्वं फलानुपधायकत्वमर्थात्फ-लाजनकत्वञ्चेति धर्मद्वयं विरुद्धं नास्ति। यतो ह्येकस्मिन्नेव तन्तौ सहकारिकारणाभावे वस्त्रस्याजनकत्वदर्शनात्कालान्तरे च सहकारिकारणसत्त्वा-

द्वस्त्रस्य जनकत्वदर्शनात्। अत एकस्मिन्नेव तन्तौ फलोपधायकत्वानुपधायकत्व-धर्मद्वयदर्शनाद्धर्मद्वयस्य विरोधोऽसिद्धः।

एवञ्च यदि स्वरूपयोग्यत्वस्वरूपायोग्यत्वयोः सामर्थ्यासामर्थ्यत्वेन गृह्येत तर्हि धर्मद्वयस्य विरुद्धत्वेऽपि तयोः संसर्गोऽसिद्धः। अर्थाद्यथा घटं प्रति दण्डः कारणं भवतीत्यतो दण्डे स्वरूपयोग्यताऽर्थाद्घटकारणतावच्छेदकत्वरूपदण्डत्वं विद्यते, स्वरूपायोग्यतार्थाद्घटकारणतानवच्छेदत्वादण्डत्वं च नैव विद्यते। अत एकत्र द्वयोर्धर्मयोः समावेशाभावादुक्तधर्मौ विरुद्धौ वर्तेते। किन्तु तयोः संसर्गोऽप्यसिद्धः। यतो हि यत्र स्वरूपयोग्यता तिष्ठति तत्र स्वरूपायोग्यताऽपि न तिष्ठतीति हेतोस्तयोः संसर्गो न कुत्रापि सिद्ध्यति। एवं विरुद्धधर्मद्वयस्य संसर्गः सर्वथाऽसिद्ध एव। एवञ्च विरुद्धधर्मद्वयसंसर्गस्यासिद्धत्वात् कुशूलस्थितबीजेषु भेदोऽप्यसिद्धः। बीजानां क्षणिकत्वमप्यसिद्धम्। सत्तायाञ्च क्षणिकत्वव्याप्तिर-प्यसिद्धेति।

एवंरूपेण संसर्गस्यासिद्धत्वे सति पुनर्बौद्धैरन्यप्रकारेण भेदसाधनार्थमुच्यते– प्रसङ्गविपर्ययाभ्यां पदार्थानां भेदस्सिद्ध्यति।[१३] अत्र कथं प्रसङ्गेन भेदसिद्धिरिति चेत्कुशूलस्थबीजमङ्कुरासामर्थ्यमङ्कुराकारित्वात्। अत्र या व्याप्तिर्वर्तते सा व्यतिरेकव्याप्तिरिति। अत्र साध्यमसामर्थ्यं हेतुश्चाऽकारित्वम्। अस्यासामर्थ्यानुमानस्य व्यतिरेकव्याप्तिर्भवति यथा– यद् यस्मिन् कार्येऽसमर्थं नास्ति अर्थात्समर्थम्, तत्तत्कार्यं न करोतीति नास्त्यर्थात्करोति। एवं

व्यतिरेकव्याप्त्याऽसामर्थ्यनिरूपिताकारित्वस्य व्याप्तिनिश्चयेन कुशूलस्थबीजेऽसामर्थ्यमनुमीयते। अयमेव प्रसङ्ग इत्युच्यते। अपरपक्षे विपर्ययानुमानं दर्शयति यथा– यद् यदाऽङ्कुरादिकार्यं न करोति, तत् तत्कार्येऽसमर्थं भवति। यथा– प्रस्तरखण्डः। अत्र प्रकृते प्रस्तरखण्डवत्कुशूलस्थितबीजमप्यङ्कुरं नोत्पादयति। अनेन प्रकारेणान्वयव्याप्त्या कुशूलस्थबीजेऽसामर्थ्यमनुमीयते। एवं प्रसङ्गविपर्ययाभ्यां कुशूलस्थबीजेऽसामर्थ्यं क्षेत्रपतितबीजे सामर्थ्यञ्चानुमीयते। एवञ्च द्वयोर्भेदसिद्धत्वात्क्षणिकत्वमपि सिद्ध्यति।

एवं प्रसङ्गविपर्ययाभ्यां यदि भेदसिद्धिः क्रियते बौद्धैस्तर्ह्यत्रायं प्रश्नो वर्तते सामर्थ्यं नाम किमिति? करणत्वमुत योग्यता। अस्याशयः सामर्थ्यस्य फलोत्पादकत्वमित्यर्थ इष्टोऽथवा तन्निष्ठयोग्यतेत्यर्थ इष्टः। प्रथमार्थेऽर्थात्सामर्थ्यस्य करणत्वेऽर्थे इष्टे सति प्रसङ्गे तथा विपर्ययानुमाने हेतुसाध्ययोरभिन्नता स्यात्। अस्मिन्प्रसङ्गे उदयनाचार्येणोच्यते– 'नाद्यः साध्याविशिष्टत्वप्रसङ्गात्'।[१४] अपरश्च प्रसङ्गविपर्ययघटकसामर्थ्यपदेन योग्यतेत्यर्थस्यापि ग्रहणं भवितुं नार्हति सिद्धसाधनदोषापतितत्वात्। प्रसङ्गेऽस्मिन्प्रोच्यते आचार्येणोदयनेन– 'नापि द्वितीयः। सा हि सहकारिसाकल्यं वा प्रातिस्विकी वा। न तावदाद्यः पक्षः, सिद्धसाधनात्, परानभ्युपगमेन हेत्वसिद्धेश्च'।[१५]

एवं पूर्वोक्तमतखण्डितत्वाद् भावपदार्थानां क्षणिकत्वस्थापनाय बौद्धैः कुर्वद्रूपत्वातिशयेन कुशूलस्थबीजक्षेत्रस्थबीजयोर्भेदप्रतिपादनं क्रियते। सहकारिसमवधानेन क्षेत्रस्थबीजे उत्पद्यमानं कुर्वद्रूपत्वमङ्कुरस्य कारणम्। तच्च कुर्वद्रूपत्वं कुशूलस्थबीजे नैव तिष्ठति। अतः कुशूलस्थबीजात्क्षेत्रबीजं भिन्नं भवति। एवञ्चोभयोर्भिन्नत्वात्क्षणिकत्वमपि सिद्ध्यति। अत एव बौद्धमते बीजत्वस्य कुर्वद्रूपत्वस्य चोभयोः समावेशः स्यात्। परन्तु कुर्वद्रूपत्वञ्च बीजं विहायान्यत्रापि स्थातुमर्हति। अनेन च बीजत्वं कुर्वद्रूपत्वञ्च परस्परं विरुद्धं स्यात्। वैजात्यस्य यद्येकत्र समावेशः स्वीक्रियते तर्हि मनुष्यत्वस्य पशुत्वस्य चैकत्र समावेशः स्वीकर्तव्यः। परन्त्वेतस्याप्रसिद्धत्वात्कुर्वद्रूपत्वातिशयस्य ग्रहणं न सम्भवति। कुर्वद्रूपत्वावान्तरविषयकल्पनायां नास्ति काचिद्विनिगमना। प्रत्यक्षसिद्धबीजमेवाऽङ्कुरस्य प्रयोजकम्, न च सर्वप्रमाणासिद्धकुर्वद्रूपत्व-मङ्कुरस्य प्रयोजकम्। अतः क्षणिकत्वमपि न सिद्ध्यति। अतः क्षणिकत्वसिद्ध्यभावाद् न्यायसम्मतस्यात्मनो नित्यता सिद्धत्येव। एवंरीत्या *आत्मतत्त्वविवेके* क्षणिकत्वस्य खण्डनपूर्वकमात्मनो नित्यत्वमाचार्येणोदयनेन प्रतिपादितम्।

**प्रकारान्तरेण क्षणभङ्गसाधनं तस्य खण्डनञ्च–**

बहुभिः प्रकारैर्बौद्धैः क्षणिकत्ववादः सम्पादितः, उदयनाचार्येण स्वपरिश्रमेण स्वयुक्त्या सुमनोज्ञतया क्षणिकत्ववादस्य खण्डनञ्चक्रे।

पुनरत्रैकवारं बौद्धैः प्रयत्नो विहितः। बौद्धानामाशयोऽत्रैवं वर्तते यदुत्पद्यमतां वस्तूनां विनाशोऽवश्यंभावीति सर्वेऽपि स्वीकुर्वन्ति। यदवश्यंभावी तत्र कस्यापि कारणस्यापेक्षैव न भवति। यस्य यत्र सामर्थ्यं तत्तत्कार्यमविलम्बेन करोतीति हेतोरुत्पद्यमद्वस्तु विनाशशीलत्वात्परक्षणे एव नश्यति। एवं वस्तूनां विनाशस्याऽवश्यंभावित्वादहेतुकत्वे सिद्धे क्षणभङ्गवादस्सिद्ध्यत्येव। एवंरूपेण क्षणिकत्ववादे उपस्थापने सत्युदयनाचार्यः विकल्पपञ्चकं बौद्धान्प्रयच्छति, विनाशोऽहेतुक इति कथनस्याशयः कः? विनाशस्तादात्म्यं वा, निरुपाख्यत्वं वा, तत्कार्यत्वं वा, तद्व्यापकत्वं वा, अभावत्वमेव वेति।[१६] एतेषु कतमो बौद्धैर्गृह्यते। एवं प्रदत्तेषु विकल्पेषु कश्चन विकल्पोऽपि न सम्भवति।

प्रथमविकल्पस्तावद्विनाशस्तादात्म्यं वेति विकल्पः कथञ्चिदपि न सम्भवति। यतो हि निषेध्यनिषेधयोस्तादात्म्यं न सम्भवति। अर्थाद्भावाभावयोः परस्परविरुद्धधर्मयोरैक्यं न सम्भवति। यदि च भावाभावयोरैक्यं स्यात्तर्हि जगति विरोधः कदापि न स्यात्। एवञ्च गोत्वाश्वत्वादीनां विरुद्धधर्माणां सम्बन्धोऽप्युच्छिद्येत। ग्रन्थकारेणोच्यते– 'न पूर्वः निषेध्यनिषेधयोरेकत्वानुपपत्तेः। उपपत्तौ वा विश्वस्य वैश्वरूप्यानुपपत्तेः'।[१७]

निषेध्यनिषेधयोस्तादात्म्यवादस्य खण्डनानन्तरं बौद्धैर्द्वितीयविकल्पत्वेन पुनश्चापादि वस्तुनो विनाशो भावस्वरूपातिरिक्तनिरुपाख्योऽस्ति। अर्थाद्वस्तुनो विनाशः स्वत एव भविष्यति। उत्पद्यमतां भाववस्तूनां विनाशत्वाद्भाववस्तु

क्षणिकं स्यात्। एवंरूपेण बौद्धैरभावस्य निरुपाख्यत्वमलीकत्वं साधयित्वा क्षणिकत्वं साध्यते। किन्तु एतन्न समीचीनम्। प्रसङ्गेऽस्मिन्नैयायिकैरुच्यते– 'नन्वयमपि क्षणभङ्गस्योद्गारः, स च कफोणिगुडायितो वर्तते'।[१८]

बौद्धानां द्वितीयविकल्पस्य खण्डनान्तरं पुनर्बौद्धानां शङ्का समुपस्थाप्यते– 'अस्तु तर्हि तत्कार्यत्वमेव ध्रुवभावित्वम्'।[१९] अर्थाद्विनाशः प्रतियोगिनः कार्यमस्ति। अतः प्रतियोग्युत्पत्त्यव्यवहितानन्तरमेव विनाशो जायते। अत्र शङ्का भवति विनाशः प्रतियोगिनः कार्यमित्यस्याभिप्रायो विनाशः प्रतियोगिनोऽपि कार्यमित्यथवा प्रतियोगिन एव कार्यमिति। प्रथमपक्षे विरोधापत्तिर्यतो हि प्रतियोगिनोऽपि कार्यमिति स्वीकारे 'अपि' इति शब्देन कारणानन्तरसमुच्चयः, तदा कारणानन्तरस्य विलम्बत्वात्तदुत्पत्त्य-व्यवहितोत्तरक्षणोत्पत्तिकत्वं विरुद्धम्। द्वितीयपक्षे हेतोरसिद्धापत्तिः। यतो हि मुद्गरादेरपि घटनाशं प्रति कारणत्वदर्शनात्।[२०] अनेन प्रकारेण तृतीयपक्षस्य खण्डनं क्रियते।

बौद्धाश्चतुर्थविकल्पमर्थाद्व्यापकत्वं विनाशस्य ध्रुवभावित्वेनाऽशङ्कन्ते कथयन्ति च– 'अस्तु तर्हि व्यापकत्वं ध्रुवभावित्वमिति'।[२१] भावपदार्थस्य विनाशोऽवश्यंभावीति हेतोर्विनाशोऽहेतुकोऽर्थात्प्रतियोगिभिन्नकारणनिरपेक्ष इति। विनाशस्याहेतुकत्वे भावपदार्थस्य क्षणिकत्वं सिद्ध्यत्येव। खण्डनावसरे उदयनाचार्येणोच्यते– 'न। अतादात्म्यात्, अतत्कारणाच्च'।[२२]

एवं पञ्चमपक्ष आश्रीयते बौद्धैः प्रतिपाद्यते च– 'विनाशो न जायते अभावत्वात् प्रागभाववत्'।[२३] खण्डनावसरे प्रोच्यतेऽभावस्य विद्यमानत्वेऽपि प्रागभावो जायते यथा ध्वंसः। विनाशे विद्यमाने सत्यपि प्रागभाव उत्पद्यते, यथा घटः। अतो ग्रन्थकारेणोद्यते– 'प्रागभावो जायते अभावत्वात् विनाशित्वाद्वा ध्वंसवत् घटवद्वा'।[२४]

एवंरूपेण प्रथमाध्याये क्षणभङ्गवादे विकल्पपञ्चकस्य विस्तृतरूपेण वर्णिते सत्यपि विस्तारभयाद् विकल्पपञ्चकस्य खण्डनमा*त्मतत्त्वविवेके* सामान्येन प्रदर्शितम्।

**बाह्यार्थभङ्गवादस्य खण्डनमात्मतत्त्वप्रतिष्ठा च–**

मैथिलेयेनाचार्येणोदयनेन *आत्मतत्त्वविवेके* ग्रन्थे प्रथमपरिच्छेदे बौद्धसम्मतक्षणभङ्गवादरूपप्रथमबाधकखण्डनानन्तरं द्वितीयपरिच्छेदे बाह्यार्थ-भङ्गवादस्य खण्डनं विधीयते। तत्र द्वितीयपरिच्छेदे आदौ तावद्योगाचारस्य मतखण्डनं वर्तते। तत्स्वरूपमध आलोच्यते–

**योगाचारमतखण्डनेनात्मस्थापनम्–**

योगाचार एव विज्ञानवादी नाम्नाभिधीयते। विज्ञानवादिभिः ज्ञानभिन्नबाह्यवस्तुसत्ता नाङ्गीक्रियते। तैर्यद्यप्यात्मा स्वीक्रियते तथापि ज्ञानभिन्नात्मसत्ता नाङ्गीक्रियते। एवञ्च ज्ञानमपि क्षणिकम्, अतः

क्षणिकज्ञानमालयविज्ञानं वात्मत्वेन स्वीक्रियते चेदपि क्षणिकत्वात्तेऽपि नैरात्म्यवादिन एव। वस्तुतस्तेषां मते ज्ञानभिन्नबाह्यवस्तुसत्ता नास्त्येव। तथा च नीलपीतादिरूपेण यद् दृश्यते तद्वस्तुतो ज्ञानस्यैवांशः, ज्ञानादभिन्न इति। बाह्यवस्तुरूपेण यद्दृश्यते तत्सर्वं ज्ञानस्यैवाकारः, ज्ञानमेव तत्तदाकारेण विपरिणमते, ग्राह्यग्राहकरूपेण च स्वयं ज्ञानमेव प्रकाशते। अतो नैयायिकैर्यद्यात्मनः पृथग् बाह्यवस्तुरूपेणात्मसत्ता स्वीक्रियते तत्कदापि न सम्भवतीति विज्ञानवादिनामाशयः।[२५]

अत्र तावद्विज्ञानवादखण्डनार्थमुदयनाचार्येण विज्ञानवादिनां पुरस्ताद्विकल्पत्रयं समुपस्थापितम्। तद्यथा– बौद्धैः किं परमार्थसतोर्ग्राह्य-ग्राहकयोरभेदत्वं स्वीक्रियते, अथवा तयोरभिन्नजातीयत्वं स्वीक्रियते, आहोस्विद्ग्राह्यांशस्यालीकत्वं स्वीक्रियते।[२६]

अत्र नैयायिकैः खण्डनार्थमुच्यते प्रथमे साध्येऽर्थाद्ग्राह्य-ग्राहकयोरभेदेऽभिप्रेते सहोपलम्भनियमो वा ग्राह्यत्वं वा प्रकाशमानत्वं वेति यः कश्चन हेतुः प्रदीयतां स दुष्टहेतुः स्यात्।[२७] यतो हि अनुमितौ हेतुः पक्षधर्मरूपेण ज्ञातः सन् निमित्तो भवति, अनुमितौ च पक्षसाध्ययोर्विषयत्वं भवति। ज्ञानज्ञेययोरभेदे सति पक्षधर्मताज्ञानं तस्य विषयेण सहाभिन्नं स्यात्। एवञ्चानुमितेर्विषययोः पक्षसाध्ययोरनुमित्या सहाभिन्नत्वं भवेत्। एवंरूपेण परामर्शः, अनुमितिर्हेतुश्चाभिन्ना एव स्युः। किञ्चाभेदे हेतुहेतुमद्भावो न सिद्ध्येत्।

अतो ज्ञानज्ञेययोरभेदसाधकानुमाने हेतोरसिद्धत्वप्रसङ्ग इत्यतः प्रथमपक्षं स्वीकर्तुं न शक्यते।

वस्तुतो बौद्धैर्ज्ञानज्ञेयपदार्थयोरभेदसाधनाय सहोपलम्भनियमः, ग्राह्यत्वम्, प्रकाशमानत्वञ्चेति हेतुत्रयस्योपादानं क्रियते। अत्र सहोपलम्भनियमो नाम तदविषयकज्ञानाविषयत्वमर्थान्नियतरूपेणैकज्ञानविषयत्वम्। अत्र तदविषयकज्ञानाविषयत्वहेतुना ज्ञेयपदार्थं ज्ञानं वा पक्षरूपेण स्वीकृत्याभेदसाध्यकानुमानं क्रियते। अनुमानशरीरं यथा– ज्ञेयो ज्ञानादभिन्नो ज्ञेये ज्ञेयाविषयकज्ञानाविषयकत्वात्। यथा– नीलरूपम्(विषयः) नीलज्ञानादभिन्नम्, यतो हि नीलाविषयकं यत्पीतज्ञानं तदविषयत्वं नीले विद्यते। अनेन ज्ञानज्ञेययोरभेदत्वं बौद्धैः साध्यते।

परन्तु घटादिज्ञेयपदार्थान्पक्षत्वेन स्वीकृत्य ज्ञानाभेदसाध्ये ज्ञानाविषयकज्ञानाविषयत्वं हेतुत्वेन स्वीक्रियते चेत्स्वरूपासिद्धदोषप्रसङ्गः। यतो हि न्यायमते ज्ञानस्य स्वप्रकाशत्वं नास्ति। अतो घटज्ञानं ज्ञानाविषयकज्ञानं वर्तते, एवञ्च ज्ञानाविषयकज्ञानविषयत्वे घटे सत्त्वाज्ज्ञानाविषयकज्ञानाविषयत्वहेतुः पक्षे घटे नैव तिष्ठति। यदि च ज्ञानमेव पक्षत्वेन स्वीकृत्य ज्ञेयाभेदसाध्यं प्रति ज्ञेयाविषयकज्ञानाविषयत्वस्य हेतुत्वं स्वीक्रियते तदापि स्वरूपासिद्धदोषप्रसङ्गः। यतो हि ज्ञानपदाद्यज्ज्ञानमुत्पद्यते तदर्थाविषयकज्ञानं तस्मिंश्च ज्ञानविषयत्वमेव तिष्ठति चेदपि ज्ञानाविषयत्वं नैव तिष्ठति।

एवञ्चार्थविषयकज्ञानाविषयत्वहेतुः पक्षे ज्ञानेऽविद्यमानत्वात्स्वरूपासिद्धदोषः। अस्योत्तररूपेण बौद्धैरुच्यते ज्ञानस्य प्रकाशमानत्वं स्वीकृत्यैव ज्ञानाविषयकज्ञानाविषयत्वमर्थाविषयकज्ञानाविषयत्वं वा हेतुत्वेन गृह्यते। तेन च ज्ञानाविषयकज्ञानं नाम ज्ञानविशेषाभावस्य ज्ञानम्। तस्य विषयत्वं ज्ञानाभावे वर्तते, एवमविषयत्वं घटादिपक्षे सत्त्वादसिद्धिदोषप्रसङ्गो नास्ति। एवं ज्ञानपक्षेऽपि ज्ञानमात्रमेव विषयी भवतीति हेतोर्ज्ञानपदाद्यज्ज्ञानमुत्पद्यते तद्विषयविषयकज्ञानमिति, अतो विषयाविषयकज्ञानाविषयत्वं पक्षे ज्ञाने सत्त्वाद् न स्वरूपासिद्धिप्रसङ्गः। एवं बौद्धैः सहोपलम्भनियमेन ज्ञानज्ञेययोरभेदत्वं साध्यते।

परन्त्विदं मतं समीचीनं नास्तीति प्रकाशिकाटीकाकारेण तथा च कल्पलताटीकाकारेण दर्शितम्। प्रकाशिकाटीकाकारस्याशयो यदभावोपलब्धिर्नियमेन प्रतियोगिना सहैव भवति। एवञ्चाभावप्रतियोगिनोरभेदाभावात्सहोपलम्भनियमेऽर्थात्तदविषयकप्रतीत्यविषयत्वहेतौ व्यभिचारदोषो वर्तते एव।[२८]

एवं बौद्धानां प्रथमहेतोः खण्डनानन्तरं बौद्धा ग्राह्यत्वमिति द्वितीयहेतुं दर्शयन्ति। तच्च घटादिज्ञेयपदार्थो ज्ञानाभिन्नो घटादिज्ञेये ग्राह्यत्वात्। अनेनानुमानेन बौद्धैरभेदत्वं साध्यते। परन्त्विदमपि न समीचीनम्। तत्र नैयायिका दोषं दर्शयन्ति यत्, अङ्गुलीनिर्देश्यं यद्ग्राह्यं तत्र ग्राह्यत्वं वर्तते किन्तु तत्र ज्ञानाभिन्नत्वं नास्ति। अतो ग्राह्यत्वहेतुर्व्यभिचारदोषग्रस्तः।[२९]

एवमभेदसाधने तृतीयहेतुर्दर्शितो बौद्धैः प्रकाशमानत्वमिति। तत्रानुमानमित्थं दर्शितम्– ज्ञानं ज्ञेयाभिन्नं प्रकाशमानत्वात्। किन्तु नैयायिका अयं दुष्टहेतुरिति वदन्ति। यथा– ज्ञानाभावज्ञाने प्रकाशमानत्वमथवा प्रकाशकत्वं वर्तते, किन्तु ज्ञानाभावरूपज्ञेयाद् ज्ञानस्याभेदत्वं नास्ति। ज्ञानं ज्ञानाभावश्च कदाप्यभेदोऽथवाऽभिन्नो भवितुं नार्हति। अतः प्रकाशमानत्वहेतावपि बाधदोषो व्यभिचारदोषश्च समागच्छति। अतो बौद्धानां ज्ञानज्ञेययोरभेदसाधने सर्वे हेतवो दुष्टा वर्तन्ते। तेन चाभेदसाधनं नैव सम्भवति। एतेषां हेतूनां यथायथमुपस्थापनं विस्तारपूर्वकं खण्डनञ्चेति स्वग्रन्थे *आत्मतत्त्वविवेके* सुमनोज्ञतया दर्शितमाचार्येणोदयनेन।

प्रकृते विज्ञानवादिनां द्वितीयपक्षस्यार्थात्तयोरभिन्नजातीयत्वखण्डनं विधत्ते। विज्ञानवादस्वीकृतबाह्यार्थवादखण्डनावसरे दर्शितं यत्, ग्राह्यग्राहक-योरभिन्नजातीयत्वमपि न स्वीकर्तुं शक्यते व्याप्यत्वासिद्धवशात्। नीलादिरूपस्य(विषयस्य) यथा ज्ञानाभिन्नत्वं न सिद्ध्यति तद्वद् नीलादि-रूपस्य(विषयस्य) ज्ञानाभिन्नजातीयत्वमपि न सिद्ध्यति। नीलादिरूपस्य ज्ञानाभिन्नत्वसिद्धौ चानुमानम्– नीलादिरूपम्(विषयः) ज्ञानाभिन्नत्वं प्रकाशमानत्वात्। उक्तानुमाने यद् यद् ज्ञानाभिन्नत्वं भवति तत्र तत्र ज्ञानवृत्तियावद्धर्मवत्त्वं तिष्ठति। अर्थात्साध्यव्यापको भवति ज्ञानवृत्तियावद्धर्मः। अपरपक्षे यद् यत्प्रकाशमानं तत्र तत्र ज्ञानवृत्तियावद्धर्मो न तिष्ठति।

अर्थात्साधनाव्यापको भवति ज्ञानवृत्तियावद्धर्मः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति नियमानुसारेण ज्ञानवृत्तियावद्धर्म उपाधिर्भवति। अस्मिंश्चानुमाने हेतोरुपाधिविशिष्टत्वाद्व्याप्यत्वासिद्धदोषापत्तिः। एवमेव नीलादिरूपम्(विषयः) ज्ञानाभिन्नजातीयत्वमित्यत्रापि व्याप्यत्वासिद्धप्रसङ्गः। अत एव ग्रन्थकारश्चोवाच– 'एतेन द्वितीयः पक्षः प्रत्युक्तः'।[३०] नीलादिरूपम्(विषयः) ज्ञानसजातीयोऽपि भवितुं नार्हति, यदि नीलादिरूप-विषयस्य ज्ञानसाजात्यं स्वीक्रियते तर्हि घटपटादिविषयाणामपि ज्ञानसाजात्यमपि स्यात्। तेन च यस्मिन् ज्ञाने घटो विषयो भवति तस्मिन्नेव ज्ञाने पटादीनां विषयत्वमापतति। तेन चातिप्रसङ्गरूपदोषः। ग्रन्थकारश्चावोचत्– 'न हि सजातीयत्वेन ग्राह्यलक्षणवैधुर्यमुत्सार्यते, अतिप्रसङ्गस्य तादवस्थ्यात्'।[३१] इतोऽपि विस्तृततया द्वितीयपक्षस्य खण्डनम् *आत्मतत्त्वविवेके* दरीदृश्यते।

द्वितीयपक्षस्य खण्डनानन्तरं पुनस्तृतीयपक्ष उपस्थाप्यते– 'अस्तु तर्हि तृतीयः, सर्वथा ग्राह्यलक्षणानुपपत्तेः'।[३२] तत्र आशयः सर्वथा अर्थाद्भेदपक्षम-भेदपक्षञ्चोभयत्र ग्राह्यलक्षणस्यानुपपत्तितो ग्राह्यमलीकमेव भवति। अतो बाह्यवस्तुनि ग्राह्यलक्षणाभावो विद्यते। शशशृङ्गं यथा ग्राह्यलक्षणाभावादलीकं भवति तथैव बाह्यार्थोऽप्यलीको भवति। ग्राह्यस्य लक्षणाभावेन ग्राह्यरूपलक्ष्यमप्यसिद्धं स्यात्। लक्ष्यासिद्धे सति नियतवस्तुग्रहणार्थं सामग्रीगतसामर्थ्यस्यावश्यकता नास्ति।[३३] यतो हि विचारसिद्धवस्तुन्येव

कार्यकारणभावः सम्पद्यते। यच्च विचारसिद्धं नास्ति तत्र कार्यकारणभावस्य कल्पनैव न भवति, अलीकत्वस्य विचारसिद्ध्यभावात्कार्यकारणयोरवसरः सामग्रीसामर्थ्यावकाशो वा नैव भवति। एवञ्च तत्र ग्राह्यस्यालीकत्वे सिद्धे न दोषः।[३४] तदा बौद्धान्प्रत्युदयनाचार्यो विकल्पद्वयं प्रयच्छति। तद्यथा– नीलादिषु ग्राह्यलक्षणस्य निरूपणासामर्थ्यत्वाद् नीलादेः सत्ताभावाद्वा ग्राह्यांशस्यालीकत्वं स्वीक्रियते।[३५] तत्र प्रथमपक्षस्यार्थाद् ग्राह्यलक्षणस्य निरूपणासामर्थ्यत्वमित्यस्य खण्डनमित्थं दृश्यते यद् ग्राह्यस्य लक्षणस्यानिश्चयतामात्रेणैव नीलादीनाम-प्रकाशमानत्वमिति वक्तुं न शक्यते। अर्थाल्लक्षणाभावे लक्ष्याभावो न सिद्ध्यति। लक्षणानिश्चयेन लक्षणस्य दुर्ज्ञेयत्वमपि सम्भवितुमार्हति। अत एव बाह्यवस्त्ववश्यमेव सर्वानुभवसिद्धम्। एवञ्च बाह्यवस्तुज्ञानं यदि न स्वीक्रियेत तर्हि बाह्यवस्तुलक्षणं नास्तीति ज्ञानमपि न सम्भवति। तथा चोच्यते स्वग्रन्थे *आत्मतत्त्वविवेके*– 'न हि लक्षणापरिज्ञानमात्रेण स्पष्टदृष्टमपि लक्ष्यमपह्नोतुं शक्यते, अपरिज्ञानस्य दुरूहत्वेनाप्युपपत्तेः, तेषामप्रतिभासे तन्निषेधस्यानुपपत्तेः'।[३६] न च द्वितीयपक्षोऽपि सम्भवति। ग्राह्यलक्षणानुपपत्ति-स्तदैव सत्पदार्थान्नीलादीन्निवर्तयेत् यदासत्पदार्थेषु ग्राह्यलक्षणस्योपपत्तिर्भवति। किन्तु ग्राह्यलक्षणमसत्पदार्थेषु न गच्छतीति, अतो नीलादीन्निवर्तयितुं न शक्नोति। अतो नीलादीनां बाह्यपदार्थानां सत्ताऽङ्गीकार्या।[३७]

एवंरूपेण विकल्पत्रयस्य खण्डनं विधायोदयनाचार्यो बौद्धानां योगाचार-वादस्याथवा विज्ञानवादस्य सविस्तरं खण्डनञ्चक्रे स्वग्रन्थे *आत्मतत्त्वविवेके*। एवञ्च बौद्धैरपि ज्ञानभिन्नबाह्यवस्तुसत्तावश्यमङ्गीकर्तव्या। तेन ज्ञानभिन्नात्म-सत्ता स्वयं सिद्ध्यतीति स्वग्रन्थे प्रतिपादितम्।

**शून्यवादस्य मतखण्डनेनात्मस्थापनम्–**

*आत्मतत्त्वविवेके* द्वितीयपरिच्छेदे बाह्यार्थभङ्गवादे एव शून्यवादिनां खण्डनञ्चक्रे उदयनाचार्येण। वस्तुतोऽयं प्रसङ्गो बौद्धानां 'विचारासहत्वमेव विश्वस्य' इति विचारप्रसङ्गे आगतः।[३८] अस्याशयः सद्रूपेणासद्रूपेण वा ग्राह्यवस्तुनो निरूपणाभावात्सर्वथा विश्वस्य विचारासहत्वमेवार्थाद्विचार-शून्यत्वमेव सिद्धम्। तदा नैयायिकैः पृच्छयते इदं विचारासहत्वं किमर्थम्? तत्त्वस्यानिश्चयताकारणाद्वाह्यग्राह्यवस्तुनः शून्यताकारणाद्वा।[३९] तत्र प्रथम-विकल्पस्य खण्डनमित्थं वर्तते यत्– 'न प्रथमः इयतीं भूमिमारूढस्यापि विचारस्य निश्चलतायां प्रमाणाभावात्, भावे वा कथं तत्त्वोपप्लवः, अस्यैव विचारस्यानुपप्लवात्, तत्समानन्यायस्यान्यस्यापि तथाभावप्राप्तेः निष्फल-त्वाच्च'।[४०]

एवं प्रथमविकल्पस्य सुमनोज्ञरीत्या खण्डनं क्रियते उदयनाचार्येण। वस्तुतः प्रथमविकल्पस्य खण्डनात्परं बौद्धैर्द्वितीयविकल्प आश्रीयते। उच्यते च– 'अस्तु

तर्हि शून्यतैव परमं निर्वाणमिति'।[४१] अर्थाज्जगत्प्रपञ्चस्य शून्यत्वमेव परमसुखदायकमिति। परन्त्वयं विकल्पोऽपि न समीचीन इत्युच्यते नैयायिकैः। जगत्प्रपञ्चस्य शून्यत्वं कदापि न सम्भवति। अस्य शून्यत्वस्य खण्डनार्थं विकल्पद्वयं क्रियते उदयनाचार्येण। तत्र शून्यता ज्ञातरूपेण वाऽज्ञातरूपेण वेति । यद्यज्ञातः स्यात्तर्हि सर्वमपि शून्यतायामापतेत्, एवञ्चाज्ञातेन वस्तुना न किमपि प्रतिपादयितुं शक्यते।[४२] एवं शून्यताखण्डनप्रसङ्गे उच्यते–'परतश्चेत्सिद्धा, परोऽप्यभ्युपगन्तव्यो ग्राह्यलक्षणं चावर्जनीयमिति। स च परो यदि संवृतिरेव विश्वशून्यतयोर्न कश्चिद्विशेषः, कथं तदप्यवशिष्येत। असंवृतिरूश्चेत् परः, परत एव सिद्धा बलवत्ता। स्वयमसिद्धश्चेत्, कथं शून्यत्वमपि साधयेत्। स्वतःसिद्धश्चेत्, आयातोऽसि मार्गेण'।[४३] अस्याशयः शून्यत्वं यदि परतोऽर्थात्प्रमाणेन सिद्धमित्युच्येत तर्हि प्रमाणरूपभिन्नपदार्थः स्वीकर्तव्यः, अतस्तदा शून्यत्वं न सिद्ध्यति। एवं ग्राह्यस्वरूपमप्यनिवार्यरूपेण स्वीकर्तव्यम्, यतो हि शून्यत्वप्रमाणयोर्विषयविषयिभावोऽत्र स्वीकृतः। प्रमाणमपि चेत्संवृतिरर्थात्कल्पनामात्रं तदा विश्वस्य शून्यत्वस्य च न कोऽपि विशेषभेदः। यदि चासंवृतिरर्थात्तत्त्व-भूतमिति स्वीक्रियेत तर्हि तत्प्रमाणसिद्ध्यर्थं प्रमाणान्तरं कल्पनीयम्, एवं प्रमाणान्तरस्य प्रमाणान्तरं कल्पनीयमेवमनवस्थादोषापत्तिः। एवंरूपेण शून्यवादः कदापि न सम्भवति स्वग्रन्थे *आत्मतत्त्वविवेके* इतोऽपि गम्भीरतया दर्शितमुदयनाचार्येण। एवञ्च प्रतिपादितम्– अनुवभबलेन हि

सिद्ध्यति यत्, ज्ञानभिन्नमर्थादनात्मापि स्फुरति। अर्थाद् अयं शुक्ल इत्यनुभवो भवति, इमे शुक्लनीले परस्परं भिन्ने इत्यप्यनुभवो भवत्येव। एवं विभिन्नानुभवव्यवस्था केवलविज्ञानवादेन न सम्भवति। ज्ञानभिन्नविषयाणां सत्ता बौद्धैरवश्यमङ्गीकार्या। उच्यते च– 'तस्मादनुभवव्यवस्थितौ अनात्मापि स्फुरतीत्यवर्जनीयमेतत्। तत्सिद्धौ तल्लक्षणमपि किञ्चिदस्त्येव। तच्च बाह्याविरोधे ज्ञानानित्यतायां तन्निष्ठमुभयनिष्ठं वा, बाह्यविरोधे ज्ञाननिष्ठमेव.......त्वादेव च नान्यदीयः'।[४४]

बाह्यार्थप्रसङ्गे आगतस्य शून्यवादस्य नैयायिकशिरोमणिनाचार्येणोदयनेन स्वग्रन्थे *आत्मतत्त्वविवेके* ग्रन्थे खण्डनञ्चक्रे। बौद्धानां बाह्यार्थवादस्यार्थाद् ज्ञानभिन्नबाह्यवस्तुसत्ता नास्तीति कदापि यदा न सम्भवति, तदा ज्ञानभिन्नबाह्यवस्तुरूपेणात्मसत्ता स्वत एव सिद्ध्यति।

**गुणगुणिभेदभङ्गवादस्य खण्डनमात्मतत्त्वप्रतिष्ठा च–**

आचार्योदयनविरचिते *आत्मतत्त्वविवेके* मुख्यतया परिच्छेदचतुष्टयं वर्तते। यथा– क्षणभङ्गवादः, बाह्यार्थभङ्गवादः, गुणगुणिभेदभङ्गवादः, अनुपलम्भ-वादश्चेति। आदौ तावत्क्षणभङ्गवादपर्यालोचनं तदनन्तरं बाह्यार्थभङ्ग-वादपर्यालोचनम्, तदनन्तरञ्च गुणगुणिभेदभङ्गवादस्य पर्यालोचनं वर्तते। अत्र

तावत्तृतीयपरिच्छेदे गुणगुणिभेदभङ्गवादे बौद्धसम्मतगुणगुणिनोर-भेदत्वस्य खण्डनं दरीदृश्यते।

बौद्धा गुणगुणिनोरभेदत्वं स्वीकृत्यात्मनः सुखदुःखाद्यनाश्रयत्व-सिद्ध्यर्थमत्र प्रयतन्ते। तेषामाशयो गुणातिरिक्तस्य गुणिनः सत्ता न विद्यते। अतश्च ज्ञानरूपगुणातिरिक्तस्यात्मनः सत्ता न विद्यते। क्षणिकविज्ञानं विहाय वेदान्तिनां नित्यविज्ञानस्यात्मतत्त्वस्यापि किमपि प्रमाणं नास्ति। अतः क्षणिकविज्ञानमेवात्मत्वेन स्वीकर्तुं शक्यते इति। तथा च दृश्यते मूलग्रन्थे– 'गुणगुणिनोरभेदान्नैरात्म्यम्, क्षणिकज्ञानमात्रपरिशेषादिति'।[४५] अस्य खण्डनार्थमाचार्येणोदयनेनावोचि– 'अस्ति तावदिह दर्शनस्पर्शनाभ्यामेकार्थानुसन्धानम्'।[४६] अर्थात्पूर्वं घटं दृष्ट्वोच्यते 'अयङ्घटः' इति, अनन्तरङ्केवलं स्पर्शनेनाप्युच्यते 'अयं घटः' इति। तत्र प्रश्नो वर्तते यत्, इदं यज्ज्ञानं वर्तते तत्किमेकैकविषयं भवत्यर्थात्केवलं रूपं केवलं स्पर्शनं वा विषयीकरोति, समुदायविषयं वा भवत्यर्थाद्रूपस्पर्शयोः समुदायं वा विषयीकरोति, तदतिरिक्तविषयमर्थादवयविनं वा विषयीकरोति, वस्त्वनुरोध्याकारविषयं वा भवति, शशशृङ्गवदलीकविषयं वा भवति। ग्रन्थे च दृश्यते– 'तदिदमेकैकविषयं वा स्यात्, समुदायविषयं वा, तदतिरिक्तविषयं वा, वस्त्वनुरोध्याकारविषयं वा, अलीकविषयं वा'।[४७]

अत्र प्रथमविकल्पो न सम्भवति तत्र हेतुमाह– 'न हि यदेव रूपं स एव स्पर्श इति। न च रूपं त्वगिन्द्रियग्राह्यम्, अन्धस्यापि नीलादिप्रत्ययप्रङ्गात्'।[४८] अर्थाद्रूपं चक्षुरिन्द्रियेण ग्राह्यं भवति, स्पर्शः त्वगिन्द्रियेण ग्राह्यो भवति। त्वगिन्द्रियेण रूपं न गृह्यते, चक्षुषा च स्पर्शो नैव भवति। चाक्षुषस्पार्शनोभयविधप्रत्यक्षस्थले एकेनेन्द्रियेण केवलं रूपस्य केवलं स्पर्शस्यैव वा प्रतीतिर्भवति। अन्यथा केवलं त्वचैवोभयप्रतीतिस्वीकारेऽन्धस्यापि नीलत्वादिप्रतीतिः स्यात्। अतो ज्ञानरूपगुणभिन्नस्य दर्शनस्पर्शनोभयविधज्ञानस्याश्रयारूपेणात्मनः सत्ताऽवश्यमङ्गीकर्तव्या। तेन चातिरिक्तात्मसत्ताङ्गीकारेणैव ज्ञानभेदे सत्यपि स्थाय्यात्मन एकत्वात्स एवात्मा दर्शनकाले स्पर्शनकाले च भवति। तथा च स एव 'अयं घटः' इति प्रत्यभिज्ञा भवति। तेन बौद्धसम्मतः क्षणिकविज्ञानमेवात्मेति न सिद्ध्यति।

द्वितीयपक्षोऽपि न सम्भवत्यर्थात्समुदायविषयमिति विकल्पोऽपि न सम्भवति। अत्र दर्शनस्पर्शनक्रियाद्वारैकमर्थमर्थाद्रूपस्पर्शसमुदायं गृह्णातीति यद्विकल्पितं तदप्यसंभवं रूपस्पर्शसमुदायविषयाभावात्। कथं न समुदायविषय इति प्रसङ्गे च विकल्पचतुष्टयं ग्रन्थकर्ता विकल्पयति यथा– समुदाय एकदेशत्वविशिष्टौ रूपस्पर्शौ वा एककालत्वविशिष्टौ रूपस्पर्शौ वा एककार्यत्वविशिष्टौ रूपस्पर्शौ वा एककारणत्वविशिष्टौ रूपस्पर्शौ वेति।[४९]

तत्र प्रथमविकल्पोऽर्थाद्रूपस्पर्शसमुदायविषयग्रहणे रूपस्पर्शोपादान-भूतैकदेशः कारणमिति वक्तुं न शक्यते, यतो हि बौद्धानां मतेऽपि रूपं प्रति रूपोपादानं कारणम्, स्पर्शं प्रति च स्पर्शोपादानं कारणं भवति। अतो रूपस्पर्शसमुदायविषयं प्रति समुदायैकदेशरूपस्य समुदायैकदेशस्पर्शस्य वा कारणमिति न सम्भवति। किन्तु भूतलाद्याधारेण तयोः समुदायः सम्भवति तच्च विषयीक्रियते इति। अर्थाद्भूतले घटरूपं घटस्पर्शं चोभयं तिष्ठति। तथा च भूतलरूपैकाधिकरणतया तयोः समुदायः सम्भवतीति यदि बौद्धैरुच्येत तर्हि तदपि न सम्भवति। यतो हि बौद्धैर्गुणातिरिक्तं गुणी न स्वीक्रियते, अतश्चक्षुषा गृह्यमाणं भूतलं पृथग् गुणित्वेन नैव ग्रहीतुं शक्यते अपि तु रूपविषयमात्रम्, एवं घटोऽपि न पृथग् गुणिभूतवस्त्वपितु रूपविशेषमात्रम्। तेन च रूपविशेषात्मकभूतले रूपविशेषात्मघट आश्रितो भवतीत्येव चक्षुषाऽवश्यं निश्चीयेत, किन्तु तत्रैव भूतलाधिकरणे स्पर्शादिरपि वर्तते इति चक्षुषा निश्चेतुं न शक्यते, चक्षुषा स्पर्शाद्यग्रहात्। अत एकाधिकरणेन समुदायः सम्भवतीत्यपि वक्तुं न शक्यते।

एवं द्वितीयविकल्पस्य द्वितीयविकल्प एककालत्वविशिष्टौ रूपस्पर्शौ समुदाय इत्यपि न सम्भवति। तथा हि– रूपस्पर्शयोरेककालत्वे विनिगमनाऽर्थादेकतरपक्षपातिनी युक्तिर्नास्ति। कादाचित्कमेककालत्वं स्वीकृत्य समुदायत्वं स्वीक्रियते चेद्रासभकरभयोरपि कदाचिदेककालत्वं सम्भवतीति

कारणात्तयोरपि समुदायत्वं स्यात्। यदि समुदायत्वे भेदाग्रहस्य कारणत्वं स्वीक्रियते, तथा च रासभकरभकयोर्भेदाग्रहो नास्तीति तयोः समुदायत्वं न सम्भवत्युच्यते चेदत्रापि रूपस्पर्शयोः समुदायत्वे भेदाग्रहो नास्तीति समुदायो न सम्भवति।

एवंरूपेण द्वितीयविकल्पस्य तृतीयविकल्प एककार्यत्वविशिष्टौ रूपस्पर्शौ समुदायस्तथैव चतुर्थविकल्पश्चाप्येककारणत्वविशिष्टौ रूपस्पर्शौ समुदाय इत्यपि न सम्भवतीति बोध्यम्।

एवं तृतीयविकल्पोऽर्थात्तदतिरिक्तविषयमिति विकल्पे स्वीकृते विवादो नास्ति। दर्शनस्पर्शनेन गुणातिरिक्तं वस्तु गृह्यत इति स्वीक्रियते चेद्गुणातिरिक्तं यद् वस्तु स्वीक्रियते तदेवात्मेत्यस्माभिः स्वीक्रियतेऽतोऽत्र विवादो नास्ति।

चतुर्थविकल्पो यदुच्यते वस्त्वनुरोध्याकारविषयं वेत्यर्थाद्वस्तुरहितज्ञानाकारविशेष एव चाक्षुषस्पार्शनप्रत्यक्षस्य विषय इति तदपि न सम्भवति। अत्र केनानुरोधेन वस्त्वनुरोध्याकारविषयः, विज्ञानवादमाश्रित्याथवा द्विचन्द्रादिवदर्थशून्यमित्याश्रित्य।[५०] अत्र यदि विज्ञानवादमाश्रित्य गुणातिरिक्तवस्तुनः सत्ता नास्तीत्युच्येत तर्हि गुणानां विषये पक्षपातः किमर्थम्, रूपादिगुणोऽपि वस्तु नास्तीति स्वीक्रियताम्। तेन च गुणिवद्गुणस्यापि विलोपप्रसङ्गः स्यात्।

द्वितीयपक्षविषये उच्यते– प्राप्तेरर्थक्रियास्थितेश्च न द्वितीयोऽपि। अर्थाद्वस्तुनः प्राप्तित्वात्तथार्थक्रियाकारित्वाद् द्विचन्द्रादिवदर्थशून्यमित्यपि वक्तुं न शक्यते।

एवं पञ्चमपक्षोऽर्थादलीकविषयमिति विकल्पोऽपि न सम्भवति। अर्थाच्चाक्षुषप्रत्यक्षं स्पार्शनप्रत्यक्षञ्च शशशृङ्गवदलीकमर्थादत्यन्तमसदिति तदा गुणिवद्रूपादिगुणा अलीकाः स्युः। तेन गुणिना साकं गुणस्य सत्तापि विलुप्यते। अतः पञ्चमपक्षोऽपि न सम्भवति।

एवं गुणातिरिक्तस्य गुणाश्रयभूतात्मनः सत्ताऽवश्यमङ्गीकार्या। तेन च दर्शनकाले य आत्माऽऽसीत्स एव स्पर्शनकालेऽस्तीति प्रसिद्धस्य दर्शनस्पर्शनाभ्यामेकार्थानुसन्धानं भवति। तेन च गुणगुणिनोरभेदाद् नैरात्म्यं सिद्ध्यतीति वक्तुं न शक्यते। एवंरूपेण गुणगुणिभेदभङ्गवादे आत्मनः सत्ता प्रतिस्थापिता।

एवं पूर्वपक्षिणां दर्शनस्पर्शनादिविषये पञ्चविकल्पानां खण्डनानन्तरं पुनः पूर्वपक्षिभिरुच्यते, अभेदसाधनं बाधकमित्यर्थादभेदस्य साधनमेव गुणगुणिभेदस्य बाधकमिति। अत्र गुणगुणिनोर्नियमतः सहोपलम्भोऽर्थात्समवस्थानमभेदसाधने कारणमित्युच्यते चेत्तन्न, यतो हि गुणगुणिनोः सहोपलम्भ एवासिद्धः। यत्र रोगवशादथवा दोषवशात्पीते शङ्खस्योपलब्धिर्भवति तत्र श्वेतगुणस्यानुपलब्धित्वेऽपि शङ्खस्योपलब्धिर्भवत्येव। अतो गुणगुणिनोः

सहोपलम्भ इति वक्तुमेव न शक्यते। तथा चोच्यते– 'अभेदसाधनं बाधकमिति चेत्, किं तत्। सहोपलम्भनियम इति चेन्न, समसहोपलम्भनियमस्यासिद्धेः, पीतशङ्खोपलम्भादौ श्वैत्यानुपलम्भेऽपि शङ्खोपलम्भात्'।[५१]

अत्र पुनः पूर्वपक्षिभिरुच्यते शुभ्रता शङ्खस्य व्यापिका। अर्थाद्यत्र यत्र शङ्खत्वं तत्र तत्र शुभ्रत्वम्। तेन दोषवशाद्यत्र शुभ्रत्वस्यानुपलब्धिस्तत्र शङ्खस्यापि निवृत्तिर्भवति। तदावश्यं मनसि शङ्कोत्पद्येतात्र व्याप्तिसम्बन्धः किं शुभ्रतायां शङ्खे वार्थाद्वस्तुनोर्व्याप्तिसम्बन्ध उत शुभ्रतायाः शङ्खस्य चोपलब्धौ व्याप्तिसम्बन्धो वर्तते। प्रथमपक्षे विवादो नास्ति यतो हि व्यापकस्याभावे व्याप्यस्याप्यभावो दरीदृश्यत एव। किन्तु व्यापकस्यानुपलब्धिमात्रेण व्याप्यस्याप्युपलब्धेर्निवृत्तिर्भवतीति स्वीकर्तुं न शक्यते। अन्यथा अग्नेरनुपलब्धौ(सूर्यकिरणवशात्) धूमस्तस्य चोपलब्धेरपि निवृत्तिः स्यात्, यच्च लोकविरुद्धम्। एतच्च शङ्खविषयेऽपि बोध्यं यत् शुभ्रताया अप्रतीतिमात्रेण शङ्खस्य निवृत्तिर्भवतीति नास्ति, अपितु शुभ्रताया अप्रतीतावपि शङ्खस्योपलब्धिर्भवत्येव। एतेन द्वितीयपक्षस्याप्यसिद्धत्वं भवति।

अत्र यद्युच्येत रोगदशायां श्वेतशङ्खस्य स्थाने पीत एव शङ्ख उत्पद्यते इत्यपि वक्तुं न शक्यते, पुरुषान्तरेणार्थाद्रोगविहीनस्य पुरुषस्य श्वेतशङ्खस्य प्रतीतिर्भवत्येव।

यद्यत्रासमोपलम्भनियमो गुणगुणनोरभेदे कारणमिति स्वीक्रियेत तदपि न, हेतोरनैकान्तिकत्वात्।[५२] यतो हि घटेऽभास्वररूपं तथाऽऽलोके च भास्वररूपं नियमतः उपलभ्यते किन्तु तथापि घटनिष्ठरूपमालोकनिष्ठरूपञ्च परस्परमभिन्नं नास्ति, अपितु भिन्नमेव।

अत्र च देशविच्छेदस्यापि भिन्नत्वे कारणत्वं वर्ततेऽर्थाद् घटरूपस्याश्रयो घटः, आलोकरूपस्याश्रयश्च आलोक इति। तथा च देशविच्छेदत्वादत्र भिन्नत्वं वर्तते परन्तु गुणगुणिनोर्देशाविच्छेदत्वात्तयोर्भिन्नत्वं नास्तीति यद्युच्येत तदपि न सम्भवति। यतो हि गुणस्याश्रयो द्रव्यं वर्तते, गुणिनश्चाऽऽश्रयो द्रव्यावयवी वर्तते। अत्रापि देशविच्छेदो वर्तते। अतो देशविच्छेदत्वाद्गुणगुणिनोरभेदत्वं नैव स्वीकर्तुं शक्यते। एवञ्च देहादिविषयेऽपि ज्ञातव्यं यत्, देहदेहिनो सामान्यरूपेण एकदेशत्वप्रतीतावप्यप्रकाशात्मको देहो यथा भिन्नो भवति स्वप्रकाशात्मकश्च देही तथैव भिन्न इति। एवं सुखदुःखादिगुणस्याश्रयरूपेण गुणातिरिक्तस्याऽऽत्मनः सत्ता बौद्धैरवश्यमङ्गीकार्या।

एवंरीत्या मिथिलास्थोदयनाचार्यविरचिते *आत्मतत्त्वविवेके* तृतीयपरिच्छेदे गुणगुणिभेदभङ्गवादे विस्तरतया गुणगुणिनोरभेदत्वं निराकृत्य गुणातिरिक्तस्य गुणिनोरर्थाद्देहातिरिक्तात्मनः सत्ता सुष्ठुतया प्रतिपादिता।

**अनुपलब्धिबाधकखण्डनेनात्मस्थापनम्–**

*आत्मतत्त्वविवेक*ग्रन्थे आचार्येणोदयनेन बौद्धनां स्वीकृतक्षणभङ्गत्वादिमतानां खण्डनानन्तरं बौद्धस्वीकृतानुपलम्भवादस्य खण्डनं कृतम्। अस्यानुपलम्भवादस्य वर्णनम् *आत्मतत्त्वविवेक*ग्रन्थस्य चतुर्थपरिच्छेदे दरीदृश्यते। बौद्धैरुच्यते क्षणभङ्गादिनाऽऽत्मनोऽभावेऽसिद्धत्वेऽप्यनुपलब्ध्या त्वात्मनोऽभावः सिद्ध्यत एव। शशविषाणवदात्मापि नास्ति तस्यानुपलब्धेः।

एतन्मतखण्डनाय बौद्धान्पृच्छत्युदयनाचार्यः– अनुपलब्धिरित्यत्र सर्वेषामनुपलब्धिरुतैकस्य पुरुषस्य। सर्वेषामनुपलब्धिरिति वक्तुं न शक्यते, यतो ह्यन्येषां ज्ञानाज्ञानादीनां ज्ञानमन्यैर्नाभूयते। यदि पुरुषविशेषेणैवानुपलब्धिस्स्वीक्रियेत तर्हि व्यभिचारदोषापत्तिः। अर्थाद्व्यक्तिविशेषस्यानुपलब्ध्या वस्तूनामभावं स्वीकर्तुं न शक्यते, यतो हि इन्द्रियादिदोषकारणादप्युनपलब्धिर्भवितुमर्हति। तथा चोच्यते उदयनाचार्येण– 'सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः'।[५३] अस्य समाधानार्थं बौद्धैरुच्यते दृश्यत्वे सति यस्यानुपलब्धिस्तस्याभाव इति।[५४]

उदयनाचार्येणास्य खण्डनमित्थमकारि यत्, बौद्धा आत्मनः 'दृश्यत्वम्' इति विशेषणं नाङ्गीकुर्वन्ति। अतो दृश्यत्वविशेषणमात्मनो नैव दातुं शक्नुवन्ति। यदि दृश्यत्वं स्वीकुर्युः स्वयमेव तस्यात्मनः सत्तामङ्गीकुर्वन्ति। तस्याभावः कथं

स्वीकुर्युर्बौद्धाः। यदि नैयायिकमतमनुसृत्य दृश्यत्वविशेषणमिति वदेयुस्तदपि न वक्तुं न शक्नुयुः, अनुमानस्य स्वतन्त्रसाधनत्वात्। एवञ्चात्मा यदि दर्शनयोग्यः स्यात्तस्यानुपलब्धिरिति विशेषणं नैव सम्भवति। यद्यनुपलब्धः स्यात्तर्हि तस्य दृश्यत्वं नैव सम्भवति। अर्थाद्दृश्यत्वे सत्यनुपलब्धेरिति हेतुः सर्वथाऽसिद्ध एव। वस्तुतस्त्वत्र 'आत्मा नास्ति अनुपलब्धेः' इत्यनुमाने आत्मरूपपक्षो यदि सिद्ध्येत् तर्ह्यात्मनोऽस्तित्वमपि सिद्ध्यत्येव, एवञ्च 'नास्ति' इति साध्यस्य बाधः स्यादिति यदि च न सिद्ध्येत्तर्हि पक्षासिद्धत्वादनुमानमेव न सिद्ध्यति।

**आत्मसद्भावे प्रमाणम्–**

पक्षरूपात्मनः सद्भावं प्रतिपादयितुमुदयनाचार्योऽनुपलम्भवादप्रकरणे स्वयमात्मनः सद्भावे किं प्रमाणमिति प्रश्नमुत्थाप्य वक्ति– 'प्रत्यक्षमेव तावत्, अहमिति विकल्पस्य प्राणभृन्मात्रसिद्धत्वात्'।[५५] आत्मनः सद्भावे प्रत्यक्षमेव प्रमाणं वर्तते। 'अहम्' इति सविकल्पकज्ञानं प्राणिमात्रं प्रत्यक्षरूपेण भवति, अत्र च प्रत्यक्षस्य विषयः 'आत्मा' एव। अत्राहमिति प्रतीतेः शब्दत्वाभावाद्बाधितत्वाभावाच्चावस्तुकत्वमसन्दिग्धकत्वं वेति न सिद्ध्यति।[५६] नापि लैङ्गिकीयं प्रतीतिरर्थादनुमानमपि न भवति। यतो ह्यनुमाने व्याप्यस्यानुसन्धानमावश्यकम्। परन्त्वत्र व्याप्यानुसन्धानाभावात् 'अहम्' इति प्रतीतिर्न सम्भवति। 'अहम्' इति प्रतीतिः स्मृतिरपि भवितुं नार्हति यतो ह्यनुभवं विना स्मृतिर्न सम्भवति।[५७]

स्थिरात्मनः सिद्धिरनुमानेनापि भवति। तच्च प्रतिसन्धानम्।[५८] प्रतिसन्धानमर्थात्प्रत्यभिज्ञैव तदनुमानं येन स्थिरात्मनः सिद्धिर्भवति। अर्थात्प्रतिसन्धानं यद्यपि प्रत्यक्षप्रमाणे एवान्तर्भवति तथापि तस्य प्रयोगोऽनुमानालोक एव कर्तव्यम्। यथा– 'योऽहं रूपमद्राक्षं स एवाहमधुना स्पृशामि' इत्यत्र 'अहम्' इति प्रतीतेर्विषय आत्मा एव, पूर्वकाले परकाले च 'अहम्' इति प्रतिसन्धानमर्थात्प्रत्यभिज्ञासत्त्वात्।

**आत्मनः उपादेयत्वनिरूपणम्–**

प्रमाणेनाऽऽत्मसत्तासिद्ध्यनन्तरमात्मन उपादेयत्वमपि निरूपयति। वस्तुतः केषाञ्चिन्मतं प्रमाणेनात्मसिद्धेऽप्यात्मा हेयोऽर्थात्त्याज्यः, यतो ह्यात्मदर्शी एव तदुपकारिणि रज्यते, तदपकारिणञ्च द्वेष्टि, य आत्मज्ञानी न भवति स तस्योपकारिणमपि न जानीयात्, तस्यापकारिणमपि न जानीयात्तेषु रागद्वेषौ न स्याताम्। अतो विषविद्यावता यथा विषेऽपि नैर्विष्यभावनायां चिकित्सा विधीयते तद्वन्मुमुक्षुभिरपि नैरात्म्यमेव भावनीयमिति।

पूर्वपक्षिणामाशयस्य खण्डनार्थमुदयनाचार्येणोच्यते– न अनात्मदर्शिनो मुमुक्षत्वव्याघातादर्थात्पूर्वपक्षिणां मतं यदुक्तं नैरात्म्येन भाव्यमिति तन्न समीचीनम्, यतो ह्यात्मानं विनाऽऽत्मदर्शित्वमेव न स्यात्। आत्मदर्शित्वं न सिद्ध्यति चेन्मुमुक्षत्वमपि न सिद्ध्येदर्थाद्यो दुःखसंबलितात्मानं जानीयात्स एव मोक्षाभिलाषी भवेत्। न ह्यात्मानमप्रतिसन्धाय कश्चिद्दुःखं त्यक्तुमिच्छेत्सुखं वा

प्राप्तुम्। स्वर्गापवर्गपदे सुखदुःखाभावापरे इति मत्वा मया स्वर्गापवर्गफलभागिना भाव्यमिति इच्छा तावता तिष्ठति यावता सुखप्राप्तौ दुःखत्यागे प्रयत्नोऽवतिष्ठति। इच्छाया अनुवृत्तिर्न भवति चेत्प्रयत्नस्यापि निवृत्तिर्भवति। प्रयत्नाभावे फलाभावः। अत एतेन सिद्ध्यत्यात्मतत्त्वज्ञानमवश्यमनिवार्यम्। एवञ्च नैरात्म्यबुद्धिर्नास्तिक्यवादं द्रढयेत्, येन यावज्जीवेत्सुखं जीवेदित्यादिप्रलापा अथवा विषयतृष्णा वर्धयेयुः, अतो नैरात्म्यबुद्धिर्न सम्पादनीया।

एवञ्च येषामाशय आसीदात्मदर्शी हि तदुपकारिणि रज्यते तदपरकारिणं द्वेष्टि तदेव समीचीनमर्थाद्यो मोक्षमुपकारित्वेन स्वीकरोति स तत्र मोक्षहेतुं प्रति रागवान् भवति, तच्च गृह्णात्येवं मोक्षस्य यद्बाधकं तत्र च द्वेषबुद्धिं स्थापयति। येन स्वाभीष्टस्य मोक्षस्य सिद्धिर्भवेत्।

एवं यो भोगमुपकारत्वेन स्वीकरोति सोऽपि तथैव करोत्यर्थाद्भोगानुकूले रज्यते भोगबाधकानां परिहारं करोति। किन्तु मन्दबुद्धयोऽनात्मदर्शिनो वाऽनुकूलविषयमेव प्रतिकूलत्वेन स्वीकुर्वन्ति, प्रतिकूलञ्चानुकूलत्वेन चिन्तयन्ति। अत आत्मदर्शित्वमवश्यं भाव्यम्। तेन चात्माप्यङ्गीकर्तव्यः।

पूर्वपक्षिभिः पुनरत्र शङ्क्यते दुःखकारणत्वादीन्द्रियादिवदसावात्मा त्याज्यः। अस्य शङ्कायाः समाधानमित्थं दीयते उदयनाचार्येण यत्, लोके सोपाधेरात्मनो दुःखसम्पृक्तत्वं दृश्यते, स एवात्मा त्याज्यश्चेत्समीचीनम्। परन्तु निरुपाधिरात्मा त्याज्य इति चेन्न समीचीनम्। यतो हि निरुपाधिरात्मा

निष्प्रयोजनत्वाद् दुःखासम्पृक्तत्वाच्च कदापि न त्याज्यः। अपि चात्रात्मनस्त्यागो नाम विनाश इति स्वीकर्तुं न शक्यते आत्मनो नित्यत्वात्। विप्रयोगोऽप्यस्यासम्भवो व्यापकत्वात्। अप्रतीतिरेवात्मनस्त्याग इत्यपि न, यतो हि यथा यथा तदर्थं यत्नः, तथा तथा प्रतिपत्तेः।

अतो दुःखकारणात्सोपाधेरात्मनस्त्यागः समीचीनम्। परन्तु निरुपाधेरात्मनो निष्प्रयोजनत्वान्न त्याज्यः।

अत्र मन्दबुद्धीनां प्रश्नोऽवश्यं स्याद्यत्, अस्तु आत्मा न त्याज्यः परन्त्वात्मा किमर्थं ग्राह्य इति। अस्योत्तरमा*त्मतत्त्वविवेके* दृश्यते यद् न्यायानुसारेण मननेन निदिध्यासनेन वा शरीरादिभिन्नात्मतत्त्वसाक्षात्कारेणैव मोक्षसिद्धिर्भवति। अतस्तदर्थमात्मोपादेयः। अत्रात्मन उपादानस्याशयो विवेकोऽर्थाद्भिन्नरूपेण ज्ञानम्। अनात्मभूतशरीरेन्द्रियविषयेभ्यो भिन्नरूपेणात्मनो ज्ञानमेवात्मन उपादेयत्वम्।

अत्र यद्युच्येत शरीरादिभ्यो भिन्नरूपेणात्मज्ञानं सम्पादनीयमित्यत्र प्रमाणं किमिति, तर्हि न्यायः, आम्नायोऽर्थात् श्रुतिरेवात्र प्रमाणम्। यतो हि शरीरमेव पूर्णरूपेणानात्मवस्त्विवति मत्वाऽऽत्मानं मन्यमानः पुरुषः शरीरविषयिणीं वितृष्णां सम्पादयति, शरीरप्रतिकूलविषयं प्रति द्वेष्टि। एवं निरुपाधिविशिष्टात्मवतः पुरुषस्य पुत्रवित्तादौ लोभो न भवति। अतः शरीरादिभिन्नत्वेनात्मज्ञानमपेक्षते। तथा च निगद्यते– 'शरीरमेव हि तावन्मूर्धाभिषिक्तमनात्मानं मन्यमानस्य तदुपादाय

तदुनकूलत्रैलोक्यविषया तृष्णा विजृम्भते, तथा तत्प्रतिकूलविषयो द्वेषः। न चैतत्केवलात्मदर्शिनः सम्भवति, निरूपाधेः पुत्रवित्तलोभाभावात्, तैरनुपकार्यत्वात्..........तत्प्रवृत्तेः'।[५९]

**मोक्षस्वरूपम्**–

चतुर्विधपुरुषार्थेष्वन्यतमपरमपुरुषार्थो मोक्ष एव। परन्त्वयं परमपुरुषार्थो मोक्षः कः पदार्थस्तदवश्यं ज्ञातव्यम्। वस्तुतः सर्वविद्यानामधिविद्यं भवति मोक्षः। तत्र बहूनां दर्शनानां मतवैविद्ध्ये सत्यपि सर्वैः काम्यः परमपुरुषार्थो मोक्ष इत्यत्र नास्ति कश्चन संशयः। अस्य मोक्षस्य स्वरूपविचारावसरे उच्यते– 'कः पुनरयं मोक्षः आत्यन्तिकी दुःखनिवृत्तिनारत्मनः'।[६०]

अर्थाद्दुःखस्यात्यन्तिकी निवृत्तिर्भवति मोक्षः। दुःखस्यात्यन्ताभावो दुःखस्यात्यन्तिकी निवृत्तिर्भवति। दुःखस्य सकलकारणानां विनाशादेव दुःखस्यात्यन्ताभावः सम्पद्यते। *न्यायसूत्रे* च उच्यते– 'प्रमाणप्रमेय-संशयप्रयोजन..........तत्त्वज्ञानान्निःश्रेयसाधिगमः'।[६१]

एवंरूपेण पूर्वपक्षिभिरुत्थापितशंकानां विस्तरेणाऽऽलोचनं वर्तते *आत्मतत्त्वविवेके* अत्र विस्तरभयान्न तत्र प्रदर्श्यते इति शम्।

**तथ्यसूत्राणि**–

१. *सां. तत्त्व.,* सम्पा. नारायणचन्द्रगोस्वामी, पृ.– ८।

२. *न्या.* द.(प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– १९।

३. दीधितिः, *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २५।

४. तत्रैव।

५. 'न प्रतिबन्धासिद्धेः'।– तदेव, पृ.– २२।

६. *न्या. वि.*, सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– ११५।

७. *सर्व. बौ. ओ दर्श.,* सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– १३।

८. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २२।

९. *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ९१।

१०. कल्पलता, *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २३।

११. तदेव, पृ.– ३४।

१२. दीधितिः, तदेव, पृ.– ३६।

१३. 'प्रसङ्गविपर्ययाभ्यां तत्सिद्धिरिति'।– तदेव, पृ.– ३४।

१४. तत्रैव।

१५. तदेव, पृ.– ४६।

१६. 'तद्धि तादात्म्यं वा, निरुपाख्यत्वं वा, तत्कार्यत्वं वा, तद्व्यापकत्वं वा अभावत्वमेव वेति'।– तदेव, पृ.– २२३।

१७. तत्रैव।

१८. तदेव, पृ.– २३१।

१९. तदेव, पृ.– २३५।

२०. 'तस्यापि कार्यम् इति पक्षे विरोधात्, तस्यैव कार्यं इत्यसिद्धेः'।– तत्रैव।

२१. तदेव, पृ.– २५८।

२२. तत्रैव।

२३. तदेव, पृ.– २६०।

२४. तत्रैव।

२५. 'विज्ञानवादिनि जागरूके बाह्यमेव नास्ति, कुत आत्मेति चेत्'।– तदेव, पृ.– ४२९।

२६. 'किं ते ग्राह्यग्राहकभागयोः परमार्थसतोरेवाभेदो विवक्षितः, उताहोऽभिन्नजातीयत्वम्, अथ ग्राह्यांशस्यालीकत्वमिति'।– तत्रैव।

२७. 'तत्र प्रथमे साध्ये यः कश्चिद्धेतुरुपादीयते सहोपलम्भनियमो वा, ग्राह्यत्वं वा प्रकाशमानत्वं वा स व्यक्तमाभासः'।– तदेव, पृ.– ४३१।

२८. 'अत्राभेदं साध्ये प्रथमो हेतुरनैकान्तिकः...........दूषणे सत्येव दूषणान्तरमाह'।– प्रकाशिका, तदेव, पृ.– ४३२।

२९. 'कालात्ययापदेशादनैकान्तिकत्वाद्वा अङ्गुलीनिर्देश्यग्राह्यात्मकताया ज्ञानस्य बाधितत्वात् विरुद्धधर्म्मसंसर्गप्रतिहतत्वाद्वेत्यर्थः'।– कल्पलता, तदेव, पृ.– ४३१।

३०. *आत्म. वि.*, सम्पा. केदारनाथत्रिपाठी, पृ.– २०१।

३१. तत्रैव।

३२. तदेव, पृ.– २०३।

३३. 'तदभावे सामग्रीसामर्थ्यस्याप्याश्रयितुमशक्यत्वात्'।– तत्रैव।

३४. 'विचारसिद्धे हि वस्तुनि कारणचिन्तनावसरो न त्वविवेचित इति'।– तत्रैव।

३५. 'किं ग्राह्यलक्षणा निवर्तव्यतया प्रकाशमानत्वममीषां निवर्तते? सत्त्वं वा?– तदेव, पृ.– २०३-२०४।

३६. तत्रैव।

३७. 'न द्वितीयः, तदा हि तल्लक्षणानुपपत्तिः सत्त्वं निवर्तयेत्, यद्यसत्त्वे लक्षणमुपपद्येत। उभयथाप्यनुपपत्तौ कोऽनुरागाऽसत्त्वे। तदेव....... तुल्यम्'।– तत्रैव।

३८. 'अस्तु तर्हि सर्वथा विचारासहत्वमेव विश्वस्येति'।– *आत्म. वि.* (तृ. खण्डः), सम्पा. दीननाथत्रिपाठी, पृ.– ८३।

३९. 'तत्किमिदानीं तत्त्वोपप्लव एव काष्ठा, शून्यता वा'।– तत्रैव।

४०. तत्रैव।

४१. तदेव, पृ.– ९१।

४२. 'सा हि यद्यसिद्धा, कथं तदवशेषमपि विश्वमभिधीयते, वाङ्मात्रस्य सर्वत्र सुलभत्वात्'।– तत्रैव।

४३. तदेव, पृ.– ९१-९२।

४४. तदेव, पृ.– ९९।

४५. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ७१०।

४६. तत्रैव।

४७. तत्रैव।

४८. तदेव, पृ.– ७१२।

४९. ‘स हि एकदेशतया वा एककालतया वा एककार्यतया वा एककारणतया वेति’।– तदेव, पृ.– ७१४।

५०. ‘नापि चतुर्थः, स हि विज्ञाननयमाश्रित्य वा स्यात्। द्विचन्द्रादिवद् विसंवादाद् वा’।– तदेव, पृ.– ७१९।

५१. तदेव, पृ.– ७२२।

५२. ‘नाप्यसम एव सहोपल्म्भनियमो हेतुः, अनैकान्तात्’।– तदेव, पृ.– ७२५।

५३. तदेव, पृ.– ७३९।

५४. ‘दृश्यत्वविशेषणान्नैवमिति’।– तत्रैव।

५५. तदेव, पृ.– ७४३।

५६. ‘न चायमवस्तुकः सन्दिग्धवस्तुको वा, अशाब्दत्वादप्रतिक्षेपाच्च’।– तत्रैव।

५७. ‘न च लैङ्गिकः, अननुसंहितलिङ्गस्यापि स्वप्रत्ययात्। न च स्मृतिरियम्, अननुभूते तदनुपपत्तेः’।– तत्रैव।

५८. ‘कः पुनरत्र न्यायः? प्रतिसन्धानम्।– तदेव, पृ.– ७५२।

५९. तदेव, पृ.– ८१९।

६०. तदेव, पृ.– ९१५।

६१. *न्या.* द.(प्र. खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.– १९।

# चतुर्थोऽध्यायः

## *न्यायकुसुमाञ्जलि*ग्रन्थे आत्मविषयकं पर्यालोचनम्

मिथिलास्थितोदयनाचार्यविरचितेषु ग्रन्थराजिष्वीश्वरमननात्मकग्रन्थविशेषो *न्यायकुसुमाञ्जलि*रिति। *न्यायकुसुमाञ्जलि*ग्रन्थस्य नामकरणेनैव ज्ञाप्यते यत्, न्यायरूपकुसुमस्याञ्जलिरेव *न्यायकुसुमाञ्जलि*रिति। न्यायरूपकुसुमस्याञ्जलिरीश्वरप्रतिपादनमाध्यमेन सर्वदा राराज्यते। ग्रन्थपर्यालोचनेन ज्ञायते पञ्चस्तवकात्मकग्रन्थेऽस्मिन्नीश्वरविषयकपञ्चविप्रतिपत्तिवाक्यानि विलसन्ति। एतेषु गूढार्थो निहितोऽस्ति।

**अदृष्टाधिष्ठातृरूपेणेश्वरसिद्धिः–**

*न्यायकुसुमाञ्जलि*ग्रन्थे प्रथमस्तवके प्रथमविप्रतिपत्तिवाक्यन्तावदलौकिकस्य परलोकसाधनमस्ति न वेति। अस्यैव विचारस्यात्र प्रतिपादनमकरोदुदयनाचार्यः। तत्र भावकोटिरूपेण नैयायिकानामभावकोटिरूपेण चार्वाकाणाञ्च प्राधान्यं वर्तते। अस्य प्रधानोद्देश्यं पूर्वपक्षमतखण्डनपुरःसरं शुभाशुभकर्मणि फलदातृरूपेणादृष्टसिद्धिः। कार्यसिद्ध्यर्थमवश्यं चैतन्यस्वरूपकर्तुः प्रयोजनमस्ति। यथा च वृक्षछेदनरूपकार्यसिद्ध्यर्थं कस्यचन चैतन्यवतश्छेदकस्य प्रयोजनं भवति। तद्वदचेतनाऽदृष्टकार्यपरिचालनाय कस्यचित्सचेतनस्य कर्तुरपेक्षावश्यं वर्तते। एवञ्चादृष्टाधिष्ठातृरूपेणै-

वेश्वरसिद्धिर्भवति। नास्तिकाश्चार्वाकाः, तन्मते कार्यकारणोर्नियतसम्बन्ध-रहितत्वादलौकिककारणस्य प्रसङ्ग एव नास्ति। अतोऽलौकिककारण-रूपेणादृष्टस्वीकारः प्रसङ्गातीतो वर्तते। किञ्चादृष्टमेव न सिद्ध्यति चेत्तन्नियन्त्रकस्येश्वरस्य कथं सिद्धिरिति। ईश्वरसिद्धिरूपलक्ष्यसम्पादनो-द्देश्येनोदयनाचार्यः कार्यकारणरूपसमस्योत्थानपूर्वकं खण्डनञ्चकार। किञ्च चार्वाककर्तृकोत्थापितसंशयानामाकस्मिकतावादः, एककारणतावादश्चेत्यादीनां खण्डनपूर्वकमदृष्टवादस्थापनमाध्यमेनोदयनाचार्य ईश्वरतत्त्वमस्थापयत्।

*न्यायकुसुमाञ्जलि*ग्रन्थस्थितप्रथमस्तवकस्य सुचारुतया पर्यालोचनेन ज्ञायते यत्, उदयनाचार्येणैकस्यामेव कारिकायां प्रथमस्तवकस्थितमूल-सिद्धान्तस्योपस्थापनं कृतम्। तथा चोच्यते चतुर्थकारिकायाम्–

'सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः'॥[१]

नैयायिकस्वीकृतप्रतिज्ञावाक्यं भवति– अलौकिकपरलोकसाधनमस्तीति। सामान्यकारणमतिरिच्य विशेषकारणं नातिवर्तते, तस्मात्कारणात्सापेक्षादेः सामान्यसाधनस्योल्लेखोऽकार्युदयनाचार्येण। तथा चालौकिककारणरूप-विशेषकारणसम्पादनहेतुरूपेण विश्ववृत्तितादीनामुल्लेखः कृतः। तच्चाऽधो यथासाध्यं वितन्वते।

**अ) सापेक्षत्वात्–**

प्रथमो हेतुस्तावत् 'सापेक्षत्वात्' इति। कस्यापि वस्तुन उत्पत्तेः प्राक्कारणस्यापेक्षा सदैव वर्तते। कार्यं सर्वदा कारणसापेक्षम्। 'सापेक्षत्वात्' इति पदघटितसापेक्षशब्दस्यार्थो भवति 'कादाचित्कः'। कदाचित्कस्य भावः कादाचित्कत्वम्। कादाचित्को नाम यत्कदाचिद्विद्यते, कदाचिच्च न विद्यते। प्रसङ्गेऽस्मिन् प्रकाशटीकायां दृश्यते– 'सापेक्षत्वात्= सहापेक्षया वर्त्तमानत्वात् कादाचित्कत्वादित्यर्थः। तच्च किञ्चित्कालासम्बन्धित्वे सति किञ्चित्का-लसम्बन्धरूपम्'।[२] 'ध्वंसाप्रतियोगित्वं नित्यत्वम्'[३]– इत्यनेन नित्यवस्तु कादाचित्कं भवितुं नार्हति। यतो हि नित्यवस्तुनस्सत्ता सर्वदैव भवति, यथा– आकाशम्। एवमलीकवस्त्वपि कादाचित्कं भवितुं नार्हति सर्वदा तस्य सत्ताभावात्, यथा– आकाशकुसुमम्। अर्थात्किञ्चित्कालावृत्तित्वे सति किञ्चित्कालवृत्तित्वं कादाचित्कत्वम्। 'ध्वंसप्रतियोगित्वमनित्यत्वम्'[४]– इत्यनेनानित्यमर्थात्कार्यवस्तु केवलं कालविशेषे विद्यते, कालविशेषे च न विद्यते इति। अतः कार्यवस्तुमात्रं कादाचित्कत्वम्। कादाचित्कत्वात्कार्यं सर्वदा सहेतुकम्। कार्यस्य यदि कस्यापि वस्तुनोऽपेक्षा न स्यात्तदा कार्यं सदा विद्यमानं स्यान्नोचेदविद्यमानं स्यात्। अस्मिन् सन्दर्भे हरिदासीटीकायामुच्यते– 'कार्यं सहेतुकं कादाचित्कत्वाद्भोजनजन्यतृप्तिवत्'।[५] अर्थात् कादाचित्कत्वात् कार्यं सहेतुकम्। भोजनजन्यतृप्तिः कादाचित्का भवति। यतो हि भोजनजन्यतृप्तिरस्ति

चेदपि परिपाकवशात् पुनः क्षुधापि भवति। अर्थात्तृप्तिर्यथा कादाचित्का तथाऽपरपक्षे सहेतुका भवति। एवमेव कार्यमपि कादाचित्कत्वात्सहेतुकम्। यत्र यत्र कादाचित्कत्वं तत्र तत्र सहेतुकत्वमिति व्याप्तिनिश्चयात्कादाचित्कत्वहेतुना कार्यस्य सहेतुकत्वसिद्धिर्भवति। एवं कार्यस्य कारणत्वसिद्धेश्चार्वाको-त्थापितापत्तेर्निरसनं भवति। किञ्च सर्गादिरूपकार्यस्य कारणमदृष्टसिद्धिरपि भवति। एवञ्चादृष्टाधिष्ठातृरूपेणेश्वरस्यापि सिद्धिर्भवति।

**आ) अनादित्वात्**–

तत्र द्वितीयहेतुर्भवति 'अनादित्वात्' इति। कार्यं कादाचित्कत्व-विशिष्टत्वात् सहेतुकमिति स्वीकृत्य पूर्वपक्षिभिः पुनः शङ्कोत्थाप्यते यत्, कार्यवत्कारणस्यापि कादाचित्कत्वापत्तिरिति। यतो हि कारणस्य कादाचित्क-त्वाभावे नित्यत्वापत्तिरिति। कारणनित्यत्वे सति कारणाधीनस्थकार्यमपि नित्यं स्यात् किन्त्वेतद्यथार्थं नास्तीति पूर्वसिद्धमेव। किञ्च कारणं कादाचित्कत्वात् सहेतुकमपि स्यात्। अर्थात्पटादिकार्यस्य कारणं तन्त्वाद्यपि कादाचित्क-त्वात्तेषामपि कारणं स्वीकर्तव्यम्। किञ्च तत्कारणमपि कादाचित्कविशिष्टं स्यादित्येवं कारणस्य कारणस्वीकारेऽनवस्थादोष आपतेदिति।

समाधानावसरेऽस्योदयनाचार्येणोच्यते– 'अनादित्वात्' इति। 'अनादिः' इति पदस्य व्युत्पत्तिः, न आदिः=अनादिरिति। नित्यत्वमत्र द्विविधरूपेण ग्रहीतुं

शक्यते यथा– व्यक्तिगतरूपेण प्रवाहगतरूपेण च। यस्यादिरुत्पत्तिर्वा नास्ति तद्व्यक्तिगतनित्यत्वम्। यथा– आकाशम्। इदं प्राथम्यमित्यस्याभावात् प्रवाहोऽप्यनादिः। अनवस्थादोषोऽस्ति चेदपि सर्वदा दोषग्रस्तो न भवति। कार्यकारणप्रवाहोऽप्यनादिर्भवति। यत्रानवस्थादोषत्वात् कार्यकारणादिज्ञानमेव न भवति तत्रैवानवस्था दोषविशिष्टा। वस्तुतस्त्वत्र पूर्वपक्षोत्थापितहेतोरनवस्था न प्रमाणसिद्धा अर्थादप्रामाणिकी वर्तते। बीजादङ्कुरः, अङ्कुराद्बीजमित्यादौ बीजाङ्कुरयोरनवस्था प्रत्यक्षप्रमाणसिद्धा अर्थात्प्रामाणिकी, अतोऽत्राऽनवस्था न दोषग्रस्ता भवति। बोधिनीकारो वरदराजोऽवोचत्– 'न हि कारणस्य सदातनत्वम्, तस्याप्यपेक्षणीयान्तरसम्भवात्, न चानवस्था, कार्यकारण-प्रवाहस्यानादित्वादिति'।[६] किञ्च प्रकाशकारस्य मतमप्यस्मिन् विषये परिस्फुटितं वर्तते यथा– 'प्रामाणिकी चेयमनवस्था बीजाङ्कुरवन्न दोषाय'।[७]

**इ) वैचित्र्यात्**–

जागतिकवस्तूनां वैचित्र्यता सर्वदैव प्रत्यक्षसिद्धा। परन्तु संशयोऽत्र भवति यत्, विचित्रकार्यसमूहस्योत्पत्तिरेकस्मात्कारणाद्भवत्युत विजातीयकारणाद्भवति। यदि च ब्रह्म एव जगतः कारणं तर्हि ब्रह्मैव विचित्रकार्याणां कारणमस्तु–'ननु ब्रह्मैव कारणमस्तु'।[८] फलस्वरूपं विचित्रकार्यसमूहस्य विविधकारणानीति स्वीकारस्य प्रयोजनमेव न स्यात्। अथवा सत्त्वरजस्तमोगुणसाम्य-प्रकृतिर्जगद्वैचित्र्यस्य कारणमस्तु। प्रथमापत्तिर्वेदान्तसमर्थिता, द्वितीयापत्तिश्च

सांख्यसमर्थिता। एवं जगद्वैचित्र्यस्यैककारणतासिद्धेऽनेककारणता न सिद्ध्यति। तेन 'ब्रह्म' 'प्रकृतिः' वेति तद्व्यतिरिक्तं परलोकस्यालौकिककारणमपि(ईश्वरः) न सिद्ध्यति।

पूर्वपक्षिभिरेवं शङ्कोत्थापिते सत्युदयनाचार्येण स्वकृत*न्याय-कुसुमाञ्जलि*ग्रन्थे युक्तिपूर्वकं खण्डनं विधीयते। तत्र दर्शितं यौक्तिकव्याख्याभावादुत्थापितापत्तिरपि गृहीता न भवति। तत्खण्डनप्रकारं यथा– विचित्रकारणे सति विचित्रकार्यमिति प्रत्यक्षप्रमाणसिद्धम्। कारिकानिर्दिष्टात् 'वैचित्र्यात्' इति पदेन कार्यवैचित्र्यात्कारणवैचित्र्यमिति ज्ञाप्यते। पटकार्यं घटकारणविजातीयकारणजन्यं घटकार्यविजातीयकार्यत्वादर्थात् पटरूपकार्यं घटस्य यत्कारणं तद्भिन्नकारणजन्यम्, यतो घटकार्यभिन्नकार्यत्वं वस्त्रे विद्यमानमस्ति। अत एव निखिलप्रकृतिविशिष्टकार्यं विजातीयकारणादुत्पद्यत इति स्वीकर्तव्यमवश्यम्।

**घ) विश्ववृत्तितः**–

पूर्वपक्षिभिः पुनराक्षिप्यते यत्, ज्योतिष्टोमाग्निष्टोमादिदृष्टयागादिकर्मणो विद्यमानत्वाद् यागादिकारणादेव कार्यसिद्धिः स्यात्, अदृष्टकल्पना व्यर्थेति।

समाधानरूपेणोदयनाचार्येण चतुर्थहेतुरूपेण कारिकायामवोचि 'विश्ववृत्तितः' इति। परलोकार्थिनो महाजनाः स्वर्गादिसुखलाभाय यागादिकर्मणि

रता भवन्ति। अर्थात्स्वर्गादिलाभो यागादिक्रियाविशेषत्वादवश्यं क्षणस्थायी। क्षणिकत्वाद् यागादिकर्म कदापि कालान्तरीयस्वर्गादिफलस्य कारणं भवितुं नार्हति। 'स्वर्गकामो यजेत'– इत्यनेन श्रुतिवाक्येनावश्यं स्वीकर्तव्यं स्वर्गादिकर्मविनाशोत्तरावान्तरव्यापार उत्पद्यते येन कालान्तरीयस्वर्गादिफलं जन्यते। अतो यागादिकर्म स्वर्गस्याव्यवहितपूर्वं न भवति चेदपि स्वजन्यव्यापारवत्तासम्बन्धेन स्वर्गादिफलस्य कारणं भवति। ग्रन्थकारेण प्रसङ्गेऽस्मिन्नुच्यते–

'चिरध्वस्तं फलायालं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि'॥[१]

संसारेऽस्मिन्नदृष्टकारणादेव सुखी, दुःखी, धनी, दरिद्रश्चेत्यादिकार्यवैचित्र्यं दरीदृश्यते। एवञ्च संसारेऽस्मिन्नेतेषां कार्यवैचित्र्याणां लौकिककारणं न दृश्यते, अतो धर्माधर्मरूपादृष्टकारणमत्र नियामकमिति स्वीकर्तव्यम्।

**ङ) प्रत्यात्मनियमात्**–

धर्माधर्मरूपादृष्टकारणस्वीकारानन्तरं पुनरपि पूर्वपक्षिभिः शङ्कोत्थाप्यते यत्, यागादिसृष्टादृष्टस्यावस्थानं कुत्र? तत् किमात्मस्थितमुत भोग्यवस्तुस्थितं वर्तते। प्रथमं तावन्नैयायिकानामिष्टम्। द्वितीयञ्च चार्वाकसम्मतमिति।

समाधानावसरे न्याययुक्तिमवलम्ब्योदयनाचार्येण चोच्यते चतुर्थकारिकायां यथा– 'प्रत्यात्मनियमात्' इति। अर्थाद् भोगः प्रत्यगात्मनि व्यवस्थितो वर्तते। किञ्च यदि तस्य स्थितिर्भोग्यवस्तुनि स्यात्तदा सर्वेषां पुरस्तात्समान-प्रतीतिस्स्यात्। परन्त्वेकमेव वस्त्वेकस्य पार्श्वे यथेष्टदायक-न्तथैवापरस्य पार्श्वेऽनिष्टदायकमिति दरीदृश्यत एव। एवं वैषम्यपरिलक्षितत्वाद् भोगः प्रत्यगात्मनिष्ठगुणाधीनो वर्तते। किञ्चात्मनिष्ठगुणोऽयमदृष्टं भवत्यवश्यम्। अदृष्टरूपकारणं भोगरूपकार्यमेकस्मिन्नेवाधिकरणे विद्यमानत्वादुभयोः सामानाधिकरण्यसम्बन्धो विद्यत इति। अतो भोगाधिकरणेऽदृष्टसिद्धिरित्यवश्यं स्वीकर्तव्यम्।

एवंरूपेण पञ्चहेतुभिरुदयनाचार्येण स्वग्रन्थेऽदृष्टस्थापनेन चेतनेश्वरस्य स्थापनं दर्शितम्।

**चार्वाकसम्मतदेहात्मवादखण्डनमात्मस्थापनञ्च**–

भारतीयदर्शनैतिह्यं परिलक्ष्यते चेज्ज्ञायते, सर्वेषु दर्शनेषु देहातिरिक्तात्मनोऽस्तित्वं स्वीक्रियत एव। किन्तु चार्वाका देहातिरिक्तात्मनः सत्तां नाङ्गीकुर्वन्ति। देहावस्थितात्मा देहस्यैव धर्मः। अर्थाद् देह एवाऽऽत्मेति। आत्मविषयकचार्वाकसम्मतवादोऽयम् 'देहात्मवादः' नाम्नापि प्रख्यातः। क्षित्यप्तेजोवायव इति चतुर्भूतानां संघातेन देहे चैतन्यमाविर्भवति।

चैतन्यमेवात्मेति। चार्वाकमते प्रत्यक्षमेकमेव प्रमाणम्। देहातिरिक्तात्मा प्रत्यक्षगोचरीभूताभावाद्देहातिरिक्तात्मा स्वीकृतो नास्ति। अत एवाऽतीन्द्रिय-परलोकाभावाददृष्टमपि स्वीकर्तुं न शक्यते। एवञ्चादृष्टस्यासिद्धत्वात्तन्नि-यामकेश्वरस्याप्यसिद्धिरिति।

चार्वाकसम्मतदेहात्मवादस्य दृढतयोदयनाचार्येण खण्डनमकारि। उदयनाचार्येण चोच्यते–

'नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्।
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे'॥[१०]

अयमत्राशयो विद्यत एकव्यक्तिकृतानुभवीयविषयस्मरणमपरः कश्चन कर्तुं न शक्नोति। तथैव चार्वाकसम्मतदेहात्मवादः स्वीक्रियते चेत्, बाल्ययौवनशरीरयोर्भेदवशाद् बाल्यशरीरेऽनुभूतविषयो यौवनशरीरे नैवानुभूयेत। किन्तु बाल्येऽनुभूतविषयस्य यौवनेऽपि स्मरणं भवति। किञ्च हरिदासीटीकायामुच्यते– 'न च कारणेनानुभूतस्य कार्येण स्मरणं स्यादिति वाच्यम्। वासनासंक्रमाभावात्। अन्यथा मात्रानुभूतस्य गर्भस्थेन स्मरणापत्तेः'।[११]

चार्वाकाः पुनरप्यस्मिन् विषये आपत्तिं जनयन्ति यत्, चैतन्यं शरीरमित्यनुक्त्वा परमाणुधर्म इत्युच्यते चेत् स्मरणे बाधा न भवति। यतो हि बाल्यस्थितपरमाणुर्यौवनदशायामपि तिष्ठतीति। एवं स्वीकारे दोषद्वयमागच्छेत्। प्रथमदोषस्तावत् परमाणोरतीन्द्रियत्वाच्चैतन्यन्तज्जन्यं स्मरणमपि परमाणुधर्म-

त्वादतीन्द्रियं स्यात्। अत एव मनसा स्मरणं न भवति। द्वितीयदोषश्च करचरणादयो भवन्ति शरीरस्योपादानानि। दुर्योगवशात्करचरणादयो देहाद्विच्छिद्यन्ते चेदपि शरीरं विद्यते। करचरणादिस्थितपरमाणवोऽपि शरीराद्विच्छिद्यन्ते। छिन्नहस्तस्थितपरमाणुगृहीतविषयस्य खण्डशरीरेण स्मरणं भवितुं नार्हति। अतश्चैतन्यं शरीरस्य परमाणोर्वा धर्म इति वक्तुं न शक्यते। अतश्चार्वाकसम्मत-भूतचैतन्यवादस्याऽयौक्तिकत्वाद् देहातिरिक्तभिन्नपदार्थरूपेणाऽऽत्मावश्यमेव स्वीकर्तव्यः। एवंरूपेण देहात्मवादखण्डनेन देहातिरिक्तात्मस्थापनं कृतमुदयना-चार्येण।

**सांख्यस्वीकृतैककारणवादखण्डनेनात्मस्थापनम्**–

ईश्वरसत्ताप्रतिष्ठार्थमुदयनाचार्यः केवलं बौद्धचार्वाकाणां खण्डनञ्चकारेति तन्नास्ति, अपि तु निरीश्वरवादिनां सांख्यानामपि खण्डनञ्चकार। सांख्यदर्शनं प्रधानतो द्वैतवादी। द्वैततत्त्वं नाम प्रकृतिपुरुषयोस्समन्वयः। पुरुषो भवति नित्य-बुद्ध-मुक्त-चैतन्यस्वरूप-अपरिणामीति। अपरपक्षे प्रकृतिः सत्त्वरजस्तमोगुणानां साम्यावस्था। प्रकृतिर्जगत उपादानकारणम्। किञ्च सत्त्वादिगुणानां साम्येन जगत उत्पत्तिर्नास्ति। प्रकृतितो महदादिक्रमेण जगत उत्पत्तिर्भवति। प्रकृतेः प्रथमपरिणामो महद्बुद्धिर्वा, तच्च सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मप्रभृति-गुणविशिष्टम्। आत्मन्युत्पद्यते केवलमात्रं भोगः। बुद्धेरचेतनत्वेऽपि स कर्ता भवत्येव। पुरुषस्तु प्रकृतिरपि न भवति, विकृतिरपि न भवति, पुनश्चेतनत्वेऽपि

कर्ता भवितुं नार्हति। सांख्यसम्मतस्यास्य दृढतया समालोचनापूर्वकं खण्डनं विहितम्। किमप्यचेतनं वस्तु कर्ता भवितुं नार्हति। कर्तावश्यं चेतनो भवेत्। समाधानत्वेन हरिदासीटीकायाञ्चोच्यते– 'चेतनोऽहङ्करोमि'[१२] इत्यनुभवेनाचेतनबुद्धेः कर्तृत्वं बाध्यते। सांख्यसमर्थितयुक्तेः खण्डनाय युक्तिन्दर्शयत्युदयनाचार्यो यथा–

'कर्तृधर्मानियन्तारश्चेतिता च स एव नः।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः'॥[१३]

कृतिमान् कर्ता। स चावश्यं चैतन्यविशिष्टस्स्यात्। कृतिचेतनयोः सामानाधिकरण्यं दृश्यते। सांख्यसम्मतयुक्त्यनुसारेणापवर्गस्य तथा संसारस्य व्याख्या भवितुमेव नार्हति। सांख्यसम्मतबुद्धिर्यदि कर्ता स्यात्तर्हि प्रश्नोऽवश्यमागच्छेद्बुद्धिर्नित्याऽनित्या वेति। बुद्धिर्यदि नित्या स्यात्तर्ह्यात्मापि नित्यो भवेत्। द्वयोर्नित्यत्वे सति तयोः संयोगोऽपि नित्यः स्यात्, तेन मुक्तिरसम्भवा। किञ्च यदि बुद्धिरनित्या स्यात्तर्ह्युत्पत्तेः पूर्वमनुपस्थिता स्यात्। तेन धर्माऽधर्मजनितशरीरादीनामुत्पत्तिरपि न स्यात्। तेन संसारस्याप्युत्पत्तिर्न स्यात्। अतश्चेतनात्मैव कर्ता, स च धर्माऽधर्मविशिष्टः। तस्य धर्माऽधर्मरूपादृष्टस्य नियन्त्रणनिमित्तमीश्वरस्य सत्ताऽवश्यमङ्गीकरणीया।

**क्षणिकत्ववादस्य खण्डनमीश्वरस्थापनञ्च**–

बौद्धदर्शनस्वीकृतसिद्धान्तेष्वन्यतमसिद्धान्तः 'क्षणिकत्ववादः' इति। प्राचीनबौद्धदर्शनस्वीकृतपरिवर्तनवाद एव परवर्तिसमयेऽश्वघोषप्रभृतिदार्शनिकैः क्षणिकत्ववादनाम्ना व्यवह्रियते। क्षणिकत्ववादानुसारेण सद्वस्तुमात्रं क्षणिकमर्थात्केवलमेकक्षणत्वेन स्थायी– 'यत् सत् तत् क्षणिकम्, यथा जलधरपाटलः'।[१४] अत्र 'सत्' इति पदेनार्थक्रियाकारित्वं ज्ञाप्यते। अर्थात्कार्योत्पद्यमानवस्तु सदा क्षणिकम्। शरीरं नाम परमाणुसमूह एव बोध्यते, तेन परमाणुसमूहोऽवश्यं क्षणिकः। ध्वंसस्य पूर्वक्षणे परमाणुस्तत्सदृशं परमाणुं सृजति। पूर्वपरमाणुनिष्ठधर्मा अर्थात्पूर्वशरीरविद्यमानकर्मवासनादीनि तत्सृष्टपरमाणावपि संक्रामन्ति। अतः पूर्वप्रत्यक्षीकृतस्य विषयस्य स्मरणं पूर्वपरमाणुसृष्टपरमाणुनाऽनायासेन कर्तुं शक्नोति। एवं भूतात्मकपरमाणौ चेतनास्वीकारे भोगादिकार्यं सम्पद्यते। तेन देहातिरिक्तचैतन्यस्वरूपात्मनः स्वीकारस्य प्रयोजनमेव नास्ति। किञ्चात्मन्यदृष्टमपि न सिद्ध्यति। अदृष्टसिद्ध्यभावादृष्टस्याधिष्ठात्रीश्वरस्यापि स्वीकारे यौक्तिकता नास्त्येव।

किञ्च बौद्धाः पुनरपि क्षणिकत्ववादस्थापनाय गृहस्थबीजक्षेत्रस्थबीजप्रसङ्गमुत्थापयन्ति। क्षेत्रस्थबीजे कुर्वद्रूपतेति विजातीयातिशयविद्यमानत्वात् तानि बीजानि कार्योत्पादने समर्थानि। परन्तु गृहस्थबीजे तदविद्यमानत्वाद् गृहस्थबीजसमूहः कार्योत्पादनेऽसमर्थः। गृहस्थबीजक्षेत्र-

स्थबीजयोर्भिन्नत्वात् स्वीकर्तव्यं प्रतिक्षणं वस्तु भिन्नं भिन्नमेव। पूर्वस्थितबीजानि कालाविलम्बनेनैव परवर्तिबीजान्युत्पादयन्ति। बीजन्तथा वस्तुमात्रमेकक्षणाधिकं स्थातुं नार्हति। एवंरूपेण क्षणिकत्ववादसिद्धिर्भवति।

प्रखरबौद्धविरोधित्वप्रमाणन्तस्य *न्यायकुसुमाञ्जलि*ग्रन्थे प्रतिपदं दरीदृश्यते। क्षणिकत्ववादखण्डनाय प्रथमस्तवकेऽवोच्युदयनाचार्येण–

'न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत्।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना'॥[१५]

बौद्धाः क्षणिकत्वसिद्धये शस्त्ररूपेण वैजात्यसिद्धेरुपयोगमकुर्वन्। अतो वैजात्यप्रतिष्ठार्थं विजातीयकारणकुर्वद्रूपता स्वीकर्तव्या। अर्थादङ्कुरादौ कुर्वद्रूपता स्वीकर्तव्या। परन्त्वेवं कारणवैचित्र्ये स्वीकृते सति कार्यवैचित्र्यव-शात्कार्यहेतुना कारणस्यानुमानं न सिद्ध्यति। तथा चानुमानसिद्ध्यभावात् क्षणिकत्ववादोऽपि न सिद्ध्यति। मृज्जलादिसहकारिकारणवशाद् गृहस्थबीज-क्षेत्रस्थबीजयोर्विरोधो विद्यते। अर्थाद्गृहस्थबीजानि यदा क्षेत्रे उप्यन्ते तदा सहकारिकारणेन मृज्जलादिसंस्पर्शेन तेषां कार्योत्पादनसक्षमताऽऽगच्छति। गृहस्थबीजानि सहकारिकारणसंस्पर्शाभावात् तान्यङ्कुरोत्पादनेऽसमर्थानीति। सहकारिकारणेनैव गृहस्थबीजक्षेत्रस्थ-बीजयोर्वैजात्यं दूरीभूतमस्ति। तथा च वैजात्यसिद्ध्यभावात् क्षणिकत्वसिद्धिरपि न भवति। अतो यत् सत् तत् क्षणिकमित्यनुमानमपि न सिद्ध्यति। अतो क्षणिकत्वाभावाद् भूतादिदेहे

भोगादयो न सम्भवन्तीत्यतो देहातिरिक्तचेतनात्मनः स्वीकारोऽवश्यमेव कर्तव्यः। चैतन्यस्वरूपे आत्मन्येवादृष्टवशाद्भोगादयः सम्भवन्ति। एवञ्चाऽदृष्टस्य नियन्त्रकरूपेणेश्वर-सत्ताऽवश्यं स्वीकर्तव्या।

**आत्मनः कारणत्वसिद्धिः**–

उदयनाचार्येण *न्यायकुसुमाञ्जलि*ग्रन्थे निरीश्वरवादिनां मतखण्डन-पूर्वकमीश्वरसत्ता प्रतिस्थापिता। लक्ष्यपरिपूरणायोदयनाचार्येण चार्वाकमतखण्डन-पूर्वकमलौकिकपरलोकसाधनं कृतम्। परलोकसाधनपूर्वकन्तदधिष्ठात्रीश्वरस्य स्थापना च कृता। अस्मिन् सन्दर्भे चार्वाकैर्बौद्धसम्मतक्षणिकत्ववादप्रसङ्ग उत्थाप्यते चेदपि क्षणिकत्ववादखण्डनानन्तरमात्मनः स्थिरत्वं नित्यत्वञ्च स्थाप्येते उदयनाचार्येण। नास्तिकवादिचार्वाकाणामाशङ्काऽत्राऽऽसीत्, आत्मनो नित्यत्वेऽपि तेनादृष्टस्य स्थापनं न भवति। अदृष्टस्य तु कारणरूपेणात्मानं स्वीकर्तुं न शक्यते। अत्राऽन्वयव्यतिरेकेण कार्यकारणभावः सम्पद्यते। अर्थात्कार्येण साकं यस्याऽन्वयव्यतिरेकसम्बन्धो भवेत् तत्कार्यस्य कारणं स्यात्। कारणताज्ञानञ्चान्वयव्यतिरेकज्ञानसापेक्षम्। यथा– यत्र यत्र धूमस्तत्र तत्र वह्निरित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमो नास्तीति व्यतिरेकदृष्टान्तः। आत्मनो नित्यत्वादात्माभावेऽदृष्टाभाव इति व्यतिरेकदृष्टान्तो न सम्भवति। किञ्च यद्यदृष्टसिद्धिरपि भवति तर्हि तन्नित्यं स्यात्। अत एव क्षणिकभूते

चैतन्यस्वीकार एवोचितः। एतेनादृष्टसिद्धिर्न भवति। किञ्चादृष्टसिद्ध्यभा-वात्तन्नियन्त्रकरूपेणेश्वरस्य सिद्धिरपि न स्यात्।

एवमुपर्युक्तमतस्य खण्डनायोदयनाचार्यो युक्तिं प्रदर्शयति, नियतपूर्ववृत्तित्वे सत्येव कारणं न स्यात्, अनन्यथासिद्धत्वमपि भवितव्यम्। 'अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्'।[१६] *न्यायकुसुमाञ्जलि*ग्रन्थस्य टीकाकारो हरिदासोऽपि वक्ति– 'व्यतिरेकगर्भं न कारणत्वं किन्त्वनन्यथासिद्धनियतपूर्ववर्त्तिभावः'।[१७] अर्थादनन्यथासिद्धनियतपूर्ववृत्तित्व-स्यैव कारणता तदर्थं व्यतिरेकगर्भितस्य प्रयोजनं नास्ति। अनन्यथासिद्धः= न अन्यथासिद्धः। अर्थाद् यदन्यथासिद्धं नास्ति, तदेवानन्यथासिद्धः। यथा– घटं प्रति कपालस्यानन्यथासिद्धत्वम्। अपरपक्षे कुम्भकारस्य पिताऽन्यथासिद्धः। अत एवान्वयव्यतिरेकस्यैव कारणता सर्वत्र वक्तुं न शक्यते। यतो हि कारणता क्वचिदन्वयव्यतिरेकेण क्वचिच्च ग्राहकप्रमाणेन ज्ञायते। पुनः समाधानत्वेनोदयनाचार्यो वक्ति–

'पूर्वभावो हि हेतुत्वं मीयते येन केनचित्।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा नहि'॥[१८]

अर्थात् कार्यनियतपूर्ववृत्तित्वं कारणत्वम्। ग्राहकप्रमाणेनापि कारणत्वं सिद्ध्यति। अनुमानप्रमाणेन चाऽऽत्मनोऽदृष्टपूर्ववृत्तिता सिद्ध्यति। एवं कारणता यदि न सिद्ध्येत्तर्हि धर्मिज्ञानमपि न साधयितुं शक्नुयात्। अत आत्मनो नित्यत्वे

विभुत्वेऽपि च कारणरूपेण ग्रहणे काचिद्बाधा नास्त्येव। आत्मजन्यत्वाददृष्टस्य नित्यत्वमपि न सिद्ध्यति। किन्तु विविधादृष्टानुसारेणात्मनि प्रतिनियतं भोगादयः सिद्ध्यन्ति। एवञ्चाऽदृष्टस्याऽचेतनत्वात्तन्नियन्त्रकरूपेणेश्वरस्यापि सिद्धिर्भवति।

**वेदस्य प्रणेतृरूपेणेश्वरसिद्धिः–**

न्यायशिरोमण्युदयनाचार्यः प्रथमस्तवके निरीश्वरवादिचार्वाकाणां खण्डनं विहितवान्, द्वितीयस्तवके मीमांसकानामापत्त्युत्थापनपूर्वकमत्यन्तं सुमनोज्ञतया खण्डनञ्चकार। मीमांसकदृष्ट्या वेदस्य प्रामाण्यज्ञापनायाऽथवा सत्ताप्रतिपादनायेश्वरस्यापेक्षा नास्ति। ईश्वरं व्यतिरिच्यापि परलोकसाधनरूप-यागादीनामनुष्ठानं सम्भवति। वेदस्य वैधता यथा स्वीक्रियते तथैव तन्निर्धारितविधीनामनुष्ठानं क्रियते। अनुकूलविषयाणामर्थाद्धर्मादीनां ज्ञानं यथा वेदाद्भवति तथैव प्रतिकूलीयविषयाणां ज्ञानमपि वेदादेव भवति। वेदस्य प्रामाण्यप्रतिष्ठा न भवति चेत्तन्निर्देशितविषयाणां ग्रहणं न क्रियेत। अतो वक्तुं शक्यते मीमांसकदृष्ट्या वेदो नित्यो निर्दोषश्च। अतो वेदस्य प्रामाण्यं स्वतःसिद्धत्वान्महाजनगृहीतत्वाच्च वेदस्य प्रामाण्यज्ञानमपि सिद्ध्यति। यागादिकर्मप्रतिपादकवेदनिर्देशितयागादिकर्मणैव स्वर्गादिलाभः सम्भवति। अतः स्वतःसिद्धवेदद्वारा यागादिकर्मणामनुष्ठानसम्भवादीश्वरस्वीकारो निष्प्रयोजनम्।

न्यायदृष्ट्या वाक्यस्य याथार्थ्यं वक्तुरुपर्याश्रितं भवति। भ्रमादिदोषरहितवक्त्रुच्चारितं वाक्यं विश्वासयोग्यरूपेण ग्रहणयोग्यं भवति। साधारणाल्पज्ञाल्पशक्तिसम्पन्नव्यक्तीनां वेदप्रतिपादितसकलविषयाणां ज्ञानं स्थातुं न शक्यते। अतो वेदे प्रतिपादितसमस्तविषयाणां यथार्थज्ञानं पूर्णज्ञानसम्पन्नव्यक्तेरेव भवितुमर्हति। सर्वज्ञं सर्वशक्तिसम्पन्नेश्वरं विना तादृशो वक्ता कश्चन भवितुं नार्हति। अतो वेदस्य वैधताविषये प्रामाण्यविषये वा सन्देह एव न तिष्ठति। किन्तु मीमांसकानामापत्तिर्वर्तते वेदस्य वैधता यथार्थवक्तुरुपर्याश्रिता नास्ति, यतो हि वेदोऽपौरुषेयः। अर्थाद्वेदो व्यक्तिसम्पर्कितो न भवति। यतो हि व्यक्तिसम्पर्कितयुक्तेर्वैधताऽवैधताविषये प्रश्नो भवितुमर्हति। यदि कश्चन व्यक्तिर्दुष्टस्स्यात्, तेनोच्चारितं वाक्यं प्रमात्वेन ग्रहीतुं न शक्यते। किन्तु वेदविषये एतादृशस्य सन्देहस्यावकाश एव नास्ति, यतो हि वेदोऽन्यपुरुषनिरपेक्षः स्वतःसिद्धश्च वर्तते।

किञ्च स्वसम्मतविषयस्य सुदृढतया प्रतिपादनाय ‘सर्गप्रलयसम्भवात्’ इति पदस्योत्थापनं कृतं तार्किकशिरोमण्युदयनाचार्येण। सृष्टिर्भवति चेद्ध्वंसोऽप्यवश्यं भवतीति शास्त्रसिद्धम्। *श्रीमद्भगवद्गीता*यामप्युच्यते–

‘जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च’।[११]

यत् किमपि जन्यं वर्ततेऽथवोत्पद्यते तस्य नाशोऽवश्यम्भावी। वेदविषयेऽपि व्यतिक्रमो नास्ति। वेदस्थितवर्णोऽनित्यः, तज्जन्यपदमनित्यम्, पदनिर्मितवाक्यञ्चानित्यं भवति। सृष्टिः प्रलयविशिष्टा इति नियमानुसारेण सृष्टवेदस्य प्रलयवशाद् ध्वंसकार्यादनन्तरं परवर्तिवेद उत्पद्यते। सृष्टवेदप्रामाण्यसिद्ध्यर्थमवश्यमीश्वरस्य स्वीकारः कर्तव्यः। यतो हि सृष्टेः प्रारम्भे महाजनपरिग्रहाभावाद्वेदप्रामाण्यविषये संशय आगच्छत्येव। अतोऽसर्वज्ञो-ऽल्पमतिसम्पन्नः कश्चन वेदस्य कर्ता भवितुं नार्हति। ईश्वरं व्यतिरिच्य अपरः कश्चन यागादीनामनुष्ठानं कर्तुं न शक्नोति। अतो वेदस्य कर्तृरूपेणावश्यमीश्वरस्य स्वीकारः कर्तव्यः। तेन सृष्टेः प्रारम्भे वेदस्य प्रामाण्यसिद्धौ संशयो न तिष्ठति।

मीमांसकैः पुनराक्षिप्यते सृष्टेः प्रलयस्य च स्वीकारेऽपि वर्णः, तज्जन्यपदम्, पदजन्यवाक्यं तु नित्यमेव वर्तते, अतो वर्णादीनां नित्यत्वाद्वेदस्य विनाशो न सम्भवति। अस्याक्षेपस्य समाधानत्वेनोच्यते उत्पन्नककारो विनष्टककारश्चेत्यादिज्ञानायावश्यं वर्णस्य सृष्टिर्विनाशश्च स्वीकरणीयः। अत एव वेदस्य रचयितृरूपेणावश्यमीश्वरसत्ता स्वीकर्तव्या।

मीमांसकानां खण्डनावसरे सांख्यकर्तृकोत्थापितमतस्यापि समालोचनमभवत्। सांख्यमते वेदोऽपौरुषेयो नास्ति, किञ्चैश्वरीयवाक्यमपि नास्ति। कपिलकणादप्रमुखपुरुषाः स्वकर्मणा योगमाध्यमेन वाऽतुल्यसामर्थ्य-मर्जितवन्तः, तेन सामर्थ्येनैव वेदानां रचनाऽभवत्। वेदः कदाप्यपैरुषेयो भवितुं

नार्हति। कारणं वेदे यद्यप्येतादृशानि कानिचन श्रुतिव्याक्यानि वर्तन्ते येषां प्रवक्ता सामान्यपुरुषो भवितुं नार्हति। तथापि तादृशप्रवक्ता कदापीश्वरोऽपि न भवतीश्वरसत्तायाः प्रमाणाभावात्। वेदे चैतादृशं किञ्चनासाधारणत्वज्ञापनं वर्तते, यत् साधारणपुरुषविधानायोग्यमस्ति। अतः शक्तिसम्पन्नकपिलादिमुनीनां वेदकर्तृरूपेण स्वीकारे सर्वज्ञरूपेणेश्वर-ग्रहणस्यावश्यकमेव नास्ति।

सांख्यकर्तृकोत्थापितापत्तेर्युक्तिपूर्वकं खण्डनं विहितम्। कपिलप्रमुखमुनयः सिद्धपुरुषाः सन्तोऽपि सर्वज्ञा न। एवमसर्वज्ञपुरुषा विश्वासयोग्या भवितुं नार्हन्ति। अतो वेदप्रवक्तृरूपेणैतादृशस्य सर्वज्ञस्य सर्वशक्तिसम्पन्नस्य ग्रहणीयं यस्मिन् वेदनिर्माणस्य सर्वज्ञानं विद्यते। एतादृशः कश्चन ईश्वर एव भवितुमर्हतीश्वरं विना नान्यः। सांख्यमतस्वीकारे च गौरवदोषोऽप्यापतेत्। यतो हि कपिलादिसदृशा बहवः सिद्धपुरुषा वर्तन्ते। अतो लाघववशादेकस्य सर्वज्ञस्य सर्वशक्तिसम्पन्नेश्वरस्य स्वीकार एव श्रेयः। किञ्च कपिलादिमुनीनामीश्वरसदृशसर्वज्ञत्वाभावात्तद्रचितवाक्यानां तादृशविश्वासयोग्याभावाद्वेदस्य लोपः स्यात्। अतो वेदस्य कर्तृरूपेणेश्वरस्वीकारः कर्तव्य एव।

**प्रलयसाधकप्रमाणेन सृष्टिकर्तृरूपेणेश्वसिद्धिः–**

वस्तुसद्भावप्रतिपादनविषये प्रमाणेन साकं वस्तुसत्ताबाधकप्रमाणमपि तिष्ठति। किन्तु बाधकप्रमाणस्याधिक्ये सति याथार्थ्येन वस्तुसत्ताप्रदिपादनं नैव

भवितुमर्हति। अत एवायौक्तिकप्रलयबाधकप्रमाणस्य न्यायसम्मतदृष्ट्या खण्डनपूर्वकं वस्तुसद्भावः प्रतिपाद्यते। किञ्च केवलं बाधकप्रमाणखण्डन-मेवाऽकरोदिति नास्ति साधकप्रमाणमपि प्रददौ। तेन प्रलयबाधकखण्डनेन प्रलयसाधकप्रतिपादनात् प्रलयोऽवश्यं स्वीकार्य इत्यस्मिन् विषये सन्देहस्यावकाश एव न भवति। प्रज्ज्वलितवर्त्तिशिखा क्रमशो लघ्वी भूत्वैकस्मिन् समये यथाऽदृश्यं भवति तथैव जगति विद्यमानं सर्वं स्वसामर्थ्यह्रासमाध्यमेनैकस्मिन् समयेऽदृश्यं भवति। एवंरीत्या जन्म, वेदादिशास्त्राध्ययनं यागादिकर्म इत्यादीनां क्रमशो ह्रासो भवति। एतत्प्रलयसाधककारिका यथा–

'जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्'॥[२०]

प्राचीनकाले मानसीपूजा, तदनन्तरं पुत्रलाभेच्छया मैथुनक्रियावशाज्जन्मलाभ इत्यासीत्। किन्त्वद्यत्वे सम्भोगकामनया मैथुनक्रियावशाज्जन्मलाभाऽऽधिक्येन भवतीति जन्मह्रासः। तथैव पुराकाले संस्कारो वेदनियमानुसारेण संस्क्रियते स्म। आदौ तावच्चरुप्रभृतिषु संस्कारः, तदनन्तरं गर्भः, अनन्तरो जन्मनः परं संस्कारो भवति स्म। किन्त्विदानीं येन केन प्रकारेण संस्कारो विधीयत इति संस्कारह्रासः। न केवलं तदपि तु वैदिकयुगप्रारम्भे एक एव चतुर्वेदानां तच्छाखानां च धारणे समर्थ आसीदर्थादध्ययनपूर्वकधारणं सर्वमेव स्वाधीनस्थ आसीत्। किन्तु

तदनन्तरं क्रमशो ग्रहणधारणक्षमता ह्रासमानाऽस्ति। फलस्वरूपमेक एकस्यैव वेदस्याध्ययनम्, अनन्तरं वेदस्य कस्यचिदेवांशस्य तदनन्तरं वेदस्य कस्याश्चन कारिकाया अध्ययनन्दरीदृश्यते। एतेन ज्ञाप्यते किमपि वस्तु सर्वदा समरूपेण विद्यमानं नैव तिष्ठति ।

उपर्युक्तपर्यालोचनेन वक्तुं शक्यते, वस्तु सर्वदा समरूपेण स्थातुं नार्हति। उपरिष्ठात्क्रमशोऽधोगमनन्ततोऽदृश्यमेव वस्तूनां स्वाभाविकधर्मः। वेदविषयेऽप्यस्य नियमस्य व्यतिक्रमो नास्ति। पुरा वेदस्यातीवगाम्भीर्य-त्वविद्यमानत्वेऽपि क्रमशः स्वाध्यायस्य यागादिकर्मणश्च ह्रासत्वाद्वेदादिसम्प्र-दायस्य ह्रासोऽनिवार्यः। सम्प्रदायह्रास एव प्रलयः। पर्यालोचनेन ज्ञाप्यते यत्, जन्यपदार्थानां ध्वंसोऽनिवार्य एव। तेन च ब्रह्माण्डे नाशे तत्स्थितप्राणिनामपि नाशोऽवशम्भाव्येव। प्रलयानन्तरं पुनर्नूतनसृष्टिर्भवति। नूतनकल्पसृष्ट्यर्थं तादृशशक्तिसम्पन्नः कश्चन स्वीकर्तव्यः। सः च सर्वज्ञानसम्पन्नेश्वरं विनापरः कश्चन भवितुं नार्हति। एवंरीत्योदयनाचार्यः स्तवकान्ते सृष्टिप्रलयरूपक्रियारतेश्वरं प्रति श्रद्धाज्ञापनपूर्वकं परोक्षरूपेण संक्षेपेण विषयसारोऽप्युपस्थापयत्।

**अनुपलब्धेरीश्वरबाधकत्वनिराकरणम्**–

ईश्वरमननात्मकोपासनमेवास्य ग्रन्थस्य प्रधानलक्ष्यम्, तदुद्देश्यचरितार्थायैव प्रतिस्तवकमीश्वरप्रतिष्ठा ज्ञाप्यते। प्रथमस्तवके यथाऽदृष्टस्याधिष्ठातृ-

रूपेणेश्वरप्रतिष्ठा ज्ञाप्यते तथा द्वितीयस्तवके वेदस्य प्रणेतृरूपेणेश्वरप्रतिष्ठा कृता। तृतीयस्तवके विप्रतिपत्त्युल्लेखपूर्वकं खण्डनञ्चकारोदयनाचार्यः। अभाव-साधकप्रमाणेनेश्वराभावसिद्ध्यर्थमपि यथासामर्थ्यं पूर्वपक्षिभिः प्रयासो विहितः। उदयनाचार्येण विपक्षस्वीकृतप्रमाणस्वरूपविचारपूर्वकं दर्शितं यदीश्वराभाव-साधकं किमपि प्रमाणं नास्ति। यद्यपीयं पर्यालोचनेश्वरप्रतिष्ठया साकं साक्षात्सम्बन्धो नास्ति तथापि दार्शनिकानां प्रमाणविषयकमतखण्डनपूर्वकं न्यायसम्मततत्त्वम-स्थापयदुदयनाचार्यः। वस्तूनामभावसाधको भवति बौद्धदार्शनिकानाम-नुपलब्धिवादः। अर्थादनुपलब्ध्या कस्यचिद्वस्तुनोऽभावो ज्ञाप्यते। कस्मिंश्चित्स्थाने किमपि वस्त्वविद्यमानञ्चेदनुपलब्धिवादेनैव तदभावः संसिद्ध्यति। भूतले घटो न विद्यते चेद् घटाभावः सुनिश्चीयते एतद्दृष्ट्यैवेश्वरस्य प्रत्यक्षसिद्ध्य-भावादनुपलब्ध्याऽभावं सुनिश्चेतुं शक्यते। एवं स्वीकृतान्यप्रमाणे-ष्वनुपलब्ध्येश्वराभावोऽनायासेन सुस्पष्टत्वादनुपलब्धिप्रमाणमादावालोच्यते।

उदयनाचार्येणेश्वराभावसाधकानुपलब्धिवादस्य खण्डनं कृतम्। केवलमनुपलब्धिर्नास्ति, अपि तु योग्यानुपलब्धिरेवाभावसाधिका। योग्यानु-पलब्धिर्नाम योग्यताविशिष्टानुपलब्धिरिति। योग्यानुपलब्धिशब्दस्यार्थः प्रत्यक्ष-योग्यपदार्थस्यानुपलब्धिरिति। योग्यता नाम प्रतियोगी तद्व्याप्यान्य-समस्तप्रत्यक्षसामग्र्या एकत्रावस्थानम्। प्रसङ्गेऽस्मिन् हरिदासीटीकायामवोचि–

'योग्यता च प्रतियोगितद्व्याप्येतरयावदुपलम्भसामग्रीसमवधानम्'।[२१] किञ्च मीमांसकनारायणभट्टेनोच्यते–

'विषयं तदधीनांश्च सन्निकर्षादिकान् विना।
उपलम्भस्य सामग्रीसम्पत्तिः खलु योग्यता'॥[२२]

घटादिभावपदार्थस्योपलब्धिकारणचक्षुरादिरालोकः, विषयेण साकमिन्द्रियस्य सन्निकर्षे सत्यपि यदि घटादिपदार्थस्योपलब्धिर्न भवत्यर्थादनुपलब्धिर्भवति तर्ह्यत्र घटो नास्त्यनेन घटाभावो वर्तते तन्निश्चेतुं शक्यते। इयं योग्यानुपलब्धिरेव वस्तुनोऽभावसाधिका। यदि केवलमनुपलब्धिमात्रमभावसाधकं स्यात्तर्हि बौद्धस्वीकृतधर्माऽधर्मादीनां व्याख्यानं नैव भवितुमर्हति। यतो हि धर्मादीनां प्रत्यक्षीगोचराभावादनुपलब्ध्यैवाभावो सिद्ध्येत्। किन्तु बौद्धदर्शने धर्मादीनां ग्रहणं दरीदृश्यते इति निश्चप्रचं वक्तुं शक्यते। योग्यानुपलब्धिरेवाभावसाधिका। परमात्मा च प्रत्यक्षायोग्यः। अतः प्रत्यक्षायोग्येश्वराभावं साधयितुं न शक्यते।

अत्र प्रश्नः उत्थापयितुं शक्यतेऽयोग्यस्य यद्यनुपलब्धिर्न सम्भवति तर्हि शशशृङ्गं नास्तीति कथं वक्तुं शक्यते। अस्य समाधानावसरे उदयनाचार्यो वक्ति–

'योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम्।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम्'॥[२३]

शशशृङ्गं कदाप्युपलब्धेर्विषयो नास्ति, तत् सर्वथाऽनुपलब्धम्। शशशृङ्गमवश्यमेवायोग्यम्। अयोग्यस्य च कदाप्यनुपलब्धिर्न सम्भवति।

'शशशृङ्गं नास्ति' इत्यनेन शशशृङ्गस्य साधकप्रमाणाभावो ज्ञाप्यते। कारिकावृत्तावुच्यते– 'न हि शशशृङ्गयोग्यानुपलब्ध्या कश्चिन्निषेधति। न च प्रकृते योग्यानुपलब्धिं कश्चिन्मन्यते'।[२४] अयोग्यविषयस्य प्रतिषेधः सम्भवति न वेत्यस्य प्रश्नस्योत्तरवासरे उदयनार्येणोच्यते–

'दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने'।।[२५]

अर्थादुपलब्धिसामग्र्याः दोषयुक्तत्वाच्छशशृङ्गाद्यलीकवस्तु प्रत्यक्षविशिष्टं भवति। 'शशशृङ्गं नास्ति' इति वाक्यार्थज्ञापनायोदयनाचार्येण कथ्यते– 'शशेऽधिकरणे विषाणाभावोऽस्ति'।[२६] अर्थादत्र शशशृङ्गं निषेधाप्रतियोगी भवति। यथा शशस्तथा शृङ्गं विद्यते। किन्तु शशे शृङ्गस्याभावो वर्तते। अतोऽस्मिन् प्रसङ्गे शृङ्गमभावस्य प्रतियोगी। नैयायिका वैशेषिकाश्च अलीकप्रतियोगिकस्य प्रतिषेधं नैव स्वीकुर्वन्ति। प्रतियोगी यद्यलीकं स्यात् तर्हि तस्याभावोऽप्यलीक एव। तथा च तस्यालीकाश्रयस्य प्रत्यक्षमपि न सम्भवेत्, अनुमानमपि न सम्भवेत्। अत 'ईश्वरः न कर्ता कर्तृत्वव्यापकस्वार्थाभि-सन्धानरहितत्वात्' इत्यस्मिन्ननुमाने स्वार्थाभिसन्धानाभावेन पक्षत्वेनेश्वरे कर्तृत्वाभावसाधनं न सम्भवति। एवञ्च प्रकृतानुमाने पक्षस्याप्रसिद्धत्वाद-नुमानमिदमाश्रयासिद्धिदोषेण ग्रस्तम्। यदि ईश्वरोऽलीकः स्यात् तर्हि तत्राभावसाधनस्य प्रयोजनमेव नास्ति। यतो ह्यलीकोऽभावस्याधिकरणं नैव

भवितुमर्हति। अतोऽसत्ख्यातिवादिनोऽसदीश्वरस्य मिथ्याभासमवलम्ब्य तस्याश्रयस्य कर्तृत्वाभावं साधयितुमिच्छन्ति, तन्न यौक्तिकम्। एवंरूपेण बौद्धसम्मतेश्वराभावकसाधकानुपलब्धिखण्डनेनेश्वरसत्ता स्थापितोदयनाचार्येण।

**अनुमानस्येश्वरबाधकत्वनिराकरणम्**–

अनुपलब्ध्येश्वराभावो न सिद्ध्यति चेदप्यनुमानेनावश्यमीश्वराभावः सिद्ध्यति। अर्थादनुमानमीश्वराभावसाधकम्। कार्यवस्तुमात्रं कर्तृनिष्ठम्, यथा– घटनिर्माणकर्ता कुम्भकारः, पटनिर्माणकर्ता तन्तुवाय इति। तद्वज्जगद्रूपकार्यमपि केनापि कर्त्रा निर्मितम्। कर्तावश्यं शरीरसम्बन्धविशिष्टः प्रयोजनविशिष्टश्च। अर्थात् कर्तृत्वस्य व्यापकधर्मः शरीरसम्बन्धत्वं प्रयोजनत्वञ्च। अर्थाद्यत्र यत्र कर्तृत्वं तत्र तत्र शरीरसम्बन्धं प्रयोजनञ्च। तेन सृष्टिकर्ता शरीरसम्बन्धेन प्रयोजनवशात्कार्यं सम्पादयति। किन्त्वीश्वरस्य यथा शरीरराहित्यं तथा स्वार्थराहित्यञ्च वर्तते। अत ईश्वरः कदापि सृष्टिकर्ता भवितुं नार्हति। एतेन ज्ञाप्यते यत्, ईश्वरो नास्त्येव।

उदयनाचार्येण न्यायसिद्धान्तमवलम्ब्यैव स्वमतस्य प्रतिष्ठा कृता। द्व्यणुकादिक्रमेण निष्पादितजगद्रूपकार्यं कर्तृविशिष्टम्। जगद्रूपकार्यस्य कर्ता विहायेश्वरं कोऽपि भवितुं नार्हत्येव। प्रसङ्गेऽस्मिन् पूर्वपक्षोत्थापितानुमानं यथा– ईश्वरो न क्षित्यादिकर्ता शरीरसम्बन्धाभावात् प्रयोजनाभावाच्चेति।

अनुमानवाक्येऽस्मिन् ईश्वरः पक्षरूपेण स्वीकृतः। विपक्षस्वीकृतसत्ताविहीनेश्वरः कदापि पक्षो भवितुं नार्हति, भवति चेदप्ययोक्तिकमाश्रयासिद्धदोषविशिष्टत्वात्। यद्युच्यते विपक्षिभिरीश्वरः स्वीक्रियते, परन्त्वीश्वरशरीरं न स्वीक्रियते– एतदपि विरुद्धमेव। अत ईश्वरे स्वीकृते सति जगतः सृष्टिकर्तृरूपेणैव स्वीकर्तव्यम्। अन्यथा विपक्षस्वीकृतानुमानमिदमयौक्तिकं विरुद्धं वा स्यात्।

पूर्वपक्षिभिः पुनरापत्तिरुत्थाप्यते, मिथ्याज्ञानवशात् केचन गुरव ईश्वरं स्वीकृतवन्तः। मिथ्याज्ञानमिदमसत्ख्यातिः। मिथ्याज्ञानवशादीश्वरः स्वीक्रियते तस्य चानुमानं भवति– ईश्वरः न क्षित्यादिकर्ता शरीरसम्बन्धाभावात् प्रयोजना-भावाच्च। अथवा 'ईश्वरो नास्ति शरीरसम्बन्धाभावात् प्रयोजनाभावाच्च। आलोचनापूर्वकमनुमानमिदं खण्डितं भवति। अस्मादनुमानवाक्या-द्द्विविधवाक्यनिर्माणपूर्वकमीश्वरस्य कर्तृत्वाभाव ईश्वराभावश्चेति सिद्ध्यति। प्रथमन्तावत्– 'क्षित्यादिकर्तृत्वाभाववानीश्वरः' अनुमानेनानेन ईश्वरस्य कर्तृत्वाभावः सिद्ध्यति। अत्रेश्वरो विशेष्यपदं क्षित्यादिकर्तृत्वाभावश्चेति पदं विशेषणम्। द्वितीयमनुमानम्– 'ईश्वरो नास्ति' इत्येतेनेश्वराभावः सिद्ध्यति। अत्रेश्वरोऽभावस्य प्रतियोगी। परन्त्विदं यथार्थं नास्ति। यदाभासप्रतिपन्न-मर्थाद्वस्तुसत्तारहितं तत्कदाप्यभावस्य प्रतियोगी न भवति। अत उदयनाचार्यो वक्ति–

'व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता।

अभावविरहात्मत्वं वस्तुनः प्रतियोगिता'॥[२७]

प्रसङ्गेऽस्मिन् हरिदासीटीकायामुच्यते– 'अभावविरहात्मत्वं प्रतियोगित्वम्, अवस्तुनो नेति नालीकस्य प्रतिषेधाधिकरणत्ववत् प्रतिषेध्यत्वमपीति भावः'।[२८] एवंरूपेणासत्ख्यातिवादोपनीतेश्वरो विशेष्यः प्रतियोगी वा भवितुं नार्हति। अत ईश्वरस्याभावसाधकानुमानद्वयमसम्भवमेव। तेन च ईश्वराभावो न सिद्ध्यति।

**शब्दप्रमाणस्येश्वरबाधकत्वनिराकरणम्**–

न्यायवैशेषिकयोः समानतन्त्रत्वेऽपि प्रमाणविषये मतवैविध्यं परिलक्ष्यते। प्रमाणान्तरवन्नैयायिकैः ज्ञानस्योत्पत्तित्वेन शब्दप्रमाणं स्वीक्रियते। अनुमानोपमानप्रमाणवच्छब्दप्रमाणमपीश्वरस्य बाधकं नैव वरीवर्ति, किन्तु वैशेषिकदर्शने स्वतन्त्रप्रमाणत्वेन शब्दप्रमाणं नैव स्वीक्रियते चेदपि न्यायदर्शने तु शब्दप्रमाणस्य स्वातन्त्र्यं स्वीकृतम्। न्यायदर्शने सर्वज्ञरूपेण तथा ज्ञानाधिकरणरूपेण ईश्वरः स्वीक्रियते। जगतः सृष्टिकर्तृरूपेण यदीश्वरसत्ता न स्वीक्रियते तर्हि सृष्टितत्त्वस्य यथेष्टव्याख्यानं दातुं न शक्यते। यद्याप्तवाक्यमेव यथार्थवाक्यत्वेन स्वीक्रियते, तर्हि कस्यचनाऽऽप्तत्वेन स्वीकारोऽवश्यं कर्तव्यः। अल्पज्ञः, अल्पशक्तिसम्पन्नः कश्चन पुरुषः सर्वज्ञो भवितुं नार्हति। आप्तपुरुषस्तादृशः कश्चन भवति यस्मिन् सर्वप्रत्यक्षसामर्थ्यं वर्तते। सर्वज्ञं सर्वसम्पन्नमीश्वरं विहाय कोऽपि भवितुं नार्हति। विरुद्धपक्षिस्वीकृतेश्वर-स्यानस्तित्वज्ञापनार्थमप्यवश्यमीश्वरवाक्यमङ्गीकार्यम्। यदीश्वरसत्ता एव न

स्वीक्रियते तर्ह्याप्तपुरुषाभावाद्विपक्षिणां वक्तव्यमवश्यं यौक्तिकं भवितुं नार्हति। एतच्चेश्वरबाधकत्वं प्रमाणयितुं नैव शक्नोति। तेन च ईश्वरः सिद्ध्यति।

श्रुतिवाक्यस्य तथा वेदस्य स्वतःसिद्धत्वादीश्वरसत्तास्वीकारस्य प्रयोजनमेव नास्तीति मीमांसकमतं नैयायिका नैवाऽङ्गीचक्रुः। अस्मिन् वियये उच्यते– श्रुतिवाक्यं शाश्वतं नास्ति। श्रुतिवाक्यं वक्तारं विना नैव सम्भवति। ईश्वरसत्तासाधकं यथा श्रुतिवाक्यं विद्यते तथा ईश्वराभावसाधकमपि श्रुतिवाक्यं विद्यते। किन्तु ईश्वरसत्ताबाधकश्रुतिवाक्यमैकान्तिकाभावात् तदीश्वरबाधकं भवितुं नार्हति। प्रसङ्गेऽस्मिन् ग्रन्थकारेणोच्यते–

‘न चासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात्।
निरञ्जनावबोधार्थो न च सन्नपि तत्परः’॥[२९]

व्याख्याविवृतिटीकायामप्युच्यते– ‘असत्त्वबोधकागमानामिति अकर्तृत्वबोधकागमानामित्यर्थः। मूले न चासाविति आसौ आगमः क्वचित् असत्त्वमात्रपक्षे अकर्तृत्वमात्रपक्ष इति यावत्। न एकान्तो न नियतो न तात्पर्यविषय इति यावत्’।[३०] आत्मस्वरूपप्रतिपादनमेवागमस्य तथा श्रुतिवाक्यस्य मुख्यार्थः। तेन च ईश्वराभावो न सिद्ध्यति।

**अर्थापत्तेरीश्वरबाधकत्वनिराकरणम्–**

मीमांसास्वीकृतप्रमाणेष्वन्यतमप्रमाणमर्थापत्तिः। 'अर्थापत्तिः' इति पदस्य विश्लेषणं क्रियते चेद् दृश्यते अर्थस्यापत्तिरर्थापत्तिरिति। अर्थापत्तिरिति पदघटितस्य 'अर्थः' इति शब्दस्यार्थो 'विषयः'(वास्तविकविषयः)। आपत्तिशब्दस्यार्थो भवति कल्पना। अर्थात्कस्मिंश्चिद्वास्तविकविषये आपतकालीनाऽसङ्गतेर्व्याख्यानप्रदर्शनाय यदापरविषयकल्पनं क्रियते तदेवा-र्थापत्तिः। उदाहरणत्वेन वक्तुं शक्यते– 'पीनो देवदेत्तो दिवा न भुङ्क्ते' अर्थाद्देवदत्तो दिवा भोजनं न करोतीत्यस्मिन् वाक्ये विषयस्य महत्त्वमेतादृशं विद्यते यदेकः स्थूलकायदेवदत्तो वर्तते, अपरपक्षे देवदत्तो दिवा भोजनं न करोतीति अर्थाद् वाक्ये पीनत्वेन साकं दिवा भोजनस्य चासङ्गतिः। अस्या असङ्गतेर्दूरीकरणाय रात्रिभोजनकल्पनं क्रियते। अत्र रात्रिभोजनमर्थापत्तिः।

अत्रापत्तिरुत्थाप्यते यत्, न्यायस्वीकृत ईश्वरो भवति सर्वज्ञः सर्वशक्तिमान्। अतः सर्वशक्तिमान् ईश्वरो वेदोपदेशं विनाऽनायासेन यथा शुभकर्मणि मनुष्यान् प्रेरयितुं शक्नोति तथैव अशुभकर्मतः विरामयितुमपि समर्थोऽस्ति। ईश्वरस्य सर्वज्ञत्वे कदापि वक्तुं न शक्यते, वेदोपदेशं विना किमपि कर्तुं न शक्यते। अत ईश्वरेण सर्वे वेदनिर्देशानुसारेण प्रेरोचिताः इत्यत्र प्ररोचितनिर्देशयो-र्द्वयोर्मध्येऽसङ्गतिर्दरीदृश्यते। अतोऽसङ्गतेर्दूरीकरणाय अवश्यमीश्वर-स्यास्वीकारः कर्तव्यः। ईश्वरं विहाय केवलं वेदोपदेशेनैव मनुष्याः शुभकर्मणि

नियुक्ता भवन्ति, अशुभकर्मतो विरता भवन्ति। अतो वेदोपदेशानुपपत्तिरेवार्थापत्तिरिति। वेदोपदेशानुपपत्तिरूपार्थापत्तिरेवेश्वराभाव-साधक इति।[३१]

उत्थापितापत्तेर्दूरीकरणायोदयनाचार्यो ज्ञापयति यत्, हेत्वाभावे फलाभावः केनापि नाङ्गीक्रियते। ईश्वरं विना वैदिकयुक्तिरङ्गीकर्तुमेव न शक्यते। अतोऽवैधयुक्यनुसारेण कर्मणि कस्यापि प्रवृत्तिर्नैव दृश्यते। किन्तु निर्देशवशादेवानुसरणपूर्वकं मनुष्याः कर्मरता भवन्ति। यदि निर्देशं विनैव मनुष्याः कर्मणि प्रवृत्ताः स्युः तर्ह्यदृष्टेनैव सर्वकार्यसिद्धिरित्यवश्यं स्वीकर्तव्यम्। तेन वेदोपदेशस्यापि निष्प्रयोजनत्वं स्यात्।[३२] अतः कर्मणि प्रवृत्त्यर्थमीश्वरोपदेशोऽवश्यं युक्तिसापेक्षम्।

उदयनाचार्यो विभिन्नसम्प्रदायस्वीकृतप्रकृतिविश्लेषणपूर्वकं समालोचन-मत्राकरोत्। दर्शयति च न्यायसम्मतप्रमाणमेव युक्तिसम्मतम्। तृतीयस्तवके उदयनाचार्यो दर्शितवान्, ईश्वरास्तित्वाभावसाधकस्य प्रमाणं नैव सम्भवति। अर्थात्केनापि प्रमाणेनेश्वाभावसाधनं नैव सम्भवति। एवंरूपेणोदयनाचार्य ईश्वराभावमतखण्डनेनेश्वरसत्तामस्थापयत्।

**प्रमात्वेनेश्वरसिद्धिः–**

ईश्वरीयज्ञानस्य प्रामाण्यप्रतिष्ठानिमित्तं चतुर्थस्तवके उदयनाचार्यो भाट्टमीमांसकसम्मतप्रमाणलक्षणस्य तथा जैनसम्मतस्मृतिप्रामाण्यस्य खण्डन-ञ्चकार। भाट्टमीमांसाकैरगृहीतविषयग्राहकज्ञानमेव प्रमाणत्वेन स्वीक्रियते। भाट्टसम्मतप्रमालक्षणं *श्लोकवार्त्तिके* परिलक्ष्यते यथा–

'तस्माद् दृढं यदुत्पन्नं नापि संवादमृच्छति।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम्'॥[३३]

अर्थात् प्रमाणं यथा निश्चयात्मकं ज्ञानं भवति तथैव ज्ञानान्तरेण गृहीतविषयस्याग्राहि स्यात्। धर्मकीर्तिविरचित*प्रमाणवार्त्तिके* गृहीतग्राहिज्ञानं प्रमाणमिति नैव स्वीचकार– 'गृहीतग्रहणान्नेष्टम्'[४५] एवञ्च 'अज्ञातार्थप्रकाशो वा'।[४६] अर्थाद्भाट्टस्वीकृतप्रमाणलक्षणे मूलविन्दुर्नूतनत्वम्।

भाट्टसम्मतप्रमाणलक्षणानुसारेणेश्वरज्ञानमनधिगतविषयाप्रकाशकत्वात् प्रमाणं भवितुं नार्हति। न्यायसम्मतेश्वरो नित्यः, अतः प्रागभावाभावात्तदपेक्षया पूर्ववृत्तित्वं कस्यापि भवितुं नार्हति। अपि चेश्वरीयज्ञानस्य सर्वविषयकत्वा-द्विषयागृहीतत्वस्य प्रसङ्ग एव नास्ति। अर्थात्केनापि प्रकारेण प्रमालक्षणमीश्वरीयज्ञाने नैव सङ्गच्छते।

उदयनाचार्यश्चोवाच पूर्वपक्षिस्वीकृतप्रमालक्षणेऽव्याप्तिदोषोऽतिव्याप्तिदोषश्च वर्तेते– 'अप्राप्तेरधिकव्याप्तेरलक्षणमपूर्वदृक्'।[३६] यद्यनधिगतविषयकज्ञानमेव प्रमा स्यात्तर्हि निरवच्छिन्नज्ञानविषयेऽव्याप्तिदोषो वर्तते। कारणं निरवच्छिन्नज्ञाने प्रथमज्ञानोत्तरज्ञानं सर्वमप्यप्रामाण्यस्य विषयः। इन्द्रियार्थसन्निकर्षेण यत् प्रत्यक्षमुत्पद्यते तस्य प्रथमज्ञानाधिगतविषयकत्वेऽपि तदनन्तरज्ञानानां सर्वेषां पूर्वज्ञानगृहीतविषयस्य प्रकाशकत्वात्तेषां सर्वेषामप्रामाण्यस्य प्रसङ्गापत्तिरिति। किन्तु निरवच्छिन्नज्ञानानां प्रामाण्यं सर्वलोकसिद्धः। कुमारिलभट्टश्लोकेन तत्स्पष्टतया प्रतीयते यथा–

'सिद्धानुगममात्रं हि कर्त्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्'॥[३७]

प्रमाणलक्षणं यथाऽव्याप्तिदोषग्रस्तन्तद्वदतिव्याप्तिदोषेणापि दुष्टं वर्तते। 'इदं रजतम्' इत्यादिभ्रमात्मकज्ञाने लक्षणमिदमतिव्याप्तिदोषेण ग्रस्तम्। शुक्तौ यदा 'इदं रजतम्' इति ज्ञानं भवति तदा रजतत्वविशिष्टज्ञानमनधिगतविषयप्रकाशत्वात् प्रामाण्यस्य प्रसङ्गापत्तिः, परन्तु तद्यथार्थं नास्ति। अर्थाद् भ्रमात्मकज्ञाने प्रमाणलक्षणस्यातिव्याप्तिः।

उपर्युक्तपर्यालोचनया वक्तुं शक्यतेऽगृहीतग्राहित्वं प्रमाया लक्षणमिति कदापि स्वीकर्तुं न शक्यते। ईश्वरीयज्ञाने गृहीतग्राहित्वप्रसङ्गो न यथार्थ इति। ग्रन्थस्य चतुर्थस्तवके पञ्चमकारिकायामुच्यते च उदयनाचार्येण–

‘मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता।

तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते’॥[३८]

ईश्वरीयज्ञानस्य नित्यत्वेऽर्थादुत्पत्तिविनाशरहितत्वे तत्प्रमा भवितुं नार्हति। ईश्वरीयज्ञानं यथा प्रमा भवितुं नार्हति तथैव प्रमाणमपि भवितुं नार्हति। अतः प्रमाया आधाररूपेणेश्वरस्य प्रमातृत्वमपि न सिद्ध्यति। एतेषां सर्वेषां सम्यग्रूपेण व्याख्यानार्थमुपर्युक्तकारिकायां न्यायसम्मतप्रमात्वस्य प्रमातृत्वस्य च स्वरूपं निर्णीयते। एतस्या असङ्गतेर्दूरीकरणाय नैयायिकैः प्रमाया लक्षणमुच्यते– ‘तद्वति तत्प्रकारकानुभवः प्रमा’।[३९] अर्थाद्वस्तुनो यथार्थरूपेणानुभव एव प्रमा। अनित्येन विशेषितेश्वरज्ञानस्याप्रामाण्यं यथायोग्यं नास्ति। प्रकाशकारोऽप्युदयनाचार्यमतस्य पोषणञ्चकार यथा– ‘अनित्यत्वेन तद्विशेषणस्य गौरवेण व्यर्थत्वादित्यर्थः’।[४०] ईश्वरस्याप्रमात्वसिद्ध्यर्थं पूर्वपक्षिभिर्यदनुमानन्दर्शितं तद्वस्तुत आश्रयासिद्धि-दोषदुष्टं वर्तते। ‘ईश्वरज्ञानं न प्रमा फलानात्मकत्वाद्गगणवद्’ इत्यनुमाने यथाऽऽश्रयासिद्धिदोषो वर्तते तथा बाधितदोषोऽपि वर्तते। न्यायसम्मतेश्वर एव प्रमा। समवायसम्बन्धेन प्रमात्वस्य विद्यमानत्वादीश्वरः प्रमाता। अतो वृत्तौ यथार्थमेवोच्यते– ‘तदाश्रयस्य तु प्रमातृत्वमेतदेव, यत् तत्समवायः’।[४१]

**साधकप्रमाणेनेश्वरसिद्धिः–**

तार्किकशिरोमण्युदयनाचार्यो *न्यायकुसुमाञ्जलि*ग्रन्थे प्रधानतयेश्वरसत्ता प्रतिस्थापिता। ग्रन्थो यथायथरूपेण पर्यालोच्यते चेद् द्रष्टुं शक्यते निरीश्वरवादिनां मतखण्डनपूर्वकमीश्वरसत्तास्थापनमेवोदयनाचार्यस्य प्रधानोद्देश्यं वर्तते।

वस्तुसत्ताप्रतिपादनाय यथा बाधकप्रमाणाभावोऽपेक्षते तथैव साधकप्रमाणमप्यपेक्षते। अस्योद्देशस्य परिपूरणायानुमानप्रमाणस्यास्त्ररूपेण व्यवहार उदयनाचार्येण कृतः। अर्थात्प्रत्यक्षप्रमाणेन नास्त्यपि त्वनुमानप्रमाणेनेश्वरप्रतिष्ठा भवति। अन्धो यदा अन्धत्ववशात्कदाचिद्वृक्षस्योपरि विनिपतति तत्र वृक्षस्य कश्चन दोषो न तिष्ठति। एवमेवानुमानेनेश्वरस्य प्रामाण्यं प्रतिस्थापयत्यज्ञानवशाद्विपक्षिभिस्तदवगन्तुमपि न शक्यते। अतः पञ्चमस्तवके प्रथमकारिकायामुच्यत आचार्येण–

‘कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः’॥[४२]

अर्थात् कार्यायोजनधृतिपदप्रत्ययश्रुतिवाक्यसंख्याविशेषरूपहेतुभिरीश्वरसिद्धिर्भवति। प्रसङ्गादत्रोल्लेखनीयमस्ति यत्, धृत्यादेरिति पदघटितादिपदेन विनाशरूपहेतोर्ग्रहणान्नव हेतवोऽत्र भवन्ति।

साधकप्रमाणेष्वादिप्रमाणं भवति कार्यमिति। यत्कार्यत्वविशिष्टन्तत्कारण-विशिष्टमेव। नैयायिकमतानुसारेण जगत्कार्यवस्तु वर्तते सावयवत्वात्। अवश्यन्तत्कस्मादपि कारणादेवोत्पद्यते। अनुमानप्रमाणेनैव जगतः सकर्तृकत्वं सिद्ध्यति। कार्यद्रव्यमात्रं सकर्तृकम्। जगतः कार्यत्वात्तदवश्यं कर्तृविशिष्टम्। यः सर्वज्ञः सर्वशक्तिसम्पन्नस्तस्य सर्वज्ञसर्वशक्तिसम्पन्नस्येच्छावशाज्जीवानां कर्मानुसारेण जगतः सृष्टिरिति।

ईश्वरस्थापनस्य द्वितीयसाधकप्रमाणमायोजनमिति। जगत्सृष्टिनिमित्तं यत्परमाणुसंयोगो विद्यमानो वर्तते तेषां स्पन्दनक्रियात्वात्तदनुकूलसञ्चारत्वेन कश्चनावश्यं स्वीकर्तव्यः। अतस्तत्र ईश्वर एव स्पन्दनसञ्चारकः, नान्यः।

ईश्वरसाधकस्तृतीयहेतुर्धृतिरिति। धृतिपदस्यार्थः पतनाभावः। पृथिव्याः पतनाभावः परिलक्ष्यते। अत्र च पृथिव्याः पतनाभाव एव धृतिः। अत एवोच्यते– 'ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितम्, धृतिमत्त्वात्, वियतिविहङ्ग-मधृतकाष्ठवत्' [।४३]

ईश्वरसाधनस्य चतुर्थभूमिः पदमिति। 'पद्यतेऽनेनेति व्युत्पत्त्या 'पदं' व्यवहारः'।[४४] अर्थात्पदं नाम व्यवहारः। टीकायां सम्यक्तयोच्यते– 'पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः, व्यवहारत्वादाधुनिकलिप्या-दिव्यवहारवत्'।[४५]

ईश्वरसाधकः पञ्चमहेतुः प्रत्यय इति। प्रत्ययो नाम प्रमाणम्। वेदस्य सूक्ष्मातिसूक्ष्मविचारविद्यमानतात् वेदस्य रचयितृरूपेणैतादृशः कश्चन स्वीकर्तव्यो यः कालत्रयज्ञानविशिष्टः, इन्द्रियातीतविषयस्य साक्षाज्ज्ञाता चेति। एतादृशश्चेश्वरं विहाय नान्यो भवितुमर्हति।

ईश्वरसाधकं षष्ठप्रमाणं श्रुतिरिति। श्रुतिर्नाम वेदः। अभ्रान्तवेदो वाक्यमयत्वादवश्यमीश्वरकर्तृकम्। श्रुतावीश्वरास्तित्वं स्वीक्रियत एव। *बृहदारण्यकोपनिषद्युच्यते*– 'स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु ष एवं वेद'।[४६]

ईश्वरस्थापनस्य सप्तमहेतुर्वाक्यमिति। वाक्यत्वहेतुविशिष्टत्वाद्वेदोऽवश्यं पौरुषेयः। उच्यते च– 'किञ्च वेदः पौरुषेयो वाक्यत्वाद् भारतादिवद्। वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवत्'।[४७]

ईश्वरसत्तास्थापनस्याष्टमसाधकः संख्याविशेष इति। द्वित्वसंख्याज्ञानमीश्वरं विना कस्मिन्नपि स्थातुं नार्हति। अतष्टीकायां यथार्थमुच्यते– 'द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात्'।[४८]

विश्वसंसारमञ्चस्य नियन्त्रकरूपेण सर्वजनविदित ईश्वरः। सोऽवश्यमेव सर्वद्रष्टा, सर्वज्ञाता, सर्वशक्तिमांश्चास्मिन् विषये नास्ति कोऽपि सन्देहः।

प्रत्यक्षातीत ईश्वरोऽवश्यमेवानुमानगम्य:। अन्तरालस्थितेनेश्वरेणैव नियन्त्रितं संसाररूपमिदं जगत्। *श्रीमद्भगवद्गीताया*ं यथार्थमुच्यते–

‘उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः’।।[४९]

**तथ्यसूत्राणि**–

१. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, १/४, पृ.– ४१।

२. प्रकाशः, तदेव, पृ.– ४२।

३. *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– २१।

४. तत्रैव।

५. हरिदासी, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– ३४।

६. बोधिनी, *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ४२।

७. प्रकाशः, तदेव, पृ.– ४४।

८. हरिदासी, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– ३५।

९. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, १/९, पृ.– १०७।

१०. तदेव, १/१५, पृ.– १८०-१८१।

११. हरिदासी, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– १०८।

१२. तदेव, पृ.– ९९।

१३. तदेव, १/१४, पृ.– ९५।

१४. *सर्व. बौ. ओ जैन.*, सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– १५।

१५. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, १/१६, पृ.– १८३-१८४।

१६. *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ७१।

१७. हरिदासी, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– १३७।

१८. तदेव, १/१९, पृ.– १३५।

१९. *श्री. गीता*, विनायकगणेशः आपटे, २/२७, पृ.– ६१।

२०. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, २/३, पृ.– ९४।

२१. हरिदासी, तदेव, पृ.– १०७।

२२. *मा. मेय.*, सम्पा.  सि कुन्हान् राजा एस् एस् सूर्यनारायणशास्त्री च, पृ.– १३२।

२३. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, ३/१, पृ.– ३१२।

२४. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– २२९।

२५. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, ३/३, पृ.– ३३०।

२६. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– २३६।

२७. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, ३/२, पृ.– १०५।

२८. हरिदासी, तत्रैव।

२९. तदेव, ३/१७, पृ.– १५२।

३०. व्याख्याविवृतिः, तदेव, पृ.– १५३।

३१. 'तथा च उपदेशं विना यस्य ज्ञानं प्रवर्त्तकं भवेत्तस्यापि सर्वज्ञ इत्यत्र ..........सर्वज्ञत्वाभावसाधिकेति फलितार्थः'।– व्याखाविवृतिः, तदेव, पृ.– १५५।

३२. 'वेदस्यानर्थक्यापत्तिरिति तथा च उपदेशसद्भावेऽपि यत्र अदृष्टं नास्ति तत्र प्रवृत्त्यनुत्पत्तौ सर्वत्रादृष्टमेव कारणमिति महाजनपरम्पराणां वेदोपदेशस्य विफलत्वेन वेदस्यानर्थक्यप्रसङ्ग इति भावः'।– व्याखाविवृतिः, तदेव, पृ.– १५६।

३३. *श्लो. वार्त्ति.*, सम्पा. रामशास्त्री, १/८०, पृ.– ७०।

३४. *प्र. वार्त्ति.*, सम्पा. द्वारिकादासशास्त्री, १/५, पृ.– ५।

३५. तदेव, १/७, पृ.– ८।

३६. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, ४/१, पृ.– १७७।

३७. *श्लो. वार्त्ति.*, सम्पा. रामशास्त्री, १/१३३, पृ.– १७५।

३८. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, ४/५, पृ.– १८८।

३९. *तर्क. सं.*, सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ६७।

४०. प्रकाशः, *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ४७५।

४१. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– ३७३।

४२. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, ५/१, पृ.– १९३।

४३. हरिदासी, तदेव, पृ.–१९४।

४४. तत्रैव।

४५. तत्रैव।

४६. बृहदारण्यकोपनिषद्, *उप. सं.*, सम्पा. चित्तरञ्जनघोषालः, ४/४/२४, पृ.– ५९७।

४७. हरिदासी, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १९४।

४८. तत्रैव।

४९. *श्री. गीता*, सम्पा. विनायकगणेशः आपटे, १५/१७, पृ.– ४३७।

# पञ्चमोऽध्यायः

## आत्मविषये ग्रन्थद्वयस्य तुलनात्मकमालोचनम्

उदयनाचार्यकृतेषु ग्रन्थेष्व*आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्च*ेति ग्रन्थद्वयं स्वतन्त्रमेव भवति। ग्रन्थद्वयेऽत्यन्तं काठिन्यमनुभूयते चेदपि दार्शनिकतत्त्व-प्रतिपादने एतयोर्माहात्म्यमविस्मरणीयमेव। ग्रन्थद्वयस्य पर्यालोचनेन ग्रन्थद्वयस्य सादृश्यं विद्यते चेदपि वैसादृश्यस्यापि सद्भावात्पृथग्ग्रन्थरूपेण स्वीकृतिर्भवत्येव।

**सादृश्यम्**–

१. उदयनाचार्यकृतेषु ग्रन्थेष्वात्*मतत्त्वविवेको न्यायकुसुमाञ्जलिश्च*ेति ग्रन्थद्वयं स्वतन्त्रमेव। अर्थाद् ग्रन्थद्वयं कामपि टीकां तथा भाष्यमवलम्ब्य नैव रचितम्। दर्शनशास्त्रं प्रधानतो मोक्षशास्त्रमेव। धर्मार्थकाममोक्षेषु परमपुरुषार्थो मोक्षः सर्वदर्शनस्य परमकाम्यः। आत्मतत्त्वविषयकं ज्ञानमेव मोक्षस्य साक्षात्कारणस्वरूपम्। आत्मतत्त्वप्रतिपादनमेव ग्रन्थद्वयस्य मुख्यविषयो वर्तते।

२. कस्यचित् शास्त्रस्य एकांशेन सहितं शास्त्रस्य प्रतिपाद्यविषयज्ञापनमेव प्रकरणग्रन्थ इति।[१] पर्यालोचनेन ज्ञायते यत्, आत्मतत्त्वविषय-कालोचनामाध्यमेन मोक्षप्राप्तेरुपाय एवास्य ग्रन्थस्य प्रधानोद्देश्यम्। अतो ग्रन्थद्वयमपि प्रकरणग्रन्थविशेषः।

३. आत्मस्थापनार्थ*मात्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वये यथा क्षणभङ्गवादस्य तथैवानुपलम्भवादस्य सविस्तरमालोचनापूर्वकं खण्डनं दृश्यते।

४. ग्रन्थद्वये संक्षेपेणाऽऽत्मनः स्वरूपकथनमपि परिलक्ष्यते।

५. *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वये आत्मनः सद्भावप्रमाणमपि विद्यते।

**वैसादृश्यम्**–

**१. आत्मतत्त्वस्थापने ग्रन्थद्वयस्य तुलनात्मकमालोचनम्**–

***आत्मतत्त्वविवेक*ग्रन्थे आत्मतत्त्वस्थापनम्**–

धर्मार्थकाममोक्षा इति चतुर्विधपुरुषार्थेषु परमपुरुषार्थो मोक्षः। आत्मसाक्षात्कारो मुक्तेः साक्षात्कारणम्। अत आत्मस्वरूपनिर्णये सर्वेऽपि दार्शनिका आग्रहिणः स्वल्पाधिक्येन दृश्यन्ते। कस्यापि तत्त्वस्योपपादनाय स्वपक्षस्य स्थापनं परपक्षस्य निराकरणञ्च कर्तव्यम्। अत आचार्येणा*त्मतत्त्वविवेक*ग्रन्थे परपक्षस्य खण्डनपूर्वकं स्वपक्षस्य स्थापनमिति मार्गस्यावलम्बनं क्रियते। *आत्मतत्त्वविवेके* जीवात्मविषयकमालोचनं वर्तते। अत एवोच्यते–

‘प्रतियोग्यनुयोगितया चात्मैव तत्त्वतो ज्ञेयः’।[२]

अर्थात्प्रतियोगितयाऽथवाऽनुयोगितयात्मज्ञानमेव मोक्षस्य कारणम्। बौद्धमते प्रतियोगितयाऽऽत्मज्ञानं सम्भवति। नैयायिकवेदान्तिनां मते त्वनुयोगितया-ऽऽत्मज्ञानं सम्भवति। श्लोकश्चास्मिन् प्रसङ्गे दृश्यते यथा–

'नैरात्म्यदृष्टिं मोक्षस्य हेतुं केचन मन्वते।
आत्मतत्त्वधियं त्वन्ये न्यायतत्त्वानुसारिणः'॥[३]

अर्थाद्बौद्धमते नैरात्म्यज्ञानमेव मुक्तिकारणम्। अपरपक्षे न्यायप्रभृति-दार्शनिकेष्वात्मज्ञानं मुक्तिकारणम्। बौद्धसम्मतनैरात्म्यवादस्य मूलं वस्तुतोऽनित्यवाद एव। बौद्धदर्शने 'आत्मन्' इति शब्दः 'स्थायी द्रव्यम्' इत्यर्थे पर्यवस्यति। तथा च नैरात्म्यवादस्य स्थायी आत्मा(द्रव्यम्) नास्तीत्यर्थः समागच्छति। नैरात्म्यवादे परिवर्तनमेव परमसत्यम्। अस्मिन् जगति नास्त्येतादृशं वस्तु, यस्य परिवर्तनं न भवति। एवञ्च जगति परिवर्तनरहितं नास्ति किमपि, जगति यत्किमपि दृश्यते तत्परिवर्तत एव। तेन चात्मनोऽपि नित्यत्वं न सम्भवति। केचन चाऽऽत्मनः स्थायित्वं स्वीकृत्य सुखादीन् कामयन्त्यात्मानञ्च सुखादीनां भोक्तृत्वेन स्वीकुर्वन्ति। एवञ्च कामनावशाच्छास्त्रविहितकर्मणस्तथा निषिद्धकर्मणोऽनुष्ठानं कुर्वन्ति। विहितनिषिद्धकर्मप्रभावाद्धर्माधर्मादय उत्पद्यन्ते। विहितनिषिद्धकर्मजनितधर्माधर्मादिवशाज्जीवा जन्म लभन्ते। जन्मवशाच्च जरादुःखादिषु ग्रस्ता भवन्ति। केचन यदि परिवर्तनशीलविज्ञानप्रवाह एवाऽऽत्माऽर्थादात्मनोऽस्थायित्वं स्वीकृत्य नैरात्म्यवादं चिन्तयित्वा

सुखदुःखादीनि न कामयन्ति, ते तर्हि कामनाविरहवशात्कर्मविरहा भवन्ति। कर्माभावाद्धर्माधर्मादीनामभावो भवति। धर्माधर्मादीनामभावाज्जन्म न लभन्ते। जन्माभावाद्दुःखादिभोगेभ्यो विनिवर्तन्ते। इयञ्च दुःखनिवृत्तिरेव मुक्तिः। अतो बौद्धसम्मतनैरात्म्यवादस्य चिन्ताऽथवात्माऽभावविषयकज्ञानमेव मुक्तिकारण-मिति वदन्ति बौद्धाः। एवञ्चाऽभावविषयकज्ञाने प्रतियोगिज्ञानं कारणं भवति। अत्र चात्माभावविषयकज्ञाने आत्मा प्रतियोगी। अभावज्ञाने प्रतियोगि-ज्ञानमवश्यंभावी, अत आत्मनोऽभावज्ञाने प्रतियोगिस्वरूपात्मज्ञानमावश्यकम्। नैरात्म्यभावनायां प्रतियोगिरूपेणात्मज्ञानस्य मुक्तिकारणत्वात्प्रतियोगिरूपात्मा-ऽवश्यं ज्ञेयः।

अपरपक्षे न्यायप्रभृतिदर्शने याथार्थ्येनाऽनुयोगितयानुभूतात्मतत्त्वज्ञानमेव मुक्तेः कारणम्। नैयायिकाश्चात्मनो नित्यत्वं स्वीकुर्वन्ति। अर्थादुत्पत्ति-विनाशरहितत्वे सत्यात्मसत्तां स्वीकुर्वन्ति। इममात्मानं देहादिव्यतिरिक्तत्वेन यदा गृह्णाति तदैवात्मविषयकमिथ्याज्ञानं दूरीभवति। आत्मविषयकमिथ्याज्ञान-निवृत्तावेव मुक्तिर्भवति। अर्थादात्मा देहातिरिक्त इति मननात्मकज्ञानमात्मानुयोगिकेतरभेदज्ञानम्। अस्मिंश्च ज्ञाने भेदस्यानुयोग्यात्मेति। देहादिभिन्नस्याऽथवा देहाद्यभावस्याऽनुयोगिरूपात्मविषयकज्ञानमेव तत्त्वज्ञानम्। एवञ्चेदं तत्त्वज्ञानमेव मुक्तेः कारणम्। एवञ्च तत्त्वज्ञानरहितमिथ्याज्ञानवशादेव

जीवाः संसाराब्धौ निमज्जिता भवन्ति। एवञ्च तत्त्वज्ञानेन मिथ्याज्ञानापगते सति क्रमेण जन्मदुःखादीनां निवृत्तिर्भवति। अतश्चोच्यते *न्यायसूत्रग्रन्थे*–

'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायापवर्गः'।[४]

परन्तु तत्त्वज्ञानलाभाव्यवहितोत्तरमेव शरीरनाशो न भवति। तत्त्वज्ञपुरुषः कायविशिष्टत्वेन किञ्चित्कालं तिष्ठति। जीवानामियमवस्थैव जीवन्मुक्तिरित्युच्यते। जीवनमुक्त्यवस्थायां मनःशरीरयोः संयोगो विद्यत एव। प्रारब्धकर्मविनाशेन शरीरविनाशरूपमुक्तिर्विदेहमुक्तिरित्युच्यते। विदेहमुक्तिरथवा दुःखस्यात्यन्तिकनिवृत्तिरूपमुक्तिरेव परममुक्तिः। अतः सम्यग्रूपेणात्मप्रतिपादनाय *आत्मतत्त्वविवेक*ग्रन्थे परिच्छेदचतुष्टये यथाक्रमेण क्षणभङ्गवादस्य, बाह्यार्थभङ्गवादस्य, गुणगुणिभेदभङ्गवादस्य, अनुपलब्ध्यभावसाधकवादस्य च खण्डनं क्रियते। क्षणभङ्गवादस्य खण्डनेनात्मनो नित्यत्वं प्रतिस्थापितम्। पुनश्चात्मनो ज्ञानातिरिक्तत्वं प्रतिस्थाप्यते बाह्यार्थभङ्गवादखण्डनेन। न केवलं एतदपितु गुणगुणिभेदभङ्गवादखण्डनेन भवत्यात्मसिद्धिर्ज्ञानसुखादेराश्रयरूपेण। इत्थञ्चानुपलब्ध्यभावसाधकवादखण्डनेनात्मनो देहातिरिक्तत्वं स्थापितम्। अर्थात्पूर्वपक्षिरूपेण बौद्धान् स्वीकृत्य तेषां विविधमतानां खण्डनपुरःसरं न्यायसम्मतस्य शरीराद्यतिरिक्तनित्यविभुज्ञानवत्सुखादेराश्रयरूपेण जीवात्मनः प्रतिपादनं कृतम्।

***न्यायकुसुमाञ्जलिग्रन्थे* आत्मतत्त्वस्थापनम्**–

*न्यायकुसुमाञ्जलिग्रन्थस्य* प्रारम्भे मङ्गलश्लोके ईश्वरपादपद्मे न्यायरूपकुसुमस्याञ्जलिमाध्यमेन चित्तैकाग्र्यं प्रार्थ्यते। न्यायवैशेषिकदर्शने आत्मसाक्षात्कार एव मोक्षस्य कारणम्। इदानीं प्रश्नः कश्चन समुदेति स्वात्मतत्त्वज्ञानादेव दुःखस्यात्यन्तिकनिवृर्त्तिरूपमुक्तिलाभस्य सम्भवाद् ईश्वरोपासनायाः प्रयोजनमस्ति न वेति। उत्तरावसरे चोच्यते ईश्वरानुग्रहं विना स्वात्मयोगोऽसम्भवः, स्वात्मयोगविरहादात्मज्ञानमपि न सम्भवति। प्रसङ्गेऽस्मिन् *श्रीमद्भगवद्गीतायां* भगवता कृष्णेन कथ्यते–

‘तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते’॥[५]

अर्थादीश्वरोपासनां विनाऽऽत्मविषयकभावनाऽसंभवी। ईश्वरमननस्वात्मसाक्षात्कारेण मुक्तिरुत्पद्यते। अर्थादीश्वरः प्रसन्नः सन्नेवोपासकेभ्य आत्मसाक्षात्कारं प्रयच्छति। आत्मसाक्षात्कारेण च मोक्षः प्राप्यते। प्रसङ्गेऽस्मिन् व्याख्याविवृत्तिटीकायामुच्यते– ‘यद्यपीश्वरमननं मिथ्याज्ञानोच्छेदद्वारा नोपयोगि, तथापि स्वात्मसाक्षात्कार एव उपयुज्यते। अत एवोक्तम् ‘स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोति’ इति तन्निरूपणमपि प्रयोजनवदिति’।[६] अत्रेश्वरमननात्मकोपासना *न्यायकुसुमाञ्जलिग्रन्थस्य* प्रतिपाद्यविषयः। अतो ग्रन्थकारेणोच्यते–

'न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवनान्तरागता'॥[७]

*न्यायकुसुमाञ्जलावी*श्वरस्य मननात्मकोपासनार्थं स्तवकपञ्चके पञ्च विप्रतिपत्तिवाक्यानि[८] प्रदर्शितानि–

(क) अलौकिकपरलोकसाधनं नास्ति।

(ख) ईश्वरस्याभावेऽपि परलोकसाधनं यागादिना सम्भवति।

(ग) ईश्वरस्याभावसाधकं प्रमाणं वर्तते।

(घ) ईश्वरस्य भावसत्त्वेऽपि तस्य प्रामाण्यं नास्ति।

(ङ) ईश्वरसाधकं किमपि प्रमाणं नास्ति।

एतत्सर्वं प्रतिपाद्य तस्य खण्डनञ्च कृत्वा पञ्चदर्शनानां यथा चार्वाकः, मीमांसकः, बौद्धः, जैनः, सांख्यदर्शनञ्चेत्येतेषां मतस्य क्रमेण खण्डनं कृत्वा धर्माधर्मरूपादृष्टफलप्रदातृरूपेण परमात्मनः प्रतिपादनं वर्तते। वस्तुतो जीवानां धर्माधर्मादीन् विविच्यैव ईश्वरः संसारं सृजति, फलभोगाय च प्रेरयति। जीवः शुभकर्मवशात् शुभफलं भुङ्क्ते, अशुभकर्मवशाच्चाशुभफलमश्नुते। जीवानां कर्मानुष्ठानाव्यवहितानन्तरमेव फलप्राप्तिर्न भवति। कर्मणः क्षणस्थायित्वा-त्कालान्तरीयफलस्य कारणमपि न भवितुमर्हति। कर्मानुष्ठानव्यवहिते सति प्राप्तफलभोगस्य कारणरूपेण क्षणस्थायिकर्मणः कालान्तरीयफलस्य च योगमाध्यमं वस्तुतस्तु धर्माधर्मरूपादृष्टमेव। अत एवोच्यते–

'चिरध्वस्तं फलायालं न कर्मातिशयं विना।

सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि'॥[९]

कर्मफलजनितादृष्टस्याचेतनत्वाददृष्टानुसारेण शुभाशुभफलप्रदातृव्यवस्था स्वयं भवितुं नार्हति। तदर्थमवश्यं कस्यचन कर्तुरपेक्षा वर्तते एव। अचेतनादृष्टाधिष्ठातृरूपेण चैतन्यस्वरूपस्य ईश्वरसिद्धिरपेक्षते एव। तथा च दृश्यते–

'कर्तृधर्मानियन्तारश्चेतिता च स एव नः।

अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः'॥[१०]

*न्यायकुसुमाञ्जलि*रिति ग्रन्थो याथार्थ्येन पर्यालोच्यते चेज्ज्ञायतेऽनुमान-प्रमाणेनोदयनाचार्येणेश्वरस्थापनरूपोद्देश्यस्य पूर्तिः कृता। कश्चनाऽन्धो यदा विषमे पथि गच्छन् विनिपतति तदा पथो दोषो नात्र भवति, अन्धत्वमेवात्र कारणम्। एवञ्च *न्यायकुसुमाञ्जलि*ग्रन्थेऽपि विपक्षभिरनुमानप्रमाणस्थापितामात्मसत्तां बुद्धिमान्द्यत्ववशादवगन्तुं न शक्यते । अत एवाचार्येणोदयनेन पञ्चमस्तवके प्रथमकारिकायामुच्यते–

'कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।

वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः'॥[११]

अर्थात्कार्यम्, आयोजनम्, धृतिः, पदम्, प्रत्ययः, श्रुतिः, वाक्यम्, संख्याविशेषश्चेत्यादिहेतुभिरीश्वरसिद्धिर्दर्शिताऽऽचार्येणोदयनेन।

**निष्कर्षः**– आलोचनेनानायासेन ज्ञाप्यते यत्, आत्मस्थापनमुभयो-ग्रन्थयोर्मुख्यविषयो भवति चेदप्याऽऽत्मनो भिन्नत्वमवश्यं सुष्ठुतया परिलक्ष्यते। *आत्मतत्त्वविवेक*ग्रन्थे जीवात्मविषयकपर्यालोचनं विद्यते, एवञ्च *न्यायकुसुमाञ्जलि*ग्रन्थे प्राधान्येन परमात्मविषयकपर्यालोचनं विद्यते।

## २. आत्मस्थापनार्थं ग्रन्थद्वये क्षणभङ्गवादस्य तुलनात्मकमालोचनम्–

### ***आत्मतत्त्वविवेक*ग्रन्थे क्षणभङ्गवादखण्डनेनात्मस्थापनम्**–

प्रपञ्चेऽस्मिन्सर्वजनसंवेदनसिद्धं निसर्गप्रतिकूलस्वभावं दुःखं परिहर्तुं सर्वे तदुपायमनुसन्धित्सवः सन्ति। आध्यात्मिकदुःखनिवृत्तिविषये सर्वाध्यात्मिकवत्त-त्त्वज्ञानमात्मतत्त्वज्ञानं वा तदुपायरूपेणाकर्णयन्तीति हेतोरात्मतत्त्वमस्मिन् ग्रन्थे प्रतिपाद्यते। परन्तु कस्यचिद् विषयस्य स्थापनाय यथा साधकं किञ्चिद् दातव्यं तथैव तस्य बाधकस्य खण्डनमपि कर्तव्यं भवति। अतस्तस्यात्मतत्त्वस्य साधकप्रमाणस्थापनं बाधकप्रमाणखण्डनञ्चोभयग्रन्थे प्रतिपादितम्। आदौ तावदुभयग्रन्थे क्षणभङ्गवादस्य खण्डनपुरःसरं कथमात्मतत्त्वस्य प्रतिपादनं वर्तते तदालोच्यते।

### **क्षणभङ्गवादे क्षणिकत्वस्य स्वरूपम्**–

आत्मतत्त्वप्रतिपादनाय बौद्धसम्मतक्षणिकत्ववादस्य खण्डनं विधातव्यम्। क्षणभङ्गवादज्ञानात्पूर्वं ज्ञातव्यमस्ति किं नाम क्षणिकत्वम्। शिरोमणिना

क्षणिकत्वस्य लक्षणमवोचि– 'स्वाधिकरणसमयप्रागभावाधिकरण-क्षणानुत्पत्तिकत्वे सति कादाचित्कत्वम्'[१२] अथवा 'स्वाधिकरणसमयप्राग-भावाधिकरणक्षणानुत्पत्तिकत्वे सति उत्पत्तिमत्त्वम्'।[१३] स्वस्य योऽधिकरणभूतसमयस्ततः प्राक् योऽधिकरणभूतः समयः, तस्मिन् समयेऽनुत्पन्नः, परन्तु तस्मात् क्षणात्परं कदाचिद्विद्यमानोऽथवा उत्पन्नः यः पदार्थः स क्षणिकपदार्थः। तथा हि नीलपदार्थः(बौद्धमते द्रव्यरूपं नास्त्यन्यद्वस्तु, वस्तुतो नीलगुणादेरेव समष्टिः घटादिपदार्थः) क्षणिकपदार्थः। तद्यथा– स्वं नीलः, स्वाधिकरणसमयो नीलपदार्थो यस्मिन् समये उत्पद्यते स समयः, तस्य प्रागभावाधिकरणक्षणो नीलपदार्थस्योत्पत्तेः पूर्वक्षणः। तस्मिन् समये नीलपदार्थस्यानुत्पन्नत्वात् किन्तु परस्मिन् क्षणे कदाचिद् विद्यमानत्वादथवा उत्पन्नत्वाद् नीलपदार्थः क्षणिकपदार्थः। एतद् ज्ञेयमस्ति यत्, अत्र क्षणत्वस्य लक्षणं शिरोमणिना स्वीकृतं यत्– 'क्षणश्च स्वाधेयपदार्थप्रागभावा-नाधारसमयः'।[१४]

दीधितिकारेण प्रागभावो नैव स्वीक्रियते इति हेतोः क्षणिकत्वस्य लक्षणमवोचि– 'स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोग्यवृत्तित्वं क्षणिकत्वम्'।[१५] अर्थात् स्वाधिकरणक्षणे विद्यमानो यो ध्वंसः, तस्य ध्वंसस्य यत्प्रतियोगी तत्रावृत्तित्वं क्षणिकत्वम्। अर्थात् स्वं नीलादिः, स्वाधिकरणक्षणवृत्तिध्वंसः तत्पूर्वकालिकपदार्थस्य ध्वंसः, तस्य ध्वंसस्य प्रतियोगी स एव

पूर्वकालिकपदार्थः, तस्मिन् पूर्वकालिकपदार्थे परक्षणस्थितपदार्थस्यावृत्तित्वात् नीलादिः क्षणिकपदार्थः। अत्र 'क्षणत्वं स्वावृत्तियावत्स्ववृत्तिध्वंसप्रतियोगि-कत्वम्'[१६] इति शिरोमणिरवोचत्। दीधितिकारेण क्षणस्य लघुलक्षणं कृतमस्ति यत्– 'स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं वा'[१७] इति।

**बौद्धसम्मतक्षणवादस्वरूपम्**–

उपर्युक्तरूपेण क्षणिकत्वे निर्णीते सति प्रश्नोऽवश्यमागच्छेदात्मापि क्षणिकपदार्थो वा। तत्र न्यायवैशेषिकनये प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि चेति स्वीकृतेषु पञ्चावयवेष्वपि बौद्धनये तु न्यायस्यावयवद्वयं स्वीकृतम्। यथा– उदाहरणम्, उपनयश्चेति। बौद्धमतेऽवयवद्वयाद् व्याप्तिः पक्षधर्मताज्ञानं च क्रमशः सम्पद्येते। ततोऽनुमितिरुत्पद्यते। बौद्धमते क्षणिकत्वविषये प्रमाणमेतादृशं वर्तते यथा– 'यत् सत् तत् क्षणिकम्, यथा घटः। संश्च विवादाध्यासितः शब्दादिः'।[१८] अनुमानस्थलमिदं दृश्यते अन्यत्रापि।[१९] अत्र 'यत् सत् तत् क्षणिकम्, यथा घटः' इत्युदाहरणवाक्यतः सत्तायां क्षणिकत्वस्य व्याप्तिज्ञानं भवति, 'संश्च विवादाध्यासितः शब्दादिः' इत्युपनयवाक्यतः शब्दादिपक्षधर्मताज्ञानं भवति। तत एव 'शब्दादिः क्षणिकः' इति क्षणिकत्वस्यानुमानं सिद्ध्येत्। परन्तु संशयोऽत्र भवति बौद्धमतेऽवयवपुञ्जातिरिक्तावयव्यसिद्धः खलु तर्हि कथं क्षणिकत्वानुमाने घटस्य दृष्टान्तरूपेण ग्रहणमिति। अपरश्च संशयो भवति, उभयवादिसिद्धस्यैव दृष्टान्त इति सर्वैरप्यङ्गीक्रियते। परन्तु घटस्य बौद्धमते क्षणिकत्वे सिद्धेऽपि

न्यायवैशेषिकमते त्वसिद्धः। अतः क्षणिकत्वानुमाने कथं घटस्य दृष्टान्तत्वेन स्वीकारो भवितुमर्हतीति।

अस्य संशयस्य समाधानं शिरोमणिना प्रतिपादितम्– स्थूलद्रव्यमत्र दृष्टान्तरूपेण दर्शितम्, अतो घटस्य क्षणिकत्वेऽसिद्धेऽपि घटस्य क्षणिकत्वसाधनात्परं दृष्टान्तो भवितुमर्हति। अथवाऽत्र 'घटः' इति पदेन कुर्वद्रूपत्वविशिष्टपरमाणुसमूहः(यस्मात्कार्यपदार्थः उपद्यते तत्कुर्वद्रूपम्) ज्ञाप्यते। अथवा घटोऽत्र व्यतिरेकदृष्टान्तत्वेन प्रयुक्तो भवति– यत् सत् तत् क्षणिकमिति, यत् क्षणिकं नास्ति तन्न सत् यथा घट इति। अत्र 'विवादाध्यासितः' इति विशेषणमन्तिमशब्दस्य सिद्धसाधनं निषेधाय प्रयुक्तम्। केवलं 'शब्दादिः सत्' इत्युक्ते सत्यन्तिमशब्दस्य सद्रूपेण तथा क्षणिकत्वरूपेण सिद्धत्वात् सिद्धसाधनदोष आपतति। अतस्तस्य वारणाय 'विवादाध्यासितः' इति विशेषणम्। अथवा 'विवादाध्यासितः' इति विशेषणं पक्षस्य स्वरूपकथनमात्रम्। शब्दादिः स्वरूपतः क्षणिको न वेति विवादविषयः। वस्तुतः स्वरूपकथनपक्षेऽन्तिमशब्दस्य ग्रहणेऽप्यापातदृष्ट्या सिद्धसाधनदोषापत्तावपि वास्तविके तथा न भवति। यतो हि पक्षतावच्छेदकसामानाधिकरण्येन साध्यसाधने पक्षस्यैकांशे साध्यसिद्धे सत्यपि यावत्पक्षं स्वीकृत्य साध्यसाधनस्योद्देश्यत्वादनुमितेः पूर्वं यावत्पक्षे साध्यसिद्धेरनुत्पन्नत्वात् सिद्धसाधनदोषो न भवेत्। अतो विवादाध्यासितपदं स्वरूपकथनपरमिति।[२०]

***आत्मतत्त्वविवेके* क्षणिकत्ववादखण्डनमात्मतत्त्वप्रतिष्ठा च**–

आत्मतत्त्वस्थापनायागतस्य बाधकस्य खण्डनाय बौद्धसम्मतस्य क्षणभङ्गस्यालोचनाऽत्र वितन्यते। वस्तुतस्तु बौद्धसम्मतेषु चतुर्षु बाधकेष्वन्यतमबाधकं क्षणभङ्ग इति। क्षणिकत्ववादस्य स्वरूपमुपर्यालोचितम्। तस्य खण्डनावसरे आदावेवात्*मतत्त्वविवेके* उच्यते– क्षणभङ्गो बाधकं भवितुं नार्हति प्रतिबन्धासिद्धेः।[२१] अत्र प्रतिबन्धो व्याप्तिः, व्याप्तेरसिद्धत्वात् क्षणभङ्गवादो बाधकं भवितुं नार्हतीति।

**सामर्थ्यासामर्थ्यरूपविरुद्धधर्मद्वयस्य संसर्गः**–

पूर्वपक्षिभिः क्षणिकत्ववादसमर्थनाय पुनरुच्यते क्षेत्रस्थबीजमङ्कुरमुत्पादयति किन्तु कुशूलस्थितबीजमङ्कुरं नोत्पादयति। अतः क्षेत्रस्थाङ्कुरोत्पादकबीजेभ्यः कुशूलस्थितबीजस्य भेदोऽवश्यं स्वीकार्यः। तद्वदेकस्मिन् कुशूलस्थितबीजेऽपि प्रतिक्षणं विभिन्नक्रिया दरीदृश्यते। अतः कुशूलस्थितबीजेष्वपि भेदोऽवश्यं स्वीकर्तव्यः। एकस्मिन् बीजे प्रतिक्षणं विभिन्नक्रिया सम्पद्यते किन्तु प्रतिक्षणं विभिन्नक्रियां प्रत्येकस्य बीजस्य कारणं नैव स्वीकर्तुं शक्यते। विभिन्नक्रियायामेकस्य बीजस्यैकस्मिन्क्षणे सामर्थ्ये सति तस्मिन् क्षणे एव तेनैव बीजेन विभिन्नक्रियोत्पद्येत। अर्थादेतत्स्वीकर्तव्यमेकस्मिन् क्षणे एकस्य पदार्थस्यैकक्रियां प्रत्येव कारणं भवति

तत्क्षणेऽन्यपदार्थः तत्क्रियां प्रति कारणं न भवति। अतस्तत्तत्क्रियायाः कारणेभ्यस्तत्तत्क्रियाया अकारणं भिन्नमेवेति स्पष्टं प्रतीयते। अत एकक्षणे कार्यसामर्थ्यस्य कार्यासामर्थ्यस्य चेति धर्मद्वयस्य समावेशो नैव सम्भवति। एवञ्च प्रतिक्षणं विभिन्नक्रियोत्पद्यमानत्वाद् विभिन्नक्रियां प्रति विभिन्नपदार्थस्य भेदस्य स्पष्टप्रतीयमानत्वात्तेषां भेदोऽपि सिद्ध्यति। किञ्च भेदसिद्धत्वात् प्रतिक्षणं क्रियाजनकविभिन्नपदार्थानां सत्ता गोचरीभूतत्वात्क्षणिकत्ववादोऽपि सिद्ध्यति।

**सामर्थ्यासामर्थ्यरूपविरुद्धधर्मद्वयस्य संसर्गस्यासिद्धत्वम्**–

उपर्युक्तसामर्थ्यासामर्थ्यविरुद्धधर्मद्वयस्य संसर्गखण्डनायाऽवोच्युदयनाचार्येण– 'सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गेण भेदसिद्धौ तत्सिद्धिरिति चेन्न विरुद्धधर्मसंसर्गासिद्धेः'।[२२] अर्थात्सामर्थ्यासामर्थ्यरूपविरुद्धधर्मयोः संसर्ग एव न सिद्ध्यतीत्यत्र जिज्ञासा काचनावश्यमुत्पद्येत कथमनयोः संसर्गोऽसिद्ध इति। कल्पतलाटीकायामुच्यते– 'स्वरूपयोग्यत्वस्वरूपायोग्यत्वयोर्ययोर्विरोधस्तयोः संसर्ग एव नास्ति संसृष्टत्वेनानुभूयमानकारित्वाकारित्वयोस्तु न विरोधः इत्यर्थः'।[२३] अस्मिन्नसिद्धत्वविषये उदयनाचार्यकृतमतस्य याथार्थ्येन स्पष्टीकरणं दीधितिकारेण कृतमुक्तञ्च– 'किञ्चित्सामर्थ्यादिकमविरुद्धं किञ्चिच्चासिद्धमिति...'।[२४] प्रसङ्गेऽस्मिन् बौद्धैः सामर्थ्यमसामर्थ्यञ्चेति पदेन किं स्वीक्रियेत इति प्रश्नो भवति। सामर्थ्यासामर्थ्यपदद्वयेन फलोपधायकत्वं

फलानुपधायकत्वञ्चेति स्वीक्रियते, अथवा स्वरूपयोग्यत्वं स्वरूपायोग्यत्वञ्चेति स्वीक्रियते। यदि सामर्थ्यासामर्थ्ययोः फलजनकत्वं फलाजनकत्वञ्चेति स्वीक्रियेत तर्हि फलोपधायकत्वमर्थात्फलजनकत्वं फलानुपधायकत्वमर्थात्फलाजनकत्वञ्चेति धर्मद्वयं विरुद्धं नास्ति। यतो ह्येकस्मिन्नेव तन्तौ सहकारिकारणाभावे वस्त्रस्याजनकत्वदर्शनात्कालान्तरे च सहकारिकारणसत्त्वाद्वस्त्रस्य जनकत्वदर्शनात्। अत एकस्मिन्नेव तन्तौ फलोपधायकत्वानुपधायकत्वधर्मद्वयदर्शनाद्धर्मद्वयस्य विरोधोऽसिद्धः।

एवञ्च यदि स्वरूपयोग्यत्वस्वरूपायोग्यत्वयोः सामर्थ्यासामर्थ्यत्वेन ग्रहणं क्रियते तर्हि धर्मद्वयस्य विरुद्धत्वेऽपि तयोः संसर्गोऽसिद्धः। अर्थाद्यथा घटं प्रति दण्डः कारणं भवतीत्यतो दण्डे स्वरूपयोग्यताऽर्थाद्घटकारण-तावच्छेदकत्वरूपदण्डत्वं विद्यते, स्वरूपायोग्यतार्थाद्घटकारणतानवच्छेदक-त्वरूपादण्डत्वञ्च नैव विद्यते। अत एकत्र द्वयोर्धर्मयोः समावेशाभावादुक्तधर्मौ विरुद्धौ वर्तेते। किन्तु तयोः संसर्गोऽप्यसिद्धः। यतो हि यत्र स्वरूपयोग्यता तिष्ठति तत्र स्वरूपायोग्यता न तिष्ठतीति हेतोः तयोः संसर्गो न कुत्रापि सिद्ध्यति। एवं विरुद्धधर्मद्वयस्य संसर्गः सर्वथाऽसिद्ध एव। एवञ्च विरुद्धधर्मद्वयसंसर्गस्या-सिद्धत्वात् कुशूलस्थितवीजेषु भेदोऽप्यसिद्धः। बीजानां क्षणिकत्वमप्यसिद्धम्। सत्तायाञ्च क्षणिकत्वव्याप्तिरप्यसिद्धेति।

एवंरूपेण संसर्गस्यासिद्धत्वे सति पुनर्बौद्धैरन्यप्रकारेण भेदसाधनार्थमुच्यते प्रसङ्गविपर्ययाभ्यां पदार्थानां भेदस्सिद्ध्यतीति। व्यतिरेकव्याप्तिमुखेनानुमान-प्रदर्शनं प्रसङ्ग इत्युच्यते। यथा– यो यो वह्न्यभाववान् स धूमाभाववान् यथा– महाह्रदः। धूमवांश्चायं पर्वतः। तस्मात् पर्वतो वह्निमान्। अन्वयव्याप्तिमुखेनानुमान-प्रदर्शनं विपर्यय इत्युच्यते। यथा यो यो धूमवान् स वह्निमान्। धूमवांश्च पर्वतस्तस्मात् पर्वतो वह्निमानिति। प्रकृते पदार्थस्य क्षणिकत्वसाधनाय पूर्वपक्षिभिः प्रसङ्गविपर्ययोरुदाहरणं प्रदीयते। अत्र कथं प्रसङ्गेन भेदसिद्धिरिति चेद् यथा– कुशूलस्थबीजमङ्कुरासामर्थ्यमङ्कुराकारित्वात्। अत्र या व्याप्तिर्वर्तते सा व्यतिरेकव्याप्तिरिति। अत्र साध्यमसामर्थ्यमिति हेतुश्चाकारित्वमिति। अस्याऽसामर्थ्यानुमानस्य व्यतिरेकव्याप्तिर्भवति यथा– यद् यस्मिन् कार्ये असमर्थं नास्त्यर्थात्समर्थः, तत् तत्कार्यं न करोतीति नास्त्यर्थात्करोति। एवं व्यतिरेकव्याप्त्याऽसामर्थ्यनिरूपिताकारित्वस्य व्याप्तिनिश्चयेन कुशूलस्थबीजे असामर्थ्यमनुमीयते। अयमेव प्रसङ्ग इत्युच्यते।

अपरपक्षे विपर्ययानुमानं दर्शयति यथा– यद् यदाऽङ्कुरादिकार्यं न करोति, तत् तत्कार्ये असमर्थम्, यथा– प्रस्तरखण्डः। अत्र प्रकृते प्रस्तरखण्डवत् कुशूलस्थितबीजमप्यङ्कुरं नोत्पादयति। अनेन प्रकारेणान्वयव्याप्त्या कुशूलस्थबीजे असामर्थ्यमनुमीयते। एवं प्रसङ्गविपर्ययाभ्यां

कुशूलस्थबीजेऽसामर्थ्यं क्षेत्रपतितबीजे सामर्थ्यञ्चानुमीयते। एवञ्च द्वयोर्भेदसिद्धत्वात् क्षणिकत्वमपि सिद्ध्यति।

**प्रसङ्गविपर्ययाभ्यां भेदसिद्धिरित्यत्र सिद्धसाधनदोषवारणम्**–

वस्तुतोऽत्र प्रसङ्गविपर्ययाभ्यां भेदसिद्धिरिति चेत्सिद्धसाधनदोष आपततीति। तत्र कुशूलस्थबीजमङ्कुरोत्पादने समर्थं चेदङ्कुरोत्पादनं कुर्यादिति तर्के कश्चन वक्तुं शक्नोति यत्कुशूलस्थबीजमद्य अङ्कुरन्नोत्पादयति चेदपि भविष्यति कदाचिदवश्यमङ्कुरमुत्पादयिष्यति, अतः तत्रापि सामर्थ्यमस्त्येव। अतः कदाचिदङ्कुरकारित्वहेतुना कुशूलस्थबीजे सामर्थ्यं सिद्धमेव, अतोऽत्र सिद्धसाधनरूपदोषो वर्तत इति। समाधानत्वेन बौद्धैरुच्यते नास्त्यत्र सिद्धसाधनरूपदोषः। कथमिति चेद् यस्य यस्मिन् कार्ये सामर्थ्यं तेन तत्कार्यं कर्तुं विलम्बो नैव क्रियत इति सर्वैरपि स्वीक्रियते। एवञ्च तत्कालीनसामर्थ्यं तत्कालीनफलजनकत्वस्यापादकमित्यवश्यं स्वीकर्तव्यं न तु कस्मिंश्चित् काले। अतः सिद्धसाधनदोषोऽत्र नास्तीति।

**प्रसङ्गविपर्ययाभ्यां भेदसिद्धिरित्यस्य खण्डनम्**–

एवं बौद्धस्वीकृताभ्यां प्रसङ्गविपर्ययाभ्यां यदि कुशूलस्थबीजक्षेत्रस्थ-बीजयोर्भेदसिद्धिः क्रियते बौद्धैस्तर्हि ग्रन्थकारस्यायं प्रश्नोऽत्र प्रसङ्गविपर्यय-

योर्घटकपदं सामर्थ्यं नाम किमिति करणत्वमुत योग्यता। अस्याशयः सामर्थ्यस्य फलोत्पादकत्वमित्यर्थ इष्टोऽथवा तन्निष्ठयोग्यता इत्यर्थ इष्टः।[२५]

प्रथमार्थे अर्थात्सामर्थ्यस्य करणत्वेऽर्थे इष्टे सति प्रसङ्गे तथा विपर्ययानुमाने हेतुसाध्ययोरभिन्नता स्यात्। अस्मिन्प्रसङ्गे उदयनाचार्येणोच्यते– 'नाद्यः साध्याविशिष्टत्वप्रसङ्गात्'।[२६]

प्रसङ्गानुमाने यत्समर्थं तत्करोत्येवेत्यस्मिन्स्थले सामर्थ्यं यथा कारित्वं हेतुरपि तथैव कारित्वविशिष्टः। एवञ्च हेतुसाध्ययोरभिन्नताप्रसङ्गः। एवंरूपेण विपर्ययानुमाने यदसमर्थं तन्न करोतीत्यस्मिन् स्थले हेतुसाध्ययोर-विशेषताप्रसङ्गः। हेतोः पक्षवृत्तिताज्ञानेन साध्यसिद्धित्वात् तत्रानुमाने सति सिद्धसाधनदोष आपतति, अनुमानञ्च व्यर्थ्यं भवति।

अत्र पूर्वपक्षिभिः पुनः समाधानायोच्यते– प्रसङ्गानुमाने प्रकृतस्थले असामर्थ्यं साध्यमकारित्वञ्च हेतुरिति। अनुमानस्थलञ्च– अङ्कुरासमर्थमङ्कुराकारित्वात्। अर्थात्प्रकृतस्थले सामर्थ्यपदं साध्याभावस्वरूपम्, कारित्वञ्च हेतोरभावस्वरूपम्। एवञ्च प्रसङ्गानुमाने साध्याविशिष्टत्ववचनं न यौक्तिकम्। अस्य समाधानप्रसङ्गे दीधितिकारेण प्रोच्यते– साध्याविशेषप्रसङ्गाद् इति।[२७] अस्य पदस्यार्थश्च आपाद्यानुमेयाभ्यामापादकानुमापकयोरविशेषप्रसङ्गोऽर्थात् कारित्वरूपकारणता

यदि सामर्थ्यं स्यात्तर्ह्यापाद्यापादकयोरविशेषप्रसङ्ग इति।[२८] अत्र च प्रसङ्गस्य लक्षणम्– अनुमानानुकूलतर्कप्रदर्शनम्। अस्मिन्स्थले प्रसङ्गानुमानञ्च यच्च यस्मिन् कार्ये समर्थं तच्च तत्कार्यं करोत्येव। अर्थात्क्षेत्रस्थबीजमङ्कुरोत्पादने समर्थम्, कारित्वात्। अत्र 'आपाद्यम्' भवति कारित्वम् 'आपादकम्' च भवति सामर्थ्यमिति। एवञ्चाऽस्मिन्स्थले आपाद्यापादकयोरभिन्नत्वात्साध्याविशिष्टप्रसङ्गाद् इत्यत्रासंगतिर्नास्ति। विपर्ययानुमाने च कुशूलस्थबीजमङ्कुरासमर्थम्, अङ्कुराकारित्वात्। अत्र 'असामर्थ्यम्' भवति साध्यम्, 'अङ्कुराकारित्वम्' च भवति हेतुः। अत्राप्याऽऽपाद्यापादकयोरभिन्नत्वात्साध्याविशिष्टप्रसङ्गोऽनायासेन सिद्ध्यति।

अपरश्च प्रसङ्गविपर्ययघटकसामर्थ्यपदेन 'योग्यता' इत्यर्थस्यापि ग्रहणं भवितुं नार्हति सिद्धसाधनदोषापतितत्वात्। प्रसङ्गेऽस्मिन्प्रोच्यते आचार्येणोदयनेन– 'नापि द्वितीयः। सा हि सहकारिसाकल्यं वा प्रातिस्विकी वा। न तावदाद्यः पक्षः। सिद्धसाधनात् परानभ्युपगमेन हेत्वसिद्धेश्च'।[२९]

पुनश्च भावपदार्थानां क्षणिकत्वस्थापनाय बौद्धैः कुर्वद्रूपत्वातिशयेन कुशूलस्थबीजक्षेत्रस्थबीजयोर्भेदप्रतिपादनं क्रियते। अत एव बौद्धमते बीजत्वस्य कुर्वद्रूपत्वस्य चोभयोः समावेशः स्यात्। परन्तु कुर्वद्रूपत्वञ्च बीजं विहायान्यत्रापि स्थातुमर्हति। अनेन च बीजत्वं कुर्वद्रूपत्वञ्च परस्परं विरुद्धं स्यात्। वैजात्यस्य यद्येकत्र समावेशः स्वीक्रियते तर्हि मनुष्यत्वस्य पशुत्वस्य

चैकत्र समावेशः स्वीकर्तव्यः। परन्त्वेतस्याप्रसिद्धत्वात् कुर्वद्रूपत्वातिशयस्य ग्रहणं न सम्भवति, अतः क्षणिकत्वमपि न सिद्ध्यति। अतः क्षणिकत्वसिद्ध्यभावाद् न्यायसम्मतस्यात्मनो नित्यता सिद्ध्यत्येव। एवंरीत्या *आत्मतत्त्वविवेके* क्षणिकत्वस्य खण्डनपूर्वकमात्मनो नित्यत्वमाचार्येणोदयनेन प्रतिपादितम्।

**प्रकान्तरेण क्षणभङ्गसिद्धिस्तत्खण्डनञ्च**–

पूर्वोक्तरूपेण क्षणिकत्ववादस्य खण्डनानन्तरं पुनः क्षणिकत्ववादसाधनाय ब्रूवन्ति यद् उत्पद्यमतां वस्तूनां विनाशोऽवश्यंभावीति सर्वेऽपि स्वीकुर्वन्ति। यदवश्यंभावी तत्र कस्यापि कारणस्यापेक्षा न भवति। यस्य यत्र सामर्थ्यं तत्तत्कार्यमविलम्बेन करोतीति हेतोरुत्पद्यमद् वस्तु विनाशशीलत्वात्परक्षणे एव नश्यति। एवं वस्तूनां विनाशस्याऽवश्यंभावित्वादहेतुकत्वे सिद्धे क्षणभङ्गवाद-स्सिद्ध्यत्येव। एवंरूपेण क्षणिकत्ववादिमतश्रवणानन्तरमेतन्मतस्य निरासनाय पृच्छयते– विनाशोऽहेतुक इति कथनस्याभिप्रायः कः? तद्धि तादात्म्यं वा, निरुपाख्यत्वं वा, तत्कार्यत्वं वा तद्व्यापकत्वं वा, अभावत्वमेव वेति।[३०]

**विनाशोऽहेतुकस्य खण्डनम्**–

वस्तुतस्त्वत्र प्रथमविकल्पोऽर्थाद् विनाशोऽहेतुक इति न सम्भवति। यतो हि निषेध्यनिषेधयोस्तादात्म्यं न सम्भवति। अर्थाद्भावाभावयोः परस्परविरुद्ध-

धर्मयोरैक्यं न सम्भवति। यदि च भावाभावयोरैक्यं स्यात्तर्हि जगति विरोधः कदापि न स्यात्। एवञ्च गोत्वाश्वत्वादीनां विरुद्धधर्माणां सम्बन्धोऽप्युच्छिद्येत। अत एव उच्यते– 'न पूर्वः निषेध्यनिषेधयोरेकत्वानुपपत्तेः। उपपत्तौ वा विश्वस्य वैश्वरूप्यानुपपत्तेः'।[३१]

अत्र बौद्धैरुच्यते यत्, अत्र वस्तुनो विनाशो नाम कालान्तरे समर्थेतरस्वभाव इति। अर्थाद् भाववस्तु स्वोत्पत्त्यव्यवहितपरक्षणे कार्योत्पादनं न क्रियते, एतादृशं भाववस्तुनोऽसामर्थ्यमेव तस्य नास्तिता। नास्तितैव तस्य विनाशः। एतादृशविनाशस्य प्रतियोगिनस्तादात्म्येऽपि पूर्वोक्तदोषो नागच्छति।

एतन्मतखण्डनमकार्युदयनाचार्येणैवंरूपेण बौद्धानां कालान्तरे अर्थक्रियाकारित्वविषये भाववस्तुनः समर्थेतरस्वभाव एव भाववस्तुनो नास्तितेति स्वीक्रियते चेद् तत्र पृच्छयते यत्, पूर्वं समर्थरूपस्वभावविशिष्टभाववस्तु कालान्तरे यत् समर्थेतरस्वभावः प्रतिपाद्यते तत्किं समर्थरूपस्वभावाद् भिन्नमुताभिन्नम्। भिन्नं स्याच्चेद् भावपदार्थस्य सामर्थ्याभाव एव भेदं प्रतिपादयति। भेदे स्वीकृते सति भावः क्षणिकत्वे पर्यवसति। एवञ्च भावपदार्थस्य सामर्थ्याभावेन क्षणिकत्वं बौद्धैः साध्यते। किन्तु भावपदार्थस्य कालान्तरे सामर्थ्याभावस्याऽसिद्धत्वाद् बौद्धैरसिद्धसामर्थ्याभावेन भावपदार्थस्यासिद्ध-क्षणिकत्वं साध्यते।[३२] परन्तु सार्वत्रिकनियमेन सिद्धहेतुनासिद्धसाधनं क्रियते। अत एतन्मतमपि समीचीनं नास्ति। अतः

पूर्वोक्तदोष एव समापतति। अपि च यद्देशे यत्काले च भाववस्तूत्पद्यते तद्देशभिन्नदेशे तत्कालभिन्नकाले चानुवृत्तभावस्य या नास्तिता सा देशान्तरे कालान्तरे विद्यमानपूर्वभाववस्त्वपक्षेयाऽभिन्नेति स्वीक्रियेत चेदवश्यं भाववस्तुनोऽविनाशित्वं विभुत्वञ्चेति बौद्धैः साध्यते।[३३] यतो हि तदुत्पत्तिकाले विद्यमानभाववस्त्वन्यकाले विद्यमानत्वादविनाश्यन्यदेशे विद्यमानत्वाच्च विभ्विति। एवञ्च बौद्धा भाववस्तुनः क्षणिकत्वसाधने प्रवृत्ताः सन्त इदानीमविनाशित्वं विभुत्वञ्चैव साधयेयुः।

बौद्धैस्तदोच्यते कालान्तरे भाववस्त्वर्थक्रियाकारित्वं प्रत्यशक्तम्। अतः क्षणान्तरे तस्यास्तित्वं न सिद्ध्यति शक्तेः सत्तालक्षणत्वात्।[३४] प्रसङ्गेऽस्मिन् उदयनाचार्येण विकल्प्यते– कालान्तरकार्यं प्रति स्वकालेऽशक्तिरेव असत्त्वमिति स्वीक्रियेत अथवा स्वकार्यं प्रति कालान्तरेऽशक्तिः असत्त्वमिति स्वीक्रियेत।[३५]

प्रथमपक्षे स्वकालेऽपि वस्त्वसत् स्यात् तत्काले तस्याशक्तित्वात्। परन्तु व्यवहारेऽस्य प्रसिद्धिरेव नास्ति। द्वितीयपक्षे यदि कालान्तराधाराऽशक्तिर्भवति तर्हि कथं तदात्मिकेति? अर्थात् प्रतियोगिनो विनाशः प्रतियोगिस्वरूपमिति बौद्धवचनस्य विरोधः। यद्युच्येत साऽशक्तिस्तप्रतियोगिविद्यमानकाले विद्यत इति तर्ह्यशक्तित्वात्प्रतियोगी स्वसत्ताकालेऽप्यसत्स्यात् कालान्तरे विपर्ययोऽर्थात् सत्स्यात्। अत एवोपहास्यत्वेन ग्रन्थे चोच्यते–

'विधिरात्माऽस्य भावस्य निषेधस्तु ततः परः।
सोऽपि चात्मेति कः प्रेक्षः शृण्वन्नपि न लज्जते'॥[३६]

अर्थाद्भावो भवति विधिप्रमाणस्य विषयोऽभावस्तु निषेधप्रमाणस्य विषय इति। अतो भावाभावयोस्तादात्म्यमसम्भवमिति।

**निरुपाख्यत्ववादखण्डनम्**–

निषेध्यनिषेधयोस्तादात्म्यवादस्य खण्डनानन्तरं बौद्धैः पुनश्चापादि वस्तुनो विनाशो भावस्वरूपातिरिक्तनिरुपाख्योऽस्ति। वस्तुतः 'भावस्वरूपातिरिक्ता सोपाख्या निर्वृत्तिर्नास्तीति'[३७] अर्थाद् वस्तुनो निवृत्तिर्भाववस्त्वतिरिक्तनिरुपाख्य इति बौद्धसम्मतः। अभावश्च यदा निरुपाख्योऽर्थाद् अलीको भवति तदा तस्य कारणं न विद्यते। कारणेऽविद्यमाने सत्युत्पत्त्यनन्तरक्षणे भाववस्तुनो विनाशोऽवश्यंभावी। एवञ्च वस्तुनो निवृत्त्यर्थमर्थाद्विनाशार्थं कस्यापि हेतोरपेक्षा नास्तीत्यतो वस्तुनो विनाशः स्वत एव भविष्यति। उत्पद्यमतां भाववस्तूनां विनाशत्वाद् भाववस्तु क्षणिकं स्यात्। एवंरूपेण बौद्धैरभावस्य निरूपाख्यत्वमलीकत्वं वा साधयित्वा क्षणिकत्वं साध्यते। किन्त्वेतन्न समीचीनम्। प्रसङ्गेऽस्मिन् नैयायिकैरुच्यते– 'नन्वयमपि क्षणभङ्गस्योद्गारः, स च कफोणिगुडायितो वर्तते'।[३८]

पुनश्चालीकत्वेन यदि निवृत्तेर्ग्रहणं स्यात्तर्हि तस्य जन्मार्थं हेतुर्नापेक्षते।[३९] तर्हि एवमपि स्वीकर्तुं न शक्यते, यतो ह्यलीको नियतः कस्मिंश्चित् काले देशे वा

विद्यमानो भवति, एवञ्च हेतुविशिष्टो भवति। यद्यलीकस्य कालदेशसम्बन्धविशिष्टत्वं न स्वीक्रियेत तर्हि घटनिवृत्तिर्घटविनाशो वा न कुत्रापि कदापि वर्तेत। अथवा घटनिवृत्तिः सर्वत्र सदैव स्यात्।[४०]

एवं प्रतिपादिते सति बौद्धैरुच्यते घटनिवृत्तिर्न क्वापि कदापीति प्रथमपक्ष एव गृह्यते। तदा खण्डनावसरे चोच्यते– 'सोऽयं भावनास्तितास्वरूपप्रतिषेधो वा भावप्रतिषेधेन निवृत्तिस्वरूपनिरुक्तिर्वा इति'।[४१] एवञ्च प्रथमपक्षे स्वीकृते सति भावपदार्थे सार्वकालिकत्वस्य सर्वदेशवृत्तित्वस्य च प्रसङ्गः स्यात्। अर्थात् सर्वदेशे सर्वकाले भावनिवृत्तिस्वरूपस्य निषेधेन भावपदार्थस्यैव सर्वदेशे सर्वकाले वृत्तिता सिद्ध्यति। द्वितीयपक्षस्वीकारे सत्यभावस्य सार्वकालिकत्वस्याथवा सर्वदैशिकत्वस्य प्रसङ्गः स्यात्।[४२] अर्थात्सर्वदेशे सर्वकाले घटादिभावस्य निषेधेन सर्वकाले सर्वदेशे घटाद्यभावः स्यात्। अर्थादलीकस्य देशकालिकसम्बन्धनियमो यथा वक्तुं न शक्यते तथा तस्य निषेधोऽपि कर्तुं न शक्यत इत्याशयः। अतो भावस्वरूपातिरिक्ता सोपाख्या निवृत्तिर्नास्तीति वक्तुं न शक्यते।

**विनाशे प्रतियोगिमात्रकार्यत्वखण्डनम्**–

आचार्येणोदयनेन पूर्वोक्तरूपेण बौद्धानां मतखण्डनान्तरं पुनर्बौद्धानां शङ्का समुपस्थाप्यते– 'अस्तु तर्हि तत्कार्यत्वमेव ध्रुवभावित्वम्'।[४३] अर्थाद्

विनाशः प्रतियोगिनः कार्यमस्ति। अतः प्रतियोग्युत्पत्त्यव्यवहितानन्तरमेव विनाशो जायते।

अत्र शङ्का भवति विनाशः प्रतियोगिनः कार्यमित्यस्याभिप्रायो विनाशः प्रतियोगिनोऽपि कार्यमित्यथवा प्रतियोगिन एव कार्यम्। प्रथमपक्षे विरोधापत्तिर्यतो हि प्रतियोगिनोऽपि कार्यमिति स्वीकारे 'अपि' शब्देन कारणानन्तरसमुच्चयः, तदा कारणानन्तरस्य विलम्बत्वात्तदुत्पत्त्यव्यवहितोत्तरक्षणोत्पत्तिकत्वं विरुद्धम्। द्वितीयपक्षे हेतोरसिद्धापत्तिः। यतो हि मुद्गारादेरपि घटनाशं प्रति कारणत्वदर्शनात्।[४४]

अत्र पूर्वपक्षिभिरुच्यते विनाशः प्रतियोगिनोऽपि कार्यमित्यथवा प्रतियोगिन एव कार्यं न समुच्चयो न वा नियमो विवक्षितः, अपितूत्पन्नमात्रस्य यत्कार्यं तदेव तस्य विनाश इत्यभिप्रायः। तच्चेत्थं दृश्यते ग्रन्थे– 'यत्किञ्चिदुत्पन्नमात्रस्य कार्यं स एव तस्य नाश इति'।[४५]

एवंस्वीकृते सति कार्यं कारणातिरिक्तानपेक्षमेतत्कार्यत्वाद् इत्यत्र कारणपदेन यदि सामग्री विवक्षिता तदात्र सिद्धसाधनम्। सामग्र्येकदेशश्चेत् तदा बाधः। यतो हि 'न किञ्चिदेकमेकस्मात् सामग्र्याः सर्वसम्भवः' इति सर्वसिद्धान्तः।[४६]

कार्यमेव विनाश इति केनानुरोधेन व्यवहर्तव्यम्– तद्विरहवत्त्वादर्थात् कारणान्योन्याभाववत्त्वात्कार्यस्य किंवा तद्विरहरूपत्वात् कारणविरहात्मकत्वात् कार्यस्य।[४७] प्रथमपक्षे सहकारिष्वपि कारणविनाशरूपकार्यत्वव्यवहारः स्यात्। अर्थाद् वेमादिष्वपि तन्तुविनाशत्वव्यवहारप्रसङ्ग इति तदन्योन्याभाववत्त्वस्याऽत्र सत्त्वात्। द्वितीयपक्षस्य खण्डनार्थं विकल्पयति यत्, कार्यकाले कारणं सर्वथापि नोपलभ्यत इति मूलम्, व्यवहारानुरोधाद्वाऽर्थात् कार्यमेव कारणविनाशमथवातिरिक्तविनाशे बाधकानुरोधाद्वेति?[४८]

अत्रावयवेभ्योऽनन्यत्वमवयविन इति पक्षमादाय प्रथमपक्षं स्वीकर्तुं न शक्यते। अर्थात्पटकाले ये वेमादय उपलभ्यन्ते ते पूर्वकारणावच्छिन्ना वेमादयो नेति वक्तुं न शक्यते, एवञ्च तत्कारणेभ्यो भिन्ना इत्यपि वक्तुं न शक्यते प्रमाणाभावात्। यदि पृच्छयते कार्यकालेऽर्थात्पटकाले पूर्वस्थिताः कारणावच्छिन्नवेमादय उपलभ्यन्ते इत्यत्र प्रमाणं किमिति, अत्रापि किञ्चित् प्रमाणं नास्ति तथापि सन्देहवशाद् बौद्धस्वीकृतः 'कार्यकाले कारणमनुपलभ्यते' इति विषयो विलीयते। अत उच्यते आचार्येणोदयेन– 'सन्देहस्थितावपि अनुपलब्धिबलालम्बनविलयात्'।[४९]

द्वितीयपक्षोऽपि न सम्भवत्यर्थाद् व्यवहारानुरोधादिति पक्षोऽपि न युक्तः। तथा हि पटो जात इत्युक्ते तन्तवो नष्टा इति कश्चिद् नैव व्यवहरति।

अत्र बौद्धाः स्वपक्षं दृढीकुर्वन्ति यद् विविधप्रकारेण तन्तुनिर्माणेन पट उत्पद्यते। अत्र वस्तुतः पूर्वतन्तुतः परतन्तुर्भिन्नः। किन्तु समानप्रकृतित्वाद् अत्रावगन्तुं न शक्यते। उच्यते बौद्धैः– 'पटस्यानतिरेकात् तन्तुमात्रजन्मनि भेदाग्रहादव्यवहारः इति'।[५०] एवञ्चानेन कारणेनैव पटो जात इत्युक्ते तन्तवो नष्टा इत्यस्य व्यवहारो न भवति।[५१]

अत्र बौद्धाः पुनर्वदन्ति यत्, कार्यकारणसन्ततिः द्विधा भवति। एकस्तावत् सदृशो द्वितीयस्तावद्विसदृशश्चेति। सदृशस्योदाहरणं तन्तुपटयोः। विसदृशसन्ततिस्तावत् काष्ठाङ्गारः। विसदृशसन्ततौ द्रष्टुं शक्यतेऽङ्गारोत्पत्तौ कारणभूतस्य काष्ठं विनश्यति। अनेन दृष्टान्तेनानुमातुं शक्यते सदृशसन्ततावपि कार्ये उत्पद्यमाने कारणस्य विनाशो भवति।

अत्रैतन्न सम्भवति। वस्तुतस्तन्तुमालायामवयवी पटो वर्तते इति सर्वानुभवसिद्धम्। किन्तु बौद्धानां मतं स्वीक्रियते चेद् यदा पटनाशो भवति पुनश्च तन्तुमालावस्था प्राप्ता भवति तदा पटविनाशोऽतिरिक्तं वस्तु न स्यात् तत्स्वरूपमेव स्यात्। एवञ्च पटनाशकारणतावच्छिन्नतन्तुमालायां पूर्वसिद्धः पटः कथमासीदिति प्रश्नोऽवश्यमागच्छेत्। एतस्य प्रतिपादनं कल्पलतायामित्थं दरीदृश्यते यथा– 'तन्तुमालायां पटस्तावद्वर्तत इत्यनुभवसिद्धम्। सा चेत्तन्तुमाला पटनिवृत्तिः स्यात् तदा स्वध्वंस एव पटो वर्त्तते इत्यायातमिति स्वमते। परमते

त्वाह। तदात्मको वेति। पटोऽपि तन्तुमाला, पटनिवृत्तिरपि तन्तुमाला, तथा च प्रतियोग्यात्मिकैव निवृत्तिः स्यादिति विरोध इत्यर्थः।[५२]

अत्र यदि बौद्धैः शङ्क्येत पटनाशकालीनतन्तुमालायाः पटकालीनतन्तुमाला भिन्नैव तथा च कथमयं विरोध इति। तदोदयनाचार्येण विकल्प्यते, अत्र यद्भिन्नत्वं तत्किं जातिकृतभिन्नत्वमुत व्यक्तिकृतभिन्नत्वम्। यदि जातिकृतभिन्नत्वं स्वीक्रियेत तर्हि तदनुभवसिद्ध्यभावाद् न सिद्ध्यति। यदि व्यक्तिकृतभिन्नत्वं तर्हि क्षणभङ्गसिद्ध्यनन्तरमेव व्यक्तिकृतभिन्नत्वं सिद्ध्येत्, यदिदानीमपि न सिद्धम्। अतोऽन्योन्याश्रयदोष आपतति। अतो द्वितीयपक्षोऽपि स्वीकर्तुं न शक्यते।

इदानीं तृतीयपक्षस्योद्धरणपूर्वकं खण्डनं क्रियते उदयनाचार्येण। तृतीयपक्षस्तावत्– अभावस्यातिरिक्तत्वं यैः स्वीक्रियते तेषां पक्षमाश्रित्य यदि बौद्धैरुच्येत पटो यथा पटान्तराभाववांश्च सन् तज्जातीयश्च भवति तद्वत् तन्तुरपि तन्तुनिवृत्तिस्वरूपः सन् तन्तुजातीयः स्यात्। एवञ्च यथा पटविरोधिभूतपटाभावः पटान्तरे तिष्ठति तद्वत् तन्तुविनाशोऽपि तन्तुस्वरूपः स्यादिति न कश्चिद्दोषः।

एवमुच्यते चेत्तदपि न समीचीनम्। यतो हि स्वप्रतियोगिना साकमभावस्य तादात्म्यं न भवति। तयोः समवस्थानञ्च न भवति। एवञ्चैकजातीयतापि न सिद्ध्यति। वस्तुतः स्वप्रतियोगिनाभावतादात्म्ये सति प्रतियोगिनि

प्रतियोगित्वमेव न स्यात्। एवञ्च यस्मिन् क्षणे प्रतियोगी तिष्ठेत् तस्मिन्नभावो न स्यात्। एवञ्च द्वयोः समवस्थानं न सम्भवति। प्रतियोगिन्यभावे च सामान्यतो विरुद्धधर्मसत्त्वाद् एकजातीयतापि न सम्भवति। अतश्च मूलग्रन्थे उच्यते– 'प्रतियोगिना हि तादात्म्यसंसर्गैकजातीयत्वानि नेष्यन्ते, अप्रतियोगित्वप्रसङ्गात् भिन्नकालत्वात्, सामान्यतो विरुद्धधर्मसंसर्गाच्च'।[५३]

एवम् *आत्मतत्त्वविवेके* अस्य इतोऽपि गभीरतया समालोचनं वर्तते खण्डनञ्च वर्तते। अत्र तावत्सरलतया लघुरूपेण च दिग्दर्शनमेव कृतम्।

**प्रतियोगिव्यापकत्ववादखण्डनम्**–

विनाशस्य ध्रुवभावित्वविषये विद्यमानेषु विकल्पपञ्चकेषु विकल्पत्रयस्य खण्डनं कृतं नैयायिकैः। इदानीं बौद्धाश्चतुर्थविकल्पमर्थाद् व्यापकत्वं विनाशस्य ध्रुवभावित्वेनाऽशङ्कन्ते कथयन्ति च 'अस्तु तर्हि व्यापकत्वं ध्रुवभावित्वमिति'।[५४] अस्याशयः प्रतियोगिव्यापकत्वमेव ध्वंसस्य ध्रुवभावित्वम्। अर्थाद् धूमवत्त्वस्य वह्निमत्त्वं यथावश्यंभावी वह्नेर्व्यापकत्वात् तथा विनाशे प्रतियोगिनो व्यापकसत्त्वात् प्रतियोगिभावपदार्थोत्पत्त्यनन्तरं तस्य विनाशोऽवश्यंभावी। एवञ्च भावपदार्थस्य विनाशोऽवश्यंभावीति हेतोर्विनाशोऽहेतुकोऽर्थात्प्रतियोगिभिन्नकारणनिरपेक्ष इति। विनाशस्याहेतुकत्वे भावपदार्थस्य क्षणिकत्वं सिद्ध्यत्येव।

खण्डनावसरे उदयनाचार्येणोच्यते– 'न। अतादात्म्यात्, अतत्कारणाच्च'।[५५] अर्थाद् बौद्धमते तादात्म्येन तदुत्पत्तिरित्यनेन (कारणात्कार्योत्पत्तिमाध्यमेन) व्याप्तिज्ञानं भवति। यथा– शिंशपा कश्चन वृक्षोऽतो वृक्षतादात्म्येन शिंशपायां वृक्षस्य व्याप्तिज्ञानं भवति। एवञ्च वह्नेर्धूम उत्पद्यते, अतो वह्नौ धूमकारणतासत्त्वाद् धूमे वह्नेर्व्याप्तिज्ञानं भवति। नैयायिका बौद्धमतानुसारं दर्शयन्ति यत्, प्रतियोगिनि ध्वंसतादात्म्यं नास्त्येवञ्च ध्वंसे प्रतियोगिकारणताऽपि नास्ति। अतो ध्वंसे प्रतियोगिव्यापकता नैव तिष्ठति। एवञ्च प्रतियोगिनि ध्वंसव्याप्तिज्ञानमपि नैव सम्भवतीति। व्याप्तिज्ञानन्तु साहचर्यनियमेनैव भवति।[५६] एवञ्च साहचार्यनियमवशाद् नैयायिकमतेऽपि प्रतियोगिनि ध्वंसस्य व्याप्तिज्ञानं न सम्भवति। यतो हि प्रतियोगी तस्य ध्वंसश्च उभयोः समकालेऽविद्यमानत्वाद् ध्वंसप्रतियोगिनोः साहचर्यनियमेन साहित्यनियमेन वा व्याप्तिज्ञानं नैव सम्भवति। प्रसङ्गेऽस्मिन्नुदयनाचार्येणोच्यते– 'अस्मद्दिशापि व्याप्तिग्रहो न साहित्यनियमेन, विरोधितया विषमसमयत्वात्'।[५७]

जन्मानन्तर्यनियमेनार्थाद् उत्पत्त्यनन्तरं नियमेन ध्वंसो भवतीति हेतोर्ध्वंसे प्रतियोगिव्यापकत्वविद्यमानत्वाद् व्याप्तिज्ञानं सिद्ध्यति। अनेन जन्मानन्तर्य-नियमेनैव भावस्य क्षणिकत्वमपि सिद्ध्यति। एतन्न स्वीकरणीयम्, यतो हि क्षणभङ्गवादो यदि जन्मानन्तर्यनियमेनैव सिद्ध्यति तर्हि विनाशस्य ध्रुवभावित्वसाधनेनालम्। अर्थाद् जन्मानन्तर्यनियमेन ध्वंसो भवतीति सिद्ध्यति

चेद् एतत्साधनस्यापेक्षैव नास्तीति। अत उच्यते– 'नापि जन्मानन्तर्यनियमेन, तदसिद्धेः। सिद्धौ वा तत एव क्षणभङ्गसिद्धेः किमनेन'।[५८]

भविष्यति ध्वंस उत्पद्येतेत्यतो ध्वंसे प्रतियोगिव्यापकत्वं स्यात्। व्यापकताकारणाद् ध्वंसे प्रतियोगिभिन्नकारणानपेक्षत्वसिद्ध्यैव भावस्य क्षणिकत्वं सिद्ध्यतीति वक्तुमपि न शक्यते, यतो हि व्याप्तौ व्यभिचारवशाद् ध्वंसे प्रतियोगिभिन्नकारणानपेक्षत्वं न सिद्ध्यति। अतः प्रतियोगिव्यापकत्वमेव ध्वंसस्य ध्रुवभावित्वमिति स्वीकर्तुं न शक्यते।[५९]

**अभावत्ववादखण्डनम्**–

एवंरूपेण पक्षचतुष्टस्य खण्डनानन्तरं पञ्चमपक्ष आश्रीयते बौद्धैः प्रतिपाद्यते च– विनाशे अभावत्वविद्यमानत्वाद् विनाशो जन्मरहितः, यथा प्रागभावः।[६०] एवंप्रकारेण प्रागभावदृष्टान्तेन जन्माभावे सिद्धे ध्वंसस्याकारणत्वं सिद्ध्यति। विनाशाकारणत्वे सिद्धे भाववस्तुनो ध्वंसोऽवश्यंभावी। तथा च ध्वंसे सिद्धे क्षणिकत्वमपि सिद्ध्यति।

अभावस्य विद्यमानत्वेऽपि प्रागभावो जायते, यथा– ध्वंसः। विनाशे विद्यमाने सत्यपि प्रागभाव उत्पद्यते, यथा घटः। अतो ग्रन्थकारेणोद्यते– 'प्रागभावो जायते अभावत्वात् विनाशित्वाद्वा ध्वंसवद् घटवद्वा'।[६१]

पुनश्चोच्यते प्रागभावो यदि नोत्पद्येत तर्हि तस्य निवृत्तिरपि न स्यात् अजातत्वात्, यथा आकाशम्।[६२] अस्मिन्ननुमानेऽभावत्वं विनाशत्वं वा प्रागभावस्य जन्मरूपसाध्ये केवलं साधनम्, हेतुर्न भवति , तद्वद् बौद्धप्रयुक्तानुमाने 'विनाशो न जायते अभावत्वात् प्रागभाववत्' इत्यत्र ध्वंसस्य जन्माभावसाध्येऽभावत्वं हेतुर्न भवति। एवमसद्धेतुनाऽभावत्वेन बौद्धाभिप्रेतध्वंसस्य जन्माभावो न सिद्ध्यति।

वस्तुतस्तु 'विनाशो न जायते अभावत्वात्, प्रागभाववत्, जातोऽपि निवर्तते, जातत्वात्, घटवदिति' इत्यत्र भावावच्छिन्नव्याप्तिकत्वादुक्तानुमानद्वये अभावत्वहेतुरप्रयोजकम्। एवञ्च प्राग्ध्वंसाभावग्राहकप्रत्यक्षबाधः।[६३] 'अस्मिन् तन्तौ वस्त्रं ध्वस्तं भवति' इत्यनेन प्रत्यक्षेण ध्वंसस्य जन्यत्वं निश्चीयते, अतो ध्वंसस्याजन्यत्वमिति कथनं न यौक्तिकम्। एवञ्च प्रागभावस्योत्पत्तिमत्त्वे स्वीकृते सति उत्पत्तेः पूर्वं घटादिकार्याविर्भावः स्वीकर्तव्यः। ध्वंसो विनाशीति स्वीकृते ध्वस्तघटस्य पुनराविर्भावस्स्वीकर्तव्यः।

तस्मिन्काले च घटोन्मज्जनेऽर्थाद्घटस्याविर्भावे को दोष इति चेद् ध्वंसदशायामथवा प्रागभावदशायाम् 'इदानीं घटो नास्ति' इति यत्कालेन साकं घटस्य विच्छेदप्रतीतिस्तद्यथार्थमपि वक्तुं न शक्यते, अयथार्थमपि वक्तुं न शक्यते। अत एवोच्यते उदयनाचार्येण– 'अयथार्थत्वे तस्य द्विचन्द्रदर्शनकाले चन्द्रदेशाविच्छेदवत् तद्वतः कालाविच्छेदे भावस्य प्राक्प्रध्वंससहवृत्तित्वेना-

विरोधप्रसङ्गात्। यथार्थत्वे तु भेदस्थितौ तदुन्मज्जनानुपपत्तेः'।[६४] अस्याशयो भावावच्छिन्नव्याप्तिकत्वादभावत्वहेतुरप्रयोजकः। अर्थादनुकूलतर्काभावः। हेतावनुकूलतर्काभावे साध्ये व्यभिचारे आशंकिते सत्यपि तस्य खण्डनं न भवति। तेन च दुष्टहेतुः स्यात्। एवञ्चानुमानं न सिद्ध्येत्।

एवञ्च भावपदार्थस्य विनाशस्यावश्यंभावित्वात् क्षणिकत्वं सिद्ध्यतीति वक्तुं न शक्यते। तेन बौद्धानां क्षणिकत्ववादोऽयौक्तिकः। एवंरूपेण विकल्पकपञ्चकस्य खण्डनमा*त्मतत्त्वविवेके* क्षणभङ्गवादे प्रथमाध्याये उदयनाचार्येणाकारि। क्षणित्वसिद्ध्यभावान्नित्यस्यात्मनस्स्वतस्सिद्धिर्भवति।

***न्यायकुसुमाञ्जलि*ग्रन्थे क्षणिकत्ववादखण्डनेनात्मस्थापनम्–**

*न्यायकुसुमाञ्जलि*ग्रन्थेऽपि प्रथमस्तवके पूर्वपक्षिरूपचार्वाकैः स्वात्मपक्षसमर्थनायेश्वरसत्ताखण्डनाय च बौद्धसम्मतक्षणभङ्गवाद आश्रीयते। चार्वाकमतखण्डनावसरे बौद्धसम्मतक्षणभङ्गवादस्य स्वरूपमुत्थाप्य स्वग्रन्थे स्वयुक्त्या खण्डनञ्च कृतमुदयनाचार्येण। तत्र चार्वाकैरीश्वरसत्ताखण्डनाय बौद्धसम्मतक्षणभङ्गवादस्य स्वरूपं स्वयुक्त्या व्याख्यायते। तत्र बौद्धमतमित्थं दरीदृश्यते सद्वस्तुमात्रं क्षणिकमेव। यत् सत् तत् क्षणिकम्। यथा– जलधरपटलः। बौद्धैः 'सत्' इत्यस्यार्थस्स्वीक्रियते अर्थक्रियाकारित्वम्। अर्थक्रियाकारित्वं सत्त्वम्।[६५] अर्थक्रियाकारित्वं नाम कार्योत्पादनसमर्थत्वम्। *न्यायविन्दु*टीकायाम्

‘अर्थक्रियाकारित्वम्’ इत्यस्यार्थनिर्णयावसरे उच्यते– ‘अर्थस्य प्रयोजनस्य क्रिया निष्पत्तिः, तस्यां सामर्थ्यं शक्तिः’।[६६] एवञ्च यस्य कार्योत्पादनसमर्थत्वमस्ति तदेव क्षणिकत्वम्। यथा– घटः। एवञ्च शरीरं नाम परमाणुसमूह एव। परमाणूनां समूहेनैव शरीरं निर्मीयते। परमाणवोऽपि क्षणिकाः। वस्तुतस्तु परमाणुर्वस्तु वा ध्वंसस्याव्यवहितपूर्वमेवापरमेकं सदृशपरमाणुमथवा वस्तु निर्माति। पूर्वविद्यमानः परमाणुः परवर्तिपरमाणोरुपादानकारणत्वेन विद्यते। अतोऽनयोरुपादानो-पादेयभावसम्बन्धो दरीदृश्यते। अतः पूर्ववर्तिशरीरस्य कर्मवासनादयः परवर्तिशरीरे संक्रमन्ति। एवञ्च पूर्वशरीरकृतकर्मादीन्युत्पद्यमानशरीरे फलीभूतानि भवन्ति। तत्र भूतात्मकपरमाणावेव चैतन्ये स्वीकृते सति भोगादयो निष्पद्यन्ते। एवञ्च शरीरातिरिक्तचैतन्यस्वरूपस्यात्मनः स्वीकारस्याऽऽवश्यकतैव नास्ति। देहातिरिक्ताऽऽत्मन्यस्वीकृते सत्यदृष्टस्यापेक्षैव न भवति। अदृष्टास्वीकारे सति तन्नियन्त्रकरूपेणेश्वरस्य स्वीकारोऽपि न कर्तव्यः। एवंरूपेण चार्वाकैर्बौद्ध-मतमवलम्ब्य क्षणभङ्गवादस्योत्थापनमीश्वरसत्तायाः खण्डन-ञ्चाकारि।

तत्र बौद्धमतं सम्यग्रूपेण परिलक्ष्यते चेद्द्रष्टुं शक्यते यत्, बौद्धाः क्षणभङ्गवादस्य प्रतिस्थापनार्थं कुशूलस्थबीजस्य क्षेत्रस्थबीजस्य चोदाहरणमददुः। यथा– समानमेव बीजं कुशूले स्थिते सत्यमङ्कुरं नोत्पादयति, क्षेत्रे स्थिते सत्यङ्कुरमुत्पादयति। तत्र क्षेत्रस्थितबीजे कुर्वद्रूपत्वं नामातिशयस्य ग्रहणङ्क्रियते। क्षेत्रस्थबीजस्थितकुर्वद्रूपत्वातिशय एवाङ्कुरोद्गमनस्य कारणम्।

किन्तु कुशूलस्थबीजे कुर्वद्रूपता नास्ति। एवञ्च कुशूलस्थक्षेत्रस्थ-बीजयोर्भिन्नत्वमवश्यं वर्तते। अतश्च वस्तु प्रतिक्षणं भिन्नमेव। एवञ्च भाववस्तुमात्रं क्षणिकम्। वस्तुनः स्थायित्वं नाम किमपि नास्ति। वस्तुतस्तु यस्य यस्मिन् कार्ये सामर्थ्यं वर्तते तत्तत्कार्यमकृत्वा नैव स्थातुं शक्नोति। पूर्वविद्यमानबीजं तत्सदृशमपरबीजमुत्पादयितुं समर्थमस्ति। अतो यस्य यत्र सामर्थ्यं तत्तत्कार्यमविलम्बेन करोत्येवेति नियमेन पूर्ववर्तिबीजं तत्सदृशं परवर्तिबीजमविलम्बेनोत्पादयत्येव। एवं द्वितीयक्षणस्थितबीजन्तदव्यवहित-तृतीयक्षणस्थबीजमुत्पादयति। तृतीयक्षणस्थितबीजं तदव्यवहितचतुर्थक्षणस्थ-बीजमुत्पादयति। अर्थाद् बीजमथवा वस्त्वेकक्षणमेव स्थायी भवति, क्षणाधिकं नैव स्थातुमर्हति। एवंरूपेण क्षणिकत्ववादोऽवश्यं सिद्ध्यत्येव।

बौद्धसम्मतक्षणभङ्गवादस्य खण्डनावसरे उच्यते यत्, क्षेत्रस्थबीजं कुशूलस्थबीजञ्चोभयमभिन्नमेव। वस्तुतस्तु क्षेत्रस्थबीजं मृज्जलादिसहकारि-कारणेनाङ्कुरोत्पादने समर्थमस्ति। गृहस्थबीजे सहकारिकारणं नास्ति। अतो गृहस्थबीजमङ्कुरोत्पादनेऽसमर्थमिति।

बौद्धैः स्वपक्षं दृढीकर्तुं पुनरुद्यते– सहकारिणस्स्वरूपं किम्? सहकारिकारणे यद्युत्पादनयोग्यता स्यात्तर्हि मृज्जलादिसहकारिकारणं बीजं विनैवाङ्कुरमु-त्पादयेत्। अतोऽङ्कुरोत्पादनं सहकारिकारणस्य साधरणधर्मो नास्ति। एवञ्च यस्य यत्र सामर्थ्यं नास्ति न तदुत्पादयति। अतः केवलं

सहकारिकारणेनाङ्कुरं नोत्पद्यते। क्षेत्रस्थबीजमेवाङ्कुरोत्पादने समर्थम्। एवञ्च क्षेत्रस्थबीजकुशूलस्थ-बीजयोरनयोर्विरोधो दृश्यते। क्षेत्रस्थबीजस्य यदङ्कुरोत्पादनसामर्थ्यं वर्तते, कुशूलस्थबीजे तु तत्सामर्थ्यं नैव दृश्यते। एवंरीत्या प्रतिक्षणं बीजं भिन्नं भिन्नमेव। क्षणभङ्गवादप्रतिस्थापनार्थं क्षणिकभूतपरमाणुषु भोगादय उत्पद्यन्ते इति प्रतिस्थाप्यते। पूर्ववर्तिपरमाणुध्वंसानन्तरं कर्मादीनि चोत्पद्यमानेष्वनन्तरपरमाणुषु संक्रमन्ति। क्षणिकरूपचेतनशरीरं विहायादृष्टमात्मा च नास्ति। अतश्चेश्वरसत्तामपि नैव स्वीकर्तुं शक्यते। एतन्मतखण्डनायाचार्येणोदयनेन *न्यायकुसुमाञ्जलौ* प्रथमस्तवके प्रतिपादितम्–

'न वैजात्यं विना तत्स्यात् न तस्मिन्ननुमा भवेत्।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना'॥[६७]

अस्याशयो वैजात्यं न सिद्ध्यति चेत् क्षणिकत्वमपि न सिद्ध्यति। वैजात्यसिद्ध्यर्थं विजातीयकारणस्य कुर्वद्रूपतायाः स्वीकारोऽपेक्षते। एवञ्च कार्यवैजात्यस्वीकारे सति कार्यहेतुना कारणानुमानं न सिद्ध्येत्। एवंरीत्या व्यतीत्यानुमानप्रमाणं नैव सिद्ध्येत् क्षणिकत्वम्। अपि च क्षणिकत्वं न निश्चीयते बौद्धसम्मतनिर्विकल्पप्रत्यक्षप्रमाणेनापि। यतो हि सविकल्पकप्रत्यक्षस्याभावात् क्षणिकत्वविषयकनिर्विकल्पकप्रत्यक्षं प्रमाणं भवितुं नार्हति। केवलं सहकारिकारणेन कुशूलस्थबीजक्षेत्रस्थबीजयोर्विरोधो दूरीभवति। वैजात्येऽसिद्धे सति बौद्धस्वीकृतक्षणिकवादस्य सिद्धिर्न भवति।

एवञ्च *न्यायकुसुमाञ्जलौ* बौद्धानां त्रिविधानुमानं द्रष्टुं शक्यते। यथा– कार्यात्कारणस्यानुमानम्, स्वभावानुमानम्, अनुपलब्धिलिङ्गकानुमानञ्चेति। बौद्धैः कार्यात्कारणमनुमीयते। अङ्कुररूपकार्यात्कुर्वद्रूपत्वविशिष्टबीजं कारणरूपेणानुमीयते। किन्तु कार्यात्कारणमनुमीयते चेद् बीजेऽङ्कुरकुर्वद्रूपत्वं स्वीकर्तव्यमङ्कुरेऽपि च कुर्वद्रूपत्वं स्वीकर्तव्यम्। अर्थात् कुर्वद्रूपत्वविशिष्ट-बीजमेव कुर्वद्रूपत्वविशिष्टाङ्कुरस्य कारणम्। एवञ्च बौद्धैः कारणत्वं न स्वीक्रियेत चेद् 'अर्थक्रियाकारित्वलक्षणं सत्' इत्येतादृशं सत्तायाः लक्षणमपि न सिद्ध्येत। बीजत्वरूपबीजेऽङ्कुरकारित्वरूपमङ्कुरकारणत्वं न स्यात् तर्हि तदसत् स्यात्, तस्यार्थक्रियाकारित्वेन ग्रहणं न स्यात्। यच्चार्थक्रियाकारित्वं न तन्न सत्। यच्च न सत् तन्न क्षणिकम्। एवञ्च यदि बीजस्य सद्रूपेण ग्रहणं क्रियेत तर्हि 'यत् सत् तत् क्षणिकम्' इत्यनुमानं न सिद्ध्यति।

एवञ्च वैजात्यं सिद्ध्यति चेद् बौद्धानां स्वभावानुमानमपि न सिद्ध्यति। यथा– बौद्धैः शिंशापां दृष्ट्वा शिंशपायां वृक्षस्य तादात्म्यदर्शनात् 'शिंशपा वृक्षस्वभावः' इत्येतादृशमनुमानं क्रियते। शिंशपा कदाचित् कम्पनशीला भवति, कदाचिद् निष्कम्पनशीला भवति। वस्तुत एका शिंशपा सहकारिकारणलाभे कम्पनशीला, सहकारिकारणालाभाच्च निष्कम्पनशीला इति न्यायमतानुसारेण यत् कम्पनशीलशिंशपायाः कारणं तदेव निष्कम्पनशिंशपायाः कारणं भवति। एवञ्च कम्पनशिंशपा निष्कम्पनशिंशपा चेत्युभयोर्वैजात्यं नैव सिद्ध्यति। किन्तु

बौद्धमतानुसारेण वैजात्यं स्वीक्रियते चेदत्रापि चलत्वाचलत्वरूप-विरुद्धधर्मयोर्वैजात्यं स्यात्, एवञ्च शिंशपात्वचलत्वाचलत्वरूपविरुद्धधर्मयोः समावेशे शिंशपाया भेदप्रसङ्गः स्यात्। एवञ्च शिंशपां दृष्ट्वा शिंशपा वृक्षस्वभाव इति स्वभावानुमानमपि न सिद्ध्यति।

यदि च वैजात्यं स्वीक्रियेत तर्ह्यनुपलब्धिलिङ्गकानुमानमपि न सिद्ध्येत। बौद्धैरङ्कुरोत्पादनात्पूर्वबीजे कुर्वद्रूपत्वं स्वीक्रियते। एवञ्च बीजे बीजत्वं कुर्वद्रूपत्वञ्चोभयमपि तिष्ठति। एवञ्च कुर्वद्रूपत्वं यथा बीजे तिष्ठति तद्वद् अन्यत्र घटादिवस्तुष्वपि तिष्ठत्येव। किञ्च बीजे समाविष्टं बीजत्वं कुर्वद्रूपत्वञ्च परस्परं भिन्नं स्यात्। उभयोः परस्पराभावसामानाधिकरण्यं स्वीक्रियते चेदेतदवश्यं स्वीकर्तव्यं बीजत्वकुर्वद्रूपत्वयोर्मध्येऽपि वैजात्यं वर्तत एव। एवञ्च वैजात्ये सत्यपि यद्येकत्र समावेशः क्रियेत तर्हि गोत्वस्याश्वत्वस्य चैकत्र समावेशः स्वीकर्तव्यः। एवञ्चाश्वत्वोपलब्धौ गोत्वानुपलब्धिरिति गोत्वाभावस्यानुमानं न सम्भवति।

सविकल्पकप्रत्यक्षप्रमाणेन क्षणिकत्वज्ञानं भवतीत्युच्येत तर्हि तदपि न सम्भवति। यतो हि यत् क्षणिकं तस्य च सविकल्पकज्ञानं कदापि न सम्भवति। यदि चोच्येत निर्विकल्पकप्रत्यक्षेण क्षणिकत्वनिश्चयः स्यात्, तर्हि तस्योत्तरमुदयनाचार्योऽकथयत् 'निश्चयं विना' अर्थात् सविकल्पकज्ञानं विना निर्विकल्पकप्रत्यक्षेण क्षणिकत्वं न सम्भवति। यतो हि निर्विकल्पकज्ञाने

विशेष्यविशेषणसम्बन्धावगाहिज्ञानं न भवति। अव्यवसायात्मकं भवति निर्विकल्पकप्रत्यक्षम्। अतस्तेन क्षणिकत्वस्य निश्चयो भवितुं नार्हति। अतश्च क्षणिकत्वमपि न सिद्ध्यति। अतः 'यत् सत् तत् क्षणिकम्' इत्यनुमानमपि न सिद्ध्यति। तेन भूतादिदेहो न क्षणिकः। भूतादिदेहे भोगादयो न सम्भवन्तीत्यतो देहातिरिक्तस्य चैतन्यस्वरूपस्यात्मनः स्वीकारोऽवश्यं कर्तव्यमेव। चैतन्यस्वरूपे आत्मन्येवादृष्टवशाद्भोगादयः सम्भवन्ति। एवञ्चादृष्टस्य नियन्त्रकरूपेणेश्वर-सत्ताऽवश्यं स्वीकर्तव्या।

**निष्कर्षः**– बौद्धसम्मतक्षणिकत्वे स्वीकृते सति न्यायसम्मतनित्यात्मनः क्षणिकत्वप्रसङ्गः स्यात्, अत आत्मनो नित्यत्वस्थापनायोभयग्रन्थे पूर्वपक्षिसम्मतक्षणिकत्ववादखण्डनेन यथाक्रमेण *आत्मतत्त्वविवेके* ग्रन्थे जीवात्मनो नित्यत्वं *न्यायकुसुञ्जलि*ग्रन्थे प्राधान्येन च परमात्मनो नित्यत्वं प्रतिस्थाप्यते।

## ३. आत्मस्थापनार्थं ग्रन्थद्वयस्य कुर्वद्रूपत्वविषये तुलनात्मकमा-लोचनम्–

***आत्मतत्त्वविवेकग्रन्थे* कुर्वद्रूपत्वखण्डनेनात्मस्थापनम्–**

दुरूहगम्भीरे *आत्मतत्त्वविविके* क्षणवादस्य सुदीर्घो विचारः प्रस्तुत उदयनाचार्येण। तस्मिन्नेव प्रसङ्गे क्षणभङ्गवादे कुर्वद्रूपस्यापि खण्डनं दरीदृश्यते। तस्य कुर्वद्रूपत्वस्याऽऽलोचनमत्र वितन्यते।

बौद्धा अङ्कुरकरणोपपादकरूपेण क्षेत्रस्थबीजे कुर्वद्रूपत्वातिशयस्य स्वीकारं कुर्वन्ति। कुर्वद्रूपत्वातिशयेन क्षेत्रस्थबीजे कुशूलस्थबीजे वैजात्यञ्च सम्पादयन्ति। तेन च क्षणभङ्गवादः सिद्ध्यते। कुर्वद्रूपातिशयेनैव क्षेत्रस्थबीजमङ्कुरोत्पादने समर्थं भवति, कुशुलस्थबीजञ्चाङ्कुरो-त्पादनेऽसमर्थम्। परन्त्विवदङ्कुर्वद्रूपत्वं नैव सिद्ध्यति विनिगमनाभावादिति नैयायिकमतमर्थात्प्रमाणाभावादिदङ्कुर्वद्रूपत्वं नैव सिद्ध्यति। प्रोच्यते च ग्रन्थकारेण– 'को हि नाम सुस्थात्मा प्रमाणशून्यमभ्युपगच्छेत्'।[६८] अर्थात्प्रामाणिकवस्तु सर्वैर्गृह्यते, न तु अप्रमाणिकं वस्तु। कुर्वद्रूपत्वं प्रामाणिकं नास्तीत्यस्मिन्विषये उच्यते ग्रन्थकारेण– 'स हि न तावत् प्रत्यक्षेणानुभूयते, तथानवसायात्। नाप्यनुमानेन, लिङ्गाभावात्'।[६९] अर्थात्कुर्वद्रूपत्वं यथा प्रत्यक्षेण न सिद्ध्यति तथैवानुमानेनापि साधयितुं न शक्यते। यतो हि कुर्वद्रूपत्वं निर्विकल्पज्ञानस्य विषयो भवितुं नार्हति।

बौद्धमते नामजात्यादिरहितङ्केवलं वस्तुविषयकं निर्विकल्पज्ञानमेव यथार्थज्ञानम्। सविकल्पकज्ञानञ्च न यथार्थज्ञानम्। बौद्धमते जातिप्रभृतिपदार्था अलीका भवन्ति चेदपि सविकल्पकज्ञानेनैव जातिप्रभृतिपदार्थानां भानं भवति। एवञ्च निर्विकल्पकज्ञानं सविकल्पकज्ञानेन सम्पद्यते। कस्मिंश्चिद्विषये सविकल्पकज्ञानाभावे निर्विकल्पज्ञानाभावोऽप्यनुमीयते। अस्मिन्विषये कल्पलतायामुच्यते– 'अवसायः सविकल्पकं तदेवालोचनोन्नायकम्, तदभावादालोचने प्रमाणान्तरं नास्ति इत्यर्थः'।[70] प्रकाशिकायाञ्च तदेव प्रतिपाद्यते– 'अवसायः सविकल्पकं तदभावे तदुन्नेयं न निर्विकल्पकमित्यर्थः'।[71] 'बीजमङ्कुरमुत्पादयति' इत्यस्मिन्सविकल्पात्मकज्ञाने बीजस्याङ्कुर-रूपकार्यस्याव्यवहितकालिकत्वं सिद्ध्यति चेदपि कुर्वद्रूपत्वस्य भानमत्र न भवति। कुर्वद्रूपत्वस्य ज्ञानं सविकल्पज्ञाने न भवतीति हेतोरनुमातुं शक्यते यत्, निर्विकल्पज्ञानेऽपि कुर्वद्रूपत्वस्य ज्ञानं न भवतीति। अत एव कुर्वद्रूपत्वविषये प्रत्यक्षं नैव वर्तते। दीधितिकारश्चास्मिन्प्रसङ्गे प्रोक्तवान्– 'बीजमङ्कुरं करोतीति बुद्धेश्च फलोपहितं स्वरूपं फलाव्यवहित-प्राक्कालवृत्तिस्वरूपं वा विषयो न तु कुर्वद्रूपत्वमिति'।[72]

न केवलं प्रत्यक्षप्रमाणेन, अपि त्वनुमानेनापि कुर्वद्रूपत्वं न सिद्ध्यति। अनुमितिस्थले हेतौ साध्यस्य व्याप्तिज्ञानमावश्यकम्। प्रकृतस्थले कुर्वद्रूपत्वानुमितावश्यं यस्मिन् हेतौ कुर्वद्रूपत्वस्य व्याप्तिज्ञानं भवेत्, तेन हेतुना

कुर्वद्रूपत्वस्यानुमितिर्भवेत्। किन्तु कुर्वद्रूपत्वसाध्यमेवाप्रसिद्धमस्ति, तेन तत्र व्याप्तिज्ञानं भवितुं नार्हति। व्याप्तिज्ञानाभावाद्व्याप्तिज्ञानविषयो लिङ्गमप्यप्रसिद्धम्। प्रसङ्गे चास्मिन्दीधितिकारेणोच्यते– 'साध्याप्रसिद्ध्या व्याप्त्यग्रहेण लिङ्गत्वायोगादिति तज्जातीयत्वाविशेषेऽपि करणाकरणेन विना प्रयोजकविशेषमुपपद्यते'।[७३] अत एवानुमानप्रमाणेनापि कुर्वद्रूपत्वं साधयितुं न शक्यते बौद्धैः। वस्तुतो बौद्धनये प्रत्यक्षम्, अनुमानञ्चेति प्रमाणद्वयं विहायान्यत्प्रमाणं नैव स्वीक्रियते, अत उदयनाचार्येण कुर्वद्रूपत्वविषये प्रमाणद्वयस्य खण्डनं विहितं स्वग्रन्थे *आत्मतत्त्वविवेके*।

इतःपरं बौद्धाः कुर्वद्रूपत्वप्रतिपादनाय बहु चेष्टन्ते। तस्यापि खण्डनं सुमनोज्ञतया कृतमुदयनाचार्येणा*त्मतत्त्वविवेके*। तदधः सामान्येनालोच्यते।

वैजात्यसाधनाय कुर्वद्रूपत्वं स्वीकुर्वन्ति बौद्धास्तदपि न यौक्तिकमस्तीत्युक्तं ग्रन्थकारेण। कारणञ्च दर्शितं सहकारिकारणेनैव वैजात्यं दूरीभूतत्वात्। तथा हि सहकारिकारणसमवधाने क्षेत्रस्थबीजमङ्कुरोत्पादने समर्थं भवति। सहकारिकारणसमवधानाभावात् कुशूलस्थबीजमङ्कुरोत्पादनेऽसमर्थं भवति। सहकारिकारणेन क्षेत्रस्थबीजे तथा कुशूलस्थबीजे वैरुद्ध्यस्य दूरीभूतत्वाद्वैजात्यं न सिद्ध्यति, तेन च क्षणिकत्ववादोऽपि न सिद्ध्यति। अतः कुर्वद्रूपत्वातिशयकल्पनायाः प्रयोजनमेव नास्ति। यदि च कुर्वद्रूपातिशयस्य कल्पना क्रियते तर्हि तत्र कल्पनायां प्रमाणं न स्यात्, यतो हि तत्राऽङ्कुरे

बीजत्वजातिस्वीकारे लाघवं भवति, तच्च प्रत्यक्षसिद्धम्। विपर्यये सत्यर्थादतीन्द्रियकुर्वद्रूपत्वकल्पनायां गौरवदोषप्रसङ्गः। प्रसङ्गेऽस्मिन् कल्पलताटीकायामुच्यते– 'बीजेत्वेनैव प्रत्यक्षसिद्धेनाङ्कुरकारणतावच्छेदे सम्भवति तदर्थमतीन्द्रियजातिकल्पना न सम्भवति'।[७४]

अङ्कुरार्थं यदि कुर्वद्रूपत्वातिशयोऽङ्गीक्रियते तर्ह्यतीन्द्रियचक्षुरिन्द्रिय-प्रभृतीनां यत्कारणत्वं रूपज्ञानादीन् प्रति स्वीकृतं बौद्धैस्तस्य लोपप्रसङ्गः। यतो हि तत्रापि कुर्वद्रूपत्वविशिष्टशरीरमथवाऽऽलोको रूपज्ञानादिकारणं स्याद् इत्येवंरूपेण कल्पितत्वादतीन्द्रियादीनां लोपापत्तिः। अस्य मतस्य समर्थनं कल्पलतायामित्थन्दरीदृश्यते यथा– 'अतीन्द्रियेति। बाह्यालोकादेरेव कुर्वद्रूपात् साक्षात्कारोपपत्ताविन्द्रियकल्पनापि न स्यादित्यर्थः'।[७५]

कुर्वद्रूपत्वबाधके चतुर्थो हेतुर्भवति– विकल्पानुपपत्तेः। अर्थात्कुर्वद्रूपत्वे बीजत्वेन संग्राहकत्वस्य प्रतिक्षेपकत्वविकल्पस्य वानुपन्नत्वात् कुर्वद्रूपत्वेन बीजादिषु कारणताऽसिद्धाऽथवा कुर्वद्रूपत्वमेवासिद्धम्। शिंशपात्वरूपजाति-र्वृक्षत्वजातेः संग्राहिका भवति चेदपि कुर्वद्रूपत्वं बीजत्वजातेः संग्राहकं भवितुं नार्हति। एवञ्च गोत्वजातिरश्वत्वजातेः प्रतिक्षेपिका भवति चेदपि कुर्वद्रूपत्वं बीजत्वजातेः प्रतिक्षेपिका भवितुं नार्हति। अस्मिन्प्रसङ्गे प्रकाशिकायामुच्यते– 'विकल्पेति। शालित्वकुर्वद्रूपत्वयोर्गोत्वाश्वत्वयोरिव विरोधः अविरोधे वा

शालित्वं तद्व्यापकं तदेव वा शालित्वं व्यापकमिति विकल्प्य यथायथं दूष्यत्वादित्यर्थः'।[७६]

कुर्वद्रूपत्वबाधके पञ्चमो हेतुर्भवति– विशेषस्य विशेषं प्रति प्रयोजकत्वाच्च। अर्थाद्बौद्धैः कुर्वद्रूपातिशयस्य बीजनिष्ठविशेषता स्वीक्रियते। सा च बीजनिष्ठविशेषताऽङ्कुरगतविशेषतायाः कारणं भवति। तेनाङ्कुरसामान्यं प्रति बीजसामान्यस्य कारणत्वं खण्डितुं न शक्यते, यतो हि विशेषस्य कारणं यथा विशेषो भवति तथैव सामान्यस्य कारणं सामान्यं भवत्येव। दीधितिकारेण चोच्यतेऽस्मिन्प्रसङ्गे– 'विशेषस्येति। बीजगतविशेषस्य बीजकार्याङ्कुरस्य विशेषं प्रति प्रयोजकत्वञ्च बीजसामान्यस्याङ्कुरसामान्यप्रयोजकतायाः प्रतिक्षेपकत्वं ....इत्यर्थः'।[७७] अत्रोदाहरणत्वेन इत्थं वक्तुं शक्यते यत्, लाक्षादिसेचनपूर्वकं कार्पासबीजवपनेन लोहितकार्पासोत्पन्ने सति बीजे कार्पासस्य कारणता निरस्ता न भवति तद्वत् सामान्यविषयेऽपि भाव्यमर्थाद् अङ्कुरसामान्यं प्रति बीजसामान्यस्य कारणत्वमवश्यमेव स्वीकरणीयम्।

एवंरूपेण पञ्चभिर्हेतुभिर्बौद्धसम्मतकुर्वद्रूपत्वं निराक्रियते आचार्येणोदयनेन। वस्तुतो बौद्धसम्मतकुर्वद्रूपत्वं निराकरणाय ग्रन्थकारेण न्यायसम्मताः पञ्च हेतवः प्रोक्ताः। यथा– प्रमाणाभावः, कल्पनागौरवः, अतीन्द्रियगोलकस्य विलोपप्रसङ्गः, विकल्पानुपपत्तिः विशेषप्रयोजकत्वञ्चेति। एवञ्च स्वग्रन्थे प्रोच्यते– 'न, दृष्टसमवधानमात्रेणैवोपपत्तौ तत्कल्पनायां प्रमाणाभावात्,

कल्पनागौरवप्रसङ्गप्रतिहतत्वात्, अतीन्द्रियादिविलोपप्रसङ्गात्, विकल्पानुपपत्तेः, विशेषस्य विशेषं प्रति प्रयोजकत्वाच्चेति'।[७८]

एवंरूपेण बौद्धप्रपञ्चितस्य कुर्वद्रूपत्वस्य खण्डनं वरीवृत्यते *आत्मतत्त्वविवेके*। तेन च खण्डनेन क्षणभङ्गवादोऽपि न सिद्ध्यति। अनेनात्मनो नित्यत्वं प्रतिस्थाप्यते।

***न्यायकुसुमाञ्जलि*ग्रन्थे कुर्वद्रूपत्वखण्डनेनात्मस्थापनम्–**

बौद्धैः क्षणभङ्गवादस्य प्रतिस्थापनार्थं कुशूलस्थबीजक्षेत्रस्थबीजयोः प्रसङ्ग आनीयते। यथा– समानमेव बीजं कुशूले स्थिते सत्यमङ्कुरं नोत्पादयति, परन्तु क्षेत्रे स्थिते सत्यङ्कुरमुत्पादयति। तत्र क्षेत्रस्थितबीजे कुर्वद्रूपत्वं नामातिशयस्य ग्रहणं क्रियते। क्षेत्रस्थबीजस्थकुर्वद्रूपत्वातिशय एवाङ्कुरोद्गमनस्य कारणम्। किन्तु कुशूलस्थबीजे कुर्वद्रूपता नास्ति। एवञ्च कुशूलस्थक्षेत्रस्थबीजयोर्भिन्नत्वमवश्यं वर्तते। अतश्च वस्तु प्रतिक्षणं भिन्नमेव। पूर्वविद्यमानबीजं तत्सदृशमपरबीजमुत्पादयितुं समर्थमस्ति। अतो यस्य यत्र सामर्थ्यं तत्तत्कार्यमविलम्बेन करोत्येवेति नियमेन पूर्ववर्तिबीजं तत्सदृशं परवर्तिबीजमविलम्बेनोत्पादयत्येव। एवं द्वितीयक्षणस्थितबीजन्तदव्यवहिततृतीयक्षणस्थबीजमुत्पादयति। तृतीयक्षणस्थितबीजं तदव्यहितचतुर्थक्षणस्थ-

बीजमुत्पादयति। अर्थाद् बीजमथवा वस्त्वेकक्षणमेव स्थायी भवति, क्षणाधिकं नैव स्थातुमर्हति। एवंरूपेण क्षणिकत्ववादोऽपि सिद्ध्यति।

बौद्धसम्मतक्षणभङ्गवादस्य खण्डनावसरे उच्यते– क्षेत्रस्थबीजं कुशूलस्थबीजञ्चोभयमभिन्नमेव। वस्तुतस्तु क्षेत्रबीजं मृज्जलादिसहकारिकारणे-नाङ्कुरोत्पादने समर्थमस्ति। सहकारिकारणाभावाद् गृहस्थबीजमङ्कुरोत्पा-दनेऽसमर्थम्। प्रसङ्गेऽस्मिन् हरिदासीटीकायामुच्यते– 'स्थिर एव बीजादौ सहकारिलाभालाभाभ्यामेव कार्यजन्माजन्मनोरुपपत्ते वीजत्वादिनैव अङ्कुरादिजनकतोपपत्तेः'।[७९] केवलं सहकारिकारणेन कुशूलस्थबीजक्षेत्रस्थ-बीजयोर्विरोधो दूरीभवति। अतो वैजात्यसिद्ध्यर्थं विजातीयकारणस्य कुर्वद्रूपतायाः स्वीकारो नापेक्षते। वैजात्येऽसिद्धे सति बौद्धस्वीकृतक्षणिकवादस्य सिद्धिर्न भवति।

पुनश्च बीजे बीजत्वं कुर्वद्रूपत्वञ्चोभयमपि तिष्ठति चेदपि कुर्वद्रूपत्वं यथा बीजे तिष्ठति तद्वद् अन्यत्र घटादिवस्तुष्वपि तिष्ठत्येव। अतो हरिदासीटीकायामुच्यते– 'किञ्चाङ्कुरकुर्वद्रूपत्वं न जातिः शालित्वादिना सङ्करात्। शालित्वमपहाय यवे तस्य सत्त्वात्। शालित्वस्य कुशूलस्थे शालौ तदपहाय सत्त्वात्। कुर्वद्रूपे शालौ तूभयोः समावेशादिति'।[८०] एवञ्च बीजे समाविष्टं बीजत्वं कुर्वद्रूपत्वञ्च परस्परं भिन्नं स्यात्। एवञ्चोभयोः परस्पराभावसामानाधिकरण्यं स्वीक्रियते चेदेतदवश्यं स्वीकर्तव्यं

बीजत्वकुर्वद्रूपत्वयोर्मध्येऽपि वैजात्यं वर्तत एव। एवञ्च वैजात्ये सत्यपि यद्येकत्र समावेशः क्रियेत तर्हि गोत्वस्याश्वत्वस्य चैकत्र समावेशः स्वीकर्तव्यः। एवञ्चाश्वत्वोपलब्धौ गोत्वानुपलब्धिरिति गोत्वाभावस्यानुमानं न सम्भवति। एवंरूपेणोदयनाचार्येण *न्यायकुसुमाञ्जलौ* बौद्धसम्मतकुर्वद्रूपत्वस्य खण्डनं क्रियते। इत्थं ग्रन्थद्वये बौद्धसम्मतकुर्वद्रूपत्वस्य खण्डनेन क्षणभङ्गवादखण्डनं दरीदृश्यते। अनेनात्मनो नित्यत्वञ्च प्रतिस्थाप्यते।

**निष्कर्षः**– बौद्धसम्मतक्षणिकत्ववादस्य मूलकेन्द्रविन्दुः कुर्वद्रूपत्वम्। उभयग्रन्थे क्षणिकत्ववादखण्डनाय कुर्वद्रूपत्वस्य खण्डनं विहितमाचार्येणोदयनेन। अनेन कुर्वद्रूपत्वखण्डनेन क्षणिकत्ववादः खण्डितो भवति। तेन च आत्मनोऽनित्यत्वप्रसङ्गोऽप्यपगच्छति।

## ४. आत्मविषये अनुपलब्धिप्रमाणस्य तुलनात्मकमालोचनम्–

## *आत्मतत्त्वविवेक*ग्रन्थे अनुपलब्धिवादखण्डनेनात्मस्थापनम्–

अस्मिन् जगति प्रसिद्धवादेष्वन्यतमो भवति बौद्धस्वीकृतानुपलम्भवादः। *आत्मतत्त्वविवेक*ग्रन्थे आचार्येणोदयनेन बौद्धस्वीकृतानुपलम्भवादस्य खण्डनं विधीयते। अस्यानुपलम्भवादस्य वर्णनमा*त्मतत्त्वविवेक*ग्रन्थे चतुर्थपरिच्छेदे दरीदृश्यते। बौद्धानामाशयः क्षणभङ्गबाह्यार्थभङ्गवादादिनात्मनोऽभावत्वं न सिद्ध्यतीति सत्यम्, परन्त्वनुपलब्ध्या त्वात्मनोऽभावोऽवश्यं सिद्ध्यति।[८१]

यथानुपलब्धिवशात् शशविषाणादीनां सत्ता न सिद्ध्यति तद्वदात्मनोऽनुप-लब्धिवशात् सत्ता नास्त्येव।

अत्र संशय आगच्छति, इयमनुपलब्धिरेकपुरुषनिष्ठा सर्वपुरुषनिष्ठा वा। सर्वेषामनुपलब्धिरिति वक्तुं न शक्यते, यतो ह्यन्येषां ज्ञानाज्ञानादीनां ज्ञानमन्यैर्नानुभूयते। यदि पुरुषविशेषेणैवानुपलब्धिस्तर्हि व्यभिचारदोषापत्तिः। अर्थाद्व्यक्तिविशेषस्यानुपलब्ध्या वस्तूनामभावं स्वीकर्तुं न शक्यते, यतो हीन्द्रियादिदोषकारणादप्युनपलब्धिर्भवितुमर्हति। मतमिदं ग्रन्थकारेण प्रतिपादितं यथा– 'सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः'।[८२]

एवं दोषापतिते सति बौद्धैरुच्यते– दृश्यत्वे सति यस्यानुपलब्धि-स्तस्याभावः स्वीकृतः।[८३] परन्तु एवंस्वीकृतेऽपि दोषप्रसङ्गः। यतो हि बौद्धा आत्मनो दृश्यत्वं नाङ्गीकुर्वन्ति। अतो दृश्यत्वविशेषणमात्मनो नैव दातुं शक्नुवन्ति, दृश्यत्वविशेषणे स्वीकृते सति स्वयमेव तस्यात्मनः सत्ता बौद्धैरङ्गीक्रियेत। तस्य पुनरभावः कथं बौद्धैः स्वीक्रियेत। यदि नैयायिकमतानुसारेण दृश्यत्वविशेषणमिति प्रदीयेत तदपि न समीचीनम्, अनुमानस्य स्वतन्त्रसाधनत्वात्। एवञ्चात्मा यदि दर्शनयोग्यो भवेत्तस्यानुपलब्धिरिति विशेषणं नैव युज्यते। यदि चानुपलब्धस्तर्हि तस्य दृश्यत्वं नैव कथमपि युज्यते। अर्थाद् दृश्यत्वे सत्यनुपलब्धेः इति हेतुः सर्वथाऽसिद्ध एव। वस्तुतः 'आत्मा नास्ति अनुपलब्धेः' इत्यस्मिन्ननुमाने

आत्मनः पक्षत्वं यदि साधयेत्तर्ह्यात्मनोऽस्तित्वं सिद्ध्यत्येव, तेन च 'नास्ति' इति साध्यस्य बाधो भवति, यद्यात्मरूपपक्ष एव न सिद्ध्येत्तर्हि पक्षासिद्धत्वादनुमानमेव न सिद्ध्यतीति। इत्येवंरूपेण बौद्धानामनुपलम्भवादस्य खण्डनञ्चक्रे आचार्येणोदयनेन। तेन च शरीराद्यतिरिक्तात्मनः सत्ता प्रतिस्थाप्यते।

***न्यायकुसुमाञ्जलिदृशाऽनुपलब्धिवादखण्डनेनात्मस्थापनम्–***

*न्यायकुसुमाञ्जलि*ग्रन्थे तृतीयस्तवके निरीश्वरमतस्य खण्डनं वर्तते। *न्यायकुसुमाञ्जलि*ग्रन्थे दृश्यमानेषु पञ्चविप्रतिपत्तिवाक्येष्वन्यतमं विप्रतिपत्तिवाक्यं भवति यथा– 'अनुपलब्धिरभावसाधिका न वेति'। भाट्टमते ईश्वरस्य बाधकप्रमाणसत्त्वाद् ईश्वरसिद्धिर्न भवति। तच्च बाधकं भवत्यनुपलब्धिरिति। अर्थाद्यदीश्वरः स्यात् तर्हि तस्योपलब्धिरवश्यं भवेत्, किन्तु तस्योपलब्धिर्न भवति, अतोऽनुपलब्धिरूपबाधकसत्त्वादीश्वरास्तित्वं नैव स्वीकर्तुं शक्यते। प्रसङ्गेऽस्मिन् ग्रन्थे दृश्यते– 'तथा हि– यदि स्यादुपलभ्येत'।[८४] अत्र बोद्धव्यो यद् यदि भाट्टा ईश्वरस्यान्योन्याभावमत्यन्ताभावं वा साधयेयुः तर्हि नैयायिकपक्षसिद्धिर्भवति। यतो हीश्वरस्यान्योन्याभाव ईश्वरभिन्नं सर्वत्र स्वीकर्तव्यः, एवञ्च ईश्वर आकाशादिवद् अवृत्तिपदार्थत्वाद् आकाशाभाववद् ईश्वराभावोऽपि सर्वत्र स्यात्। ईश्वरस्य प्रागाद्यभावन्तु भाट्टा अपि न स्वीकुर्वन्ति। अतो भाट्टानां प्रतिपाद्यविषयो यत्, क्षित्यादिकं यदि सकर्तृकं स्यात्, वेदश्च यदि सकर्तृकः स्यात् तदा तद्वत्तया उपलभ्येत इति।[८५] एवञ्चानुपलब्धिः

क्षित्यादेर्वेदस्य च सकर्तृकस्य बाधिका। एतन्न समीचीनम्, यद्यनुपलब्धिमात्रं पदार्थस्य बाधकं स्यात् तदा धर्माधर्मादीनामुच्छेदापत्तिरिति। अतो योग्यानुपलब्धिरेव पदार्थस्य बाधिकेति स्वीकर्तव्यम्। तत्र पूर्वपक्षिभिरुच्यते ईश्वरस्यायोग्यत्वे सत्यनुपलब्धिर्यदीश्वरस्य बाधिका न स्यात् तर्हि शशशृङ्गादीनामप्ययोग्यत्वेऽनुपलब्धिर्बाधिका न स्यात्। तत्र खण्डनावसरे उच्यते– 'शृङ्गं योग्यमस्ति, किन्तु शशे शृङ्गस्यानुपलब्धिः योग्यानुपलब्धिरिति'।[८६] तत्र पुनः पूर्वपक्षिभिरुच्यते, शशे शृङ्गस्य योग्यानुपलब्धिर्बाधिका भवितुमर्हति। एवञ्चोच्यते, शृङ्गं यथा योग्यतया व्याप्तं तद्वत् चेतनशरीरस्य कर्तृत्वमपि योग्यतोपाधिना व्याप्तम्। तथा च यत्र यत्र शरीरचेतने शरीररूपयोग्योपाधिमत्ता नास्ति तत्र तत्र कर्तृत्वमपि नास्ति। एवञ्चेश्वरे शरीररूपयोग्योपाधिमत्ताभावात् कर्तृत्वमपि नास्ति। कर्तृत्वव्यापकं यत् प्रयोजनाभिसन्धानमर्थात् फलेच्छा तद् नित्यतृप्ते ईश्वरे न सम्भवति। तथा च फलेच्छारूपप्रयोजनाभिसन्धानाभावाद् उपायेच्छाऽपि न सम्भवति, उपायेच्छा-भावात् प्रवृत्तिरपि न भवति। एवञ्च प्रवृत्तिर्यत्र न भवति तत्र कर्तृत्वमपि न भवति। तथा च व्यापकाभावे व्याप्यरूपकर्तृत्वस्याभावोऽनुमीयते।[८७]

अस्योत्तरत्वेनोच्यते– 'अहं सुखी' 'अहं दुःखी' चेत्यादौ मानसप्रत्यक्ष-गम्यत्वात् सर्वेषामेव स्वात्मा प्रत्यक्षयोग्योऽस्ति। किन्तु सुषुप्तौ ज्ञानाद्यभावाद् आत्मन उपलब्धिर्न भवति। परन्तु तथापि योग्यानुपब्ध्या तत्काले

आत्मनोऽभावो नैव स्वीकर्तुं शक्यते। एवञ्च यदि योग्यानुपलब्ध्या स्वात्मनोऽभावं साधयितुं न शक्येत तर्ह्ययोग्येश्वरस्याभावमनुपलब्ध्या साधयितुं न शक्यते। अत्र प्रश्नोऽवश्यं भवेत् सुषुप्तावात्मनः प्रत्यक्षं कथं न भवति। अस्य समाधानमत्यन्तं सुमनोज्ञतयोदयनाचार्येण प्रत्यपादि यथा– सामग्र्यभाव एव वस्तुनः अभाव इत्युच्यते।[८८] आत्मनः प्रत्यक्षमपि सामग्रीसत्त्वादर्थाद् विशेषगुणसहकारेणैव भवति, नान्यथा। आत्मनो विशेषगुणा ज्ञानेच्छाकृतिद्वेष-सुखदुःखानि चेति। 'अहं जानामि', 'अहम् इच्छामि', 'अहं करोमि' चेत्यादौ ज्ञानादिविशिष्टे एव स्वात्मनः प्रत्यक्षं भवति न तु केवलम् 'अहम्' इत्यनेन। यथा घटस्य प्रत्यक्षयोग्यत्वेऽप्यालोकादिसहकारिकारणाभावात् तस्योपलब्धिर्न भवति तद्वद् आत्मनः प्रत्यक्षयोग्यत्वेऽपि ज्ञानादिसहकारिकारणादेव प्रत्यक्षं भवति, सुषुप्तौ ज्ञानाद्यभावाद् आत्मनः प्रत्यक्षं न भवति। अत्र पुनः प्रश्नोऽयम-वश्यमागच्छेत् सुषुप्तौ ज्ञानादीनि किमर्थं नोत्पद्यन्त इति। अस्योत्तरञ्चोच्यते– 'मनसोऽतीन्द्रियप्रत्यासन्नतयाऽजननात् तत् प्रत्यासत्तौ च पश्चाज्जननात्'।[८९] अर्थाद् मनसा साकं बहिरिन्द्रियस्य यदा संयोगो भवति तदैव ज्ञानमुत्पद्यते। परन्तु सुषुप्तौ मनसा साकं बहिरिन्द्रियस्य संयोगाभावाज्ज्ञानं नोत्पद्यते। जाग्रत्काले मनसा बहिरिन्द्रियाणां संयोगाज्ज्ञानमुत्पद्यते। सम्प्रति सुषुप्ताविन्द्रियाणां मनसा संयोगाभावाज्ज्ञानाद्यभावाच्च स्वात्मा नोपलभ्यत इत्युक्तम्। परन्तु परस्यात्मा कथं परस्यायोग्यः इति प्रश्नोऽयमवश्यं भवति। अस्योत्तरत्वेनोदयनाचार्यो वक्ति–

'यद्धि मनो यच्छरीरं यानीन्द्रियाणि यस्यादृष्टेनाकृष्टानि तानि तस्यैवेति नियमः' इति।[१०] अर्थात् केन मनसा कस्यात्मनो ज्ञानं भवतीत्यस्मिन्विषये स्वस्वकर्मार्जितादृष्टमेव नियामकम्। यन्मनो यस्यादृष्टेनाकृष्टं भवति तदीयसाक्षात्कारस्य जनकं भवति। एवञ्च शरीरस्य इन्द्रियस्य च विषयेऽपि एवं कल्पितव्यम्। अर्थाद् यच्छरीरं यस्यादृष्टेनाकृष्टं भवति तच्छरीरावच्छेदेनैव तदीयज्ञानकारणं भवति। एवञ्च यदिन्द्रियं यस्यादृष्टेनाकृष्टं तदवच्छेदेन तदीयज्ञानकारणं भवतीति बोद्धव्यम्। अत एव प्रथमस्तवके चतुर्थकारिकायामुच्यत उदयनाचार्येण– 'प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः'।[११]

एवंरूपेण परस्यात्मविषये योग्यानुपलब्धिर्नास्ति। एवञ्चायोग्यानुपलब्धिर्वस्तुनो बाधकमर्थादभावसाधकं न भवतीति। अत एवोच्यते 'न हि शशशृङ्गमयोग्यनुपलब्ध्या कश्चिन्निषेधति। न च प्रकृते योग्यानुपलब्धिं कश्चिन्मन्यते'।[१२] अर्थाद् अयोग्यानुपलब्ध्या शशशृङ्गस्याभावो न साध्यते कैश्चित्। एवं परमात्मापि योग्यानुपलब्धिर्नास्ति, अतोऽयोग्यानुपलब्ध्या परमात्मनोऽभावं साधयितुं न शक्यते। यद्ययोग्यानुपलब्धिर्बाधिका न स्यात्तर्हि शशशृङ्गस्य सिद्धिरापत्तिस्स्यात्। बाधकाभावे एव वस्तूनां सिद्धिरिति नास्ति, बाधकप्रमाणाभावे साधकप्रमाणसद्भावे वस्तूनां सिद्धिरिति। शशशृङ्गमित्यादिवस्तु कदापि प्रत्यक्षगोचरीभूतं न भवति, तच्च

सर्वथाऽयोग्यम्। अयोग्यस्यानुपलब्धिर्नैव स्वीकर्तुं शक्यते। प्रसङ्गेऽस्मिन् हरिदासीटीका-यामुच्यते– 'शृङ्गन्तु योग्यमेव तथा च कुतः प्रतिबन्धिः, अयोग्यन्तु शशशृङ्गं न बाध्यते किन्तु साधकाभाव एव तत्र।[९३] वस्तुतः शशशृङ्गः प्रभृत्ययोग्यविषयाणां प्रतिषेधः सम्भवति न वेति प्रश्नस्य समाधानं *न्यायकुसुमाञ्जलौ* तृतीयस्तवके तृतीयकारिकायां प्रदीयते, तथा चोच्यते–

'दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने'॥[९४]

अर्थाद् अयोग्यशशशृङ्गप्रभृतीनां प्रतिषेधो नैव सम्भवति। शशशृङ्गस्योपलब्धिं न कश्चन कृतवान्, तच्च सर्वथाऽनुपलब्धम्। पदार्थस्योपलब्ध्यर्थं यत्सामाग्र्यपेक्षते तद्दोषग्रस्तं भवति चेत् पदार्थस्य भ्रमात्मकज्ञानमुत्पद्येत। अभावस्य प्रतियोगिभिन्नकारणानां तथा प्रतियोगिजन्येन्द्रियार्थसन्निकर्षभिन्न-कारणानामुपस्थितिर्योग्यता। उच्यते च– 'तदितरसामग्रीसाकल्यं हि तत्'।[९५] शशशृङ्गाद्यलीकवस्तूनामप्युपलब्धिसामग्र्याः दोषनिष्ठत्वाद् अनुपलब्धि-ज्ञानमपि भ्रमात्मकम्। एवञ्चात्र प्रश्नोऽवश्यं स्यात् 'शशशृङ्गं नास्ति' इति वाक्यस्यार्थबोधः कथं स्यात्। तदोदयनाचार्येण कथ्यते– 'शशे अधिकरणे विषाणाभावोऽस्ति'।[९६] तत्र शशशृङ्गं निषेधस्य प्रतियोगी न भवति, शशे अधिकरणे शृङ्गस्य अभाव एव प्रतिषेधवाक्यस्य प्रतिपाद्यत्वात् शशे प्रतियोगित्वं नास्ति, अपि तु शृङ्गमेव प्रतियोगी। नैयायिका

वैशेषिकाश्चालीकप्रतियोगिकस्य प्रतिषेधं नैव स्वीकुर्वन्ति। प्रतियोगी यद्यलीकं स्यात् तर्हि तस्याभावोऽप्यलीक एव। तथा च तस्यालीकाश्रयस्य प्रत्यक्षमपि न सम्भवेत्, अनुमानमपि न सम्भवेत्। अत 'ईश्वरः न कर्ता कर्तृत्वव्यापकस्वार्थाभिसन्धानरहितत्वात्' इत्यस्मिन्ननुमाने स्वार्थाभिसन्धानाभावेन पक्षत्वेनेश्वरे कर्तृत्वाभावसाधनं न सम्भवति। एवञ्च प्रकृतानुमाने पक्षस्याप्रसिद्धत्वाद् अनुमानमिदमाश्रयासिद्धिदोषेण ग्रस्तम्। यदीश्वरोऽलीकः स्यात् तर्हि तत्राभावसाधनस्य प्रयोजनमेव नास्ति। यतो ह्यलीकोऽभावस्याधिकरणं नैव भवितुमर्हति। अतोऽसत्ख्यातिवादिनोऽसदीश्वरस्य मिथ्याभासमवलम्ब्य तस्याश्रयस्य कर्तृत्वाभावं साधयितुमिच्छन्ति, तन्न यौक्तिकम्। यद् आभासप्रतिपन्नम् तन्निषेधस्याधिकरणं भवितुं नार्हति। एवञ्च *न्यायकुसुमाञ्जलौ* तृतीयस्तवके अस्मिन्प्रसङ्गे उच्यते–

'व्यावर्त्ताभाववत्तैव भाविकी हि विशेष्यता।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता'॥[९७]

तत्र 'व्यावर्त्त्यः' इत्यस्यार्थः प्रतियोगी। प्रसङ्गेऽस्मिन् प्रकाशटीकायामुच्यते– 'व्यावर्त्त्येति। व्यावर्त्त्यः= प्रतियोगी, तदभाववत्ता भाविकी पारमार्थिकी विशेष्यता आश्रयता, वस्तुनः प्रामाणिकस्य, स्वाभावविरहरूपत्वं च प्रतियोगित्वम्'।[९८] अर्थाद् यद् अलीकं तदभावस्य आश्रयं भवितुं नार्हति। एवञ्च 'ईश्वरो नास्ति' इति असतद्रूपेणालीकत्वेन वेश्वरं प्रतियोगिनं स्वीकृत्याभावं साधयितुं न शक्यते।

अभावस्याभावात्मकं यद् भावप्रतियोगी तद् वस्त्वेव भवितुमर्हति न त्वलीकमिति। एवंरूपेणोदयनाचार्येणाभावस्यालीकानुयोगिताऽलीकप्रतियोगिता चोभयस्य खण्डनमकारि। तेन चाऽनुपब्धिखण्डनेनेश्वरस्य सत्ता प्रतिस्थाप्यते।

**निष्कर्षः**– बौद्धसम्मतानुपलब्धिवादे स्वीकृते शरीराद्यतिरिक्तात्मसत्ता न सिद्ध्यति। अत उभयग्रन्थे अनुपलब्धिवादखण्डनेन देहातिरिक्तात्मसत्ता स्थापिताऽऽचार्येण।

**५. आत्मनः स्वरूपविचारे ग्रन्थद्वयस्य तुलनात्मकसमीक्षा–**

***आत्मतत्त्वविवेक*ग्रन्थे आत्मस्वरूपविचारः–**

*आत्मतत्त्वविवेक*ग्रन्थे पूर्वपक्षिबौद्धमतखण्डनेनात्मसत्त्वं प्रतिस्थापितम्, तेन साकमाऽऽत्मनः स्वरूपमपि सामान्येन पर्यालोचितमुदयनाचार्येण। अतोऽत्रात्मनो देहादिभिन्नत्वम्, बहुत्वम्, सगुणत्वञ्चेत्यादिवैशिष्ट्यानि सयुक्त्या प्रतिस्थापितानि। आत्मनो देहादिभिन्नत्वप्रतिपादनावसरे उच्यते, देहस्य चैतन्यविशिष्टात्मत्वं कदापि न सम्भवति देहस्य मूर्तत्वादिहेतुवशात्। अनुमानञ्च प्रदर्श्यते– देहो न चेतनः, मूर्तत्वात्, भूतत्वात्, रूपत्वात्, रसत्वात्, पृथिव्यादिवत्। अनेनानुमानेन देहस्य चेतनत्वं न सिद्ध्यति।[११] देहनिष्ठभूतसमूदायेऽपि चैतन्यं स्वीकर्तुं न शक्यते, यतो हि देहनिष्ठभूतसमुदायः प्रतिदिनं परिवर्तते। तेन च स्मरणोत्पत्त्यभावप्रसङ्गः। अत एवोच्यते– 'न च भूतानां समुदाये पर्यवसिते चैतन्यम्, प्रतिदिनं तस्यान्यत्वे

पूर्वपूर्वदिवसानुभूतस्यास्मरणप्रसङ्गात्'।[१००] देहगतावयवेऽपि चैतन्यं स्वीकर्तुं न शक्यते, यतो हि कदाचिद् देहादवयवस्य विच्छेदे सति स्मरणानुपपत्तिर्न भवति।[१०१] एवञ्च जातशिशोः स्तन्यपानप्रवृत्तिः पूर्वाभ्यासादृते न सम्भवति। पूर्वाभ्यासः पूर्वजन्म विना न सम्भवति। एतेन देहस्य ध्वंसत्वसिद्धेऽपि चैतन्यात्मनश्च नित्यत्वं सिद्ध्यति।

इन्द्रियस्य चैतन्यमपि स्वीकर्तुं न शक्यते। इन्द्रियस्य चैतन्यत्वस्वीकारे प्रथमदर्शनं स्पर्शनञ्चेत्यादौ सद्यजातशिशोर्या प्रवृत्तिः सा न सम्भवति। एवञ्च दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियस्य चेतनत्वं नैव सिद्ध्यति। एवं चक्षुषा दृष्टवस्तुनः त्वचा च स्पृष्टवस्तुनः प्रतिसन्धानादवश्यमिन्द्रियातिरिक्तस्थिरचेतनः आत्माङ्गीकर्तव्यः। तथा चोच्यते– 'नेन्द्रियाणि चेतयन्ते, दर्शनस्पर्शनभ्यामेकार्थग्रहणाच्च'।[१०२] सुखादीनां करणत्वेन मनसोऽनुमान-वशादात्मापेक्षया मनसो भिन्नत्वमपि सिद्ध्यति। तथा चोद्यते– 'न च मनस्तथा। तस्य करणत्वेनैवानुमानादिति प्रतिबन्धसिद्धिः'।[१०३] एवंरूपेणात्मनो देहादिभिन्नत्वसिद्ध्या देहादीनामचैतन्यव्याप्तित्वमपि सिद्ध्यति। पूर्वजन्मानुभवं विना प्रथमप्रवृत्तेरुपपत्तिरपि न भवति, एतेन पूर्वजन्मस्थितपरलोक्यात्मनः सिद्धिर्भवति। तथा च दृश्यते– 'परलोक्यात्मसिद्धिश्च'।[१०४] रागशून्यजीवा-भावाज्जन्मानन्तरं विषयं प्रति रागस्य पूर्वजन्मानुभवजनितत्वमवश्यमेव स्वीकरणीयम्, एवंरूपेण पूर्वजन्मरागः प्रपूर्वजन्मानुभवजन्य इत्यपि स्वीकर्तव्यः।

एतेनात्मनोऽनादित्वमपि सिद्ध्यत्यर्थात्पूर्वपूर्वजन्मन्यात्मसत्तासिद्धत्वादात्मनो-ऽनादित्वमपि सिद्ध्यति।

आत्मनो भाववस्तुत्वेऽप्यनादित्वाद् आत्मनोऽनन्तत्वं सिद्ध्यति। ज्ञानादेः समवायिकारणत्वादात्मनो द्रव्यत्वं सिद्ध्यति। नित्यद्रव्यत्वे-ऽप्यमूर्तत्वादात्मनो विभुत्वं सिद्ध्यति। क्रियारहितत्वादात्मनोऽमूर्तत्वं सिद्ध्यति। नित्यत्वेऽपि प्रत्यक्षत्वात्प्रत्यक्षधर्मस्याश्रयत्वाच्चात्मनो निष्क्रियत्वं सिद्ध्यति। तथा चास्मिन्प्रसङ्गे *आत्मतत्त्वविवेके* दृश्यते– 'अनन्तश्च सतोऽनादित्वात्। द्रव्यं च समवायिकारणत्वात्। विभुश्च नित्यद्रव्यत्वे सत्यमूर्तत्वात्। अमूर्तश्च निष्क्रियत्वात्। निष्क्रियश्च नित्यत्वे सति अस्मदादिप्रत्यक्षत्वात्, प्रत्यक्षधर्माश्रयत्वाच्चेति'।[१०५]

***न्यायकुसुमाञ्जलिग्रन्थे* आत्मस्वरूपविचारः–**

*न्यायकुसुमाञ्जलिग्रन्थे* प्रथमस्तवके अलौकिकं परलोकसाधन-मस्तीत्यस्यैव प्रतिपादनमकरोदुदयनाचार्यः। तत्र ग्रन्थकारस्य प्रधानोद्देश्यं पूर्वपक्षमतखण्डनपुरःसरं शुभाशुभकर्मणोः फलदातृरूपेणादृष्टसिद्धिः। यथा वृक्षछेदनरूपकार्यसिद्ध्यर्थं कस्यचन चैतन्यवतश्छेदकस्य प्रयोजनं भवति, तद्वदचेतनस्याऽदृष्टस्य कार्यपरिचालनाय कस्यचित्सचेतनस्य कर्तुरपेक्षावश्यं वर्तते। यतो हि कार्यसिद्ध्यर्थमवश्यमेव चैतन्यविशिष्टकर्तुः प्रयोजनमस्ति।

एवञ्चादृष्टाधिष्ठातृरूपेणैवेश्वरसिद्धिर्भवति। प्रसङ्गेऽस्मिन् हरिदासीटीका-यामुच्यते– 'धर्माधर्मात्मकालौकिकपरलोकसाधने विप्रतिपन्नं प्रति तत्साधनं, सिद्धे च तस्मिन् तदधिष्ठातृतया ईश्वरसिद्धिः, अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्यजनकत्वात्'।[१०६] अतो *न्यायकुसुमाञ्जलि*ग्रन्थ उच्यते–

'सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः'॥[१०७]

वस्तुन उत्पत्तेः प्राक्कारणस्यापेक्षा सदैव वर्तते। कार्यं सर्वदा कारणसापेक्षम्। 'सापेक्षत्वात्' इति पदघटितसापेक्षशब्दस्यार्थो भवति 'कादाचित्कः'। कदाचित्कस्य भावः कादाचित्कत्वम्। कादाचित्को नाम यत्कदाचिद्विद्यते, कदाचिच्च न विद्यते। प्रसङ्गेऽस्मिन् प्रकाशटीकायां दृश्यते– 'सापेक्षत्वात्= सहापेक्षया वर्त्तमानत्वात् कादाचित्कत्वादित्यर्थः। तच्च किञ्चित्काला-सम्बन्धित्वे सति किञ्चित्कालसम्बन्धरूपम्'।[१०८] यथा नित्यवस्तु तथैवालीकवस्त्वपि सर्वदाविद्यमानत्वात् कादाचित्कं भवितुं नार्हति। कार्यवस्तु केवलं कालविशेषे विद्यते, कालविशेषे च न विद्यते इति। अतः कार्यवस्तुमात्रं कादाचित्कत्वम्। कादाचित्कत्वात्कार्यं सर्वदा सहेतुकम्। अस्मिन् सन्दर्भे हरिदासीटीकायामुच्यते– 'कार्यं सहेतुकं कादाचित्कत्वात्, भोजनजन्य-तृप्तिवत्'।[१०९] अर्थात् कादाचित्कत्वात् कार्यं सहेतुकम्। भोजनजन्यतृप्तिः कादाचित्का भवति। यतो हि भोजनजन्यतृप्तिरस्ति चेदपि परिपाकवशात् पुनः

क्षुधापि भवति। अर्थात्तृप्तिर्यथा कादाचित्का तथाऽपरपक्षे सहेतुका भवति। एवमेव कार्यमपि कादाचित्कत्वात्सहेतुकम्। यत्र यत्र कादाचित्कत्वं तत्र तत्र सहेतुकत्वमिति व्याप्तिनिश्चयात् कादाचित्कत्वहेतुना कार्यस्य सहेतुकत्व-सिद्धिर्भवति। अतो 'स्वर्गकामो यजेत'– इत्यनेन श्रुतिवाक्येनावश्यं स्वीकर्तव्यं स्वर्गादिकर्मविनाशोत्तरावान्तरव्यापार उत्पद्यते येन कालान्तरीयस्वर्गादिफलं जन्यते। स्वर्गादिलाभो यागादिक्रियाविशेषत्वादवश्यं क्षणस्थायी। क्षणिकत्वाद् यागादिकर्म कदापि कालान्तरीयस्वर्गादिफलस्य कारणं भवितुं नार्हति। अतो यागादिकर्म स्वर्गस्याव्यवहितपूर्वं न भवति चेदपि स्वजन्यव्यापारवत्तासम्बन्धेनैव स्वर्गादिफलस्य कारणं भवति। एतेनादृष्टस्य सिद्धिर्भवति। प्रसङ्गेऽस्मिन् प्रकाशटीकायामुच्यते– 'परलोकार्थितया यागादौ प्रवृत्तिः प्रेक्षावत्प्रवृत्तित्वेन सफलता, फलसाधनत्वञ्च यागादिराशुविनाशित्वेन न स्यादिति तज्जन्यफलानुकूलमदृष्टं कल्प्यते'।[११०] संसारेऽस्मिन्नदृष्टकारणादेव सुखी, दुःखी, धनी, दरिद्रश्चेत्यादिकार्यवैचित्र्यं दरीदृश्यते। एवञ्च संसारेऽस्मिन्नेतेषां कार्यवैचित्र्याणां लौकिककारणं न दृश्यते, अतो धर्माधर्मरूपादृष्टकारणमत्र नियामकमिति स्वीकर्तव्यम्। एवञ्चादृष्टाधिष्ठातृरूपेणैवेश्वरसिद्धिर्भवति।

न्यायदृष्ट्यनुसारेण वाक्यस्य याथार्थ्यं वक्तुरुपर्याश्रितं भवति। भ्रमादिदोषरहितवक्त्रोच्चारितं वाक्यं विश्वासयोग्यरूपेण ग्रहणयोग्यं भवति। साधारणाल्पज्ञाल्पशक्तिसम्पन्नव्यक्तीनां वेदप्रतिपादितसकलविषयाणां ज्ञानं

स्थातुं न शक्यते। अतो वेदे प्रतिपादितसमस्तविषयाणां यथार्थज्ञानं पूर्णज्ञानसम्पन्नव्यक्तेरेव भवितुमर्हति। सर्वज्ञसर्वशक्तिसम्पन्नेश्वरं विना तादृशो वक्ता कश्चन भवितुं नार्हति। अतो वेदस्य वैधताविषये प्रामाण्यविषये वा सन्देहस्यावकाशो नास्ति। किन्तु मीमांसकानामापत्तिर्वर्तते वेदस्याऽपौरुषेयत्वा-भावाद् वेदो व्यक्तिसम्पर्कितो न भवति। यतो हि व्यक्तिसम्पर्कितयुक्तेर्वैधताऽवैधताविषये प्रश्नो भवितुमर्हति। यदि कश्चन व्यक्तिर्दुष्टस्स्यात्, तेनोच्चारितं वाक्यं प्रमात्वेन ग्रहीतुं न शक्यते। किन्तु वेदविषये एतादृशस्य सन्देहस्यावकाश एव नास्ति, वेदस्याऽन्यपुरुषनिरपेक्षत्वात् स्वतःसिद्धत्वाच्च। किञ्च स्वसम्मतविषयस्य सुदृढतया प्रतिपादनाय तार्किकशिरोमण्युदयनाचार्येणोक्तम्–

‘प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात्।
तदन्यस्मिन्नविश्वासान्न विधान्तरसम्भवः’॥[१११]

सृष्टिर्भवति चेद्ध्वंसोऽप्यवश्यं भवतीति शास्त्रसिद्धम्। *श्रीमद्भगवद्गीता*याम-प्युच्यते–

‘जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च’।[११२]

यत् किमपि जन्यं वर्ततेऽथवोत्पद्यते तस्य नाशोऽवश्यम्भावी। वेदविषयेऽपि व्यतिक्रमो नास्ति। वेदस्थितवर्णोऽनित्यः, तज्जन्यपदमनित्यम्, पदनिर्मितवाक्यञ्चानित्यं भवति। ‘सृष्टिः प्रलयविशिष्टा’ इति नियमानुसारेण

सृष्टवेदस्य प्रलयवशाद् ध्वंसकार्यादनन्तरं परवर्तिवेद उत्पद्यते। सृष्टवेदप्रामाण्यसिद्ध्यर्थमवश्यमीश्वरस्य स्वीकारः कर्तव्यः। यतो हि सृष्टेः प्रारम्भे महाजनपरिग्रहाभावाद्वेदप्रामाण्यविषये संशय आगच्छत्येव। अतोऽसर्वज्ञोऽल्पमतिसम्पन्नः कश्चन वेदस्य कर्ता भवितुं नार्हति। ईश्वरं व्यतिरिच्य अपरः कश्चन यागादीनामनुष्टानं कर्तुं न शक्नोति। अतो वेदस्य कर्तृरूपेणावश्यमीश्वरस्य स्वीकारः कर्तव्यः। तेन सृष्टेः प्रारम्भे वेदस्य प्रामाण्यसिद्धौ संशयो न तिष्ठति। प्रसङ्गेऽस्मिन् व्याख्याविवृतिटीकायामुच्यते– 'तथा च वेदजन्या शाब्दी प्रमागुणजन्या प्रमात्वात् चाक्षुषप्रमावदिति सामान्यतोऽनुमानेन इतरबाधसहकारात् वक्तृयथार्थधीरूपगुणजन्यत्वे सिद्धे ..........इतरबाधसहकारादीश्वरसिद्धिरिति भावः'।[११३]

मीमांसकैः पुनराक्षिप्यते सृष्टेः प्रलयस्य च स्वीकारेऽपि वर्णः, तज्जन्यपदम्, पदजन्यवाक्यं तु नित्यमेव वर्तते, अतो वर्णादीनां नित्यत्वाद्वेदस्य विनाशो न सम्भवति। अस्याक्षेपस्य समाधानत्वेनोच्यते उत्पन्नककारो विनष्टककारश्चेत्यादिज्ञानायावश्यं वर्णस्य सृष्टिर्विनाशश्च स्वीकरणीयः। अत एव वेदस्य रचयितृरूपेणावश्यमीश्वरसत्ता स्वीकर्तव्या। मीमांसकानां खण्डनावसरे सांख्यकर्तृकोत्थापितमतस्यापि समालोचनमभवत्। सांख्यमते वेदोऽपौरुषेयो नास्ति, किञ्चैश्वरीयवाक्यमपि नास्ति। कपिलकणादप्रमुखपुरुषाः स्वकर्मणा योगमाध्यमेन वाऽतुल्यसामर्थ्यमर्जितवन्तः, तेन सामर्थ्येनैव वेदानां

रचनाऽभवत्।[११४] वेदः कदाप्यपैरुषेयो भवितुं नार्हति। यतो हि वेदे यद्यप्येतादृशानि कानिचन श्रुतिव्याक्यानि वर्तन्ते येषां प्रवक्ता सामान्यपुरुषो भवितुं नार्हति। तथापि तादृशप्रवक्ता कदापीश्वरोऽपि न भवतीश्वरसत्तायाः प्रमाणाभावात्। वेदे चैतादृशं किञ्चनासाधारणत्वज्ञापनं वर्तते यत् साधारणपुरुषविधानायोग्यमस्ति। अतः शक्तिसम्पन्नकपिलादिमुनीनां वेदकर्तृरूपेण स्वीकारे सर्वज्ञरूपेणेश्वरग्रहणस्या-वश्यकमेव नास्ति।

सांख्यकर्तृकोत्थापितापत्तेर्युक्तिपूर्वकं खण्डनं विहितम्। कपिलप्रमुखमुनयः सिद्धपुरुषाः सन्तोऽपि सर्वज्ञा न। एवमसर्वज्ञपुरुषा विश्वासयोग्या भवितुं नार्हन्ति। अतो वेदप्रवक्तृरूपेणैतादृशस्य सर्वज्ञस्य सर्वशक्तिसम्पन्नस्य ग्रहणीयं यस्मिन् वेदनिर्माणस्य सर्वज्ञानं विद्यते। एतादृशः कश्चन ईश्वर एव भवितुमर्हतीश्वरं विना नान्यः। सांख्यमतस्वीकारे च गौरवदोषोऽप्यापतेत्। यतो हि कपिलादिसदृशा बहवः सिद्धपुरुषा वर्तन्ते, अतो लाघववशादेकस्य सर्वज्ञसर्वशक्तिसम्पन्नस्येश्वरस्य स्वीकार एव श्रेयः। किञ्च कपिलादिमुनीनामी-श्वरसदृशसर्वज्ञत्वाभावात्तद्रचितवाक्यानां तादृशविश्वासयोग्याभावाद्वेदस्य लोपः स्यात्। अतो वेदस्य कर्तृरूपेणेश्वरस्वीकारः कर्तव्य एव। अतो प्रकाशटीकायामुच्यते– 'न च कपिलादिद्वारा सम्प्रदायसिद्धिः, ततः परमेश्वरादन्यस्मिन् कपिलादौ प्रमाणत्वेन विश्रामाभावात्। न हि

योगबलप्रभाविता भावना प्रमात्मकमेव साक्षात्कारं करोतीति नियमः, ततो नित्यसर्वज्ञसिद्धिरिति'।[११५]

**निष्कर्षः**– 'आत्मनः स्वरूपम्' इत्युक्ते यथा आत्मनो लाक्षणिकवैशिष्ट्यं स्वीकृतं भवति तथा परिचायकधर्माणामपि ग्रहणमवश्यं भवति। अत्र *आत्मतत्त्वविवेके* ग्रन्थे 'आत्मनः स्वरूपम्' इत्युक्ते लाक्षणिकवैशिष्ट्यं गृहीतम्। यथा– आत्मनः देहादिभिन्नत्वम्, बहुत्वम्, सगुणत्वञ्चेत्यादीनि। तथा च *न्यायकुसुमाञ्जलि*ग्रन्थे 'आत्मनः स्वरूपम्' इत्यनेन परिचायकधर्माणां ग्रहणं दरीदृश्यते। यथा– अदृष्टाधिष्ठातृरूपेणेश्वरस्थापनम्, वेदस्य प्रणेतृरूपेण च ईश्वरस्थापनं दृश्यते।

**६. आत्मसद्भावस्य प्रमाणविषये ग्रन्थद्वयस्य तुलनात्मकसमीक्षा**–

***आत्मतत्त्वविवेक*ग्रन्थे आत्मनः सद्भावे प्रमाणम्**–

अनुपलम्भवादप्रकरणे स्वात्मनः सद्भावप्रमाणप्रसङ्गे उदयनाचार्येणोच्यते– 'प्रत्यक्षमेव तावत्, अहमिति विकल्पस्य प्राणभृन्मात्र-सिद्धत्वात्'।[११६] अर्थाद् आत्मसद्भावे प्रत्यक्षमेव प्रमाणं वर्तते। 'अहम्' इति सविकल्पकज्ञानं प्राणिमात्रं प्रत्यक्षरूपेण भवति, अत्र च प्रत्यक्षस्य विषय आत्मैव। अत्राहमिति प्रतीतेः शब्दत्वाभावाद् बाधितत्वाभावाच्चावस्तुकत्वं सन्दिग्धकत्वञ्च न सिद्ध्यति।[११७] नापि लैङ्गिकीयं प्रतीतिरर्थादनुमानमपि

भवति। यतो ह्यनुमाने व्याप्यस्यानुसन्धानमावश्यकम्। परन्त्वत्र व्याप्यानुसन्धानाभावात् 'अहम्' इति प्रतीतिर्न सम्भवति। 'अहम्' इति प्रतीतिः स्मृतिरपि भवितुं नार्हति यतो ह्यनुभवं विना स्मृतिर्न सम्भवति।[११८] अत्र यद्यऽनादिवासनावशात् स्मृतिरुत्पद्यत इति वदेत्तदपि समीचीनं न, यतो हि तदर्थमप्यनुभवोऽपेक्षते। अनादिवासनावशात् 'अहम्' इति प्रतीतिर्वस्तुशून्यं वर्तत इति स्वीक्रियेत चेत्तदप्ययुक्तम्। यतो हि 'अहम्' इति प्रतीतिर्वस्तुशून्या भवति चेत् प्रमाणेन गृहीता नीलादिविषयकप्रतीतिरपि वस्तुशून्या स्यात्। अर्थात्सम्पूर्णव्यवहार एव लुप्येत। अतः 'अहम्' इति प्रतीतिकारणं केवलं वासनामात्रं नास्ति, अपितु किञ्चिद् आगन्तुककारणमपि स्वीकर्तव्यम्। तच्च कारणं कीदृशं स्याच्चेद् आप्तानाप्तशब्दौ वा लिङ्गतदाभासौ वा प्रत्यक्षतदाभासौ वा स्यात्।[११९]

एवञ्च प्रथमद्वितीयविकल्पाभावाद् नीलादिप्रतीत्याधारो यथा प्रत्यक्षेण तदाभासेन वा सिद्ध्यति तद्वत् 'अहम्' इति प्रतीत्याधारो निर्विकल्पकप्रत्यक्षेण तदाभासेन वा सिद्ध्यति। 'अहम्' इति प्रतीतिर्निर्विकल्पकप्रत्यक्षाव्यवहितोत्तर-काल उत्पद्यत इति स्वीक्रियते चेन्निर्विकल्पकप्रत्यक्षवत् 'अहम्' इति सविकल्पकप्रतीतिरपि साक्षात् सवस्तुक एव स्यात्। यदि 'अहम्' इति प्रतीतेर्निर्विकल्पकप्रत्यक्षत्वं न स्वीक्रियेत, प्रत्यक्षाभासः स्वीक्रियेत तदापि परम्परया 'अहम्' इति प्रतीतिः सवस्तुक एव सिद्ध्यति। यतो हि

भ्रमात्मकज्ञानस्य मूलं प्रमात्मकज्ञानमेव। यथा– मिथ्यासर्पज्ञानं तदैव जायते यदा वास्तविकसर्पज्ञानं भवति। पुनश्च बाह्यप्रत्यक्षनिवृत्तावेवात्मनो निर्मूलत्वं सिद्धमित्युच्येत चेद् तद्वद्बुद्धिविकल्पस्याऽपि बाह्यप्रत्यक्षाभावाद् निर्मूलत्वं सिद्ध्येत। अर्थात् स्वप्रकाशवशाद् बुद्धिः स्वसत्तायां स्वयमेव प्रमाणं भवति चेदपि स्वसत्तायामात्मा जाड्यतावशात् प्रमाणं भवितुं नार्हतीत्युच्येत तर्हि स्वसंवेदनं यथा बुद्धिप्रतीतेर्मूलं तथैव 'अहम्' इति प्रतीतेर्मूलं मानसप्रत्यक्षं स्वयमेव सिद्धम्। अतो ग्रन्थकारेणोक्तम्– 'तत्र स्वसंवेदनं मूलमिहापि मानसप्रत्यक्षमिति न कश्चिद्विशेषः'।[१२०]

'अहम्' इति प्रतीतेर्विषयः शरीरादिर्भवेद् इत्युच्यते चेत्तदपि न समीचीनम्। यतो हि निरुपाधिशरीरेन्द्रियबुद्धितत्समुदायालम्बनत्वेऽतिव्याप्तिदोषः स्यात्। अर्थाद् विशेषणं विना शरीरादिसमुदायः 'अहम्' इति प्रतीतेर्विषयो यदि स्वीक्रियेत तर्ह्यन्येषां शरीराणां कृतेऽपि 'अहं गौरः' 'अहं काणः' चेत्यादिप्रतीतिः स्यात्। दोषवारणात्स्वसम्बन्धिशरीरं यत्तदेव 'अहम्' इति प्रत्ययस्य विषयो वक्तव्यो भवति। अत्र स्वशब्दस्य कोऽर्थ इत्यपि वक्तव्यम्। तत्र स्वशब्देनावश्यमेवाऽऽत्मैव स्वीकर्तव्या।[१२१] एवञ्च स आत्मा तत्सम्बन्धि यच्छरीरं तत्रैव 'अहं गौः' 'अहं काणः' चेति बोधः स्यात्। तेन च देहातिरिक्त आत्मेत्यपि सिद्ध्यति।

बुद्धिरूपविषये 'अहम्' इति प्रत्ययो मुख्य भवतीत्युच्यते चेत्तदपि न युक्तम्। यतो हि बुद्धिश्छिदा इत्यादिवत्क्रियारूपेणाप्यनुभूयते। अत एव 'छिनद्मि' इति प्रयोगे छेदक्रियाभिन्नकर्तुर्यथाऽनुभवो भवति तथैव 'जानामि' इति व्यवहारेऽपि ज्ञानक्रियाभिन्नकर्तुरप्यनुभवो भवति, स एव ज्ञानस्याधारभूत आत्मा। अतो ग्रन्थकारेणोच्यते– 'बुद्धौ मुख्य एवेति चेन्न। तस्याः क्रियात्वेनानुभूयमानाया भिन्नस्य कर्तुरहं च्छिनद्मीतिवद् अहं जानामीत्यनुभवात्'।[१२२]

**अनुमानेनाप्यात्मसिद्धिः–**

स्थिरात्मनः सिद्धिरनुमानेनापि भवति। तच्च प्रतिसन्धानम्।[१२३] अर्थात् प्रतिसन्धानम् अथवा प्रत्यभिज्ञैव तदनुमानं येन स्थिरात्मनः सिद्धिर्भवति। अर्थात् प्रतिसन्धानं यद्यपि प्रत्यक्षप्रमाणे एवान्तर्भवति तथापि तस्य प्रयोगोऽनुमानालोक एव कर्तव्यम्। यथा 'योऽहं रूपमद्राक्षं स एवाहमधुना स्पृशामि' इत्यत्र 'अहम्' इति प्रतीतेर्विषय आत्मैव, पूर्वकाले परकाले च 'अहम्' इति प्रत्यभिज्ञासत्त्वात्। यथा च 'सोऽयं घटः' इत्यादिस्थले प्रत्यभिज्ञाया विषयः स्थिरो घट इत्यपि सिद्ध्यति तद्वदनुमानेन प्रत्यभिज्ञावशाद् आत्मनः स्थिरत्वं सिद्ध्यति। अतश्चोच्यते कल्पलताटीकायाम्– 'वस्तुतः प्रत्यक्षमेव प्रतिसन्धानं स्थैर्ये प्रमाणम्, कथायान्तु प्रत्यक्षमप्यनुमानच्छाययैव प्रयोक्तव्यम्, तथा च प्रयोगः अहमिति प्रत्ययालम्बनं स्थिरं ताद्रूप्येण प्रत्यभिज्ञायमानत्वात् घटादिवत्'।[१२४]

अत्र शंकाऽवश्यं सम्भवेत् तथ्यमर्थात् प्रमात्मकप्रत्यभिज्ञां हेतुत्वेन स्वीकारे सति स्वरूपासिद्धदोष आपतेत् खलु। यतो हि क्षणिकविज्ञानवादिनां मते आत्मविषयकप्रत्यभिज्ञा प्रमात्मिका न भवति। यदि चोक्तप्रतिसन्धान-मतथ्यमर्थादप्रमात्मकं स्वीक्रियते तर्हि प्रत्यभिज्ञारूपहेतुर्विरुद्धहेतुः स्यात्। अतो यत् स्वयमप्रमात्मकं तत्कदापि स्थिरात्मसाधने प्रमाणं भवितुं नार्हति। यथा च 'सैवायं दीपकलिका' इत्यादिस्थले प्रतिक्षणं परिवर्तनशीला दीपज्वाला स्थिरत्वे प्रमाणं भवितुं नार्हति तथैव प्रत्यभिज्ञाऽप्यात्मनः स्थिरत्वे प्रमाणं भवितुं नार्हति।

एवं पूर्वपक्षिभिः शङ्कोत्थापिते सति समाधानमुदयनाचार्येण प्रदीयते यत्, हेतुरूपेण प्रत्यभिज्ञा विवक्षिता नास्ति। अपि तु 'योऽहं रूपमुपलब्धवान् सोऽयं स्पृशामि'इत्यादौ पूर्वापरप्रतीतीनामेकसन्तानं विवक्षितम्। अर्थादेकसन्ताने स्थिरवस्तुनो नियमतो विद्यमानतात्र सूच्यते। एवञ्चात्र स्थिरवस्त्वेवाऽऽत्मा। एवंरूपेणात्मस्थिरत्वे प्रत्यभिज्ञा कारणं भवति।

एवञ्च 'योऽहं रूपमद्राक्षं सोऽहं स्पृशामि, योऽहं घटमनुभवम्, सोऽहं स्मरामि' इत्यादौ पूर्वापरप्रतीतेर्विषय एकः स्थिर आत्मैव भवति, न तु अनेका आत्मानः। यतो हि चैत्रानुभवे सति मैत्रस्यानुभवः कदापि न भवति। अतश्चोक्तमात्मतत्त्वविवेके– 'तथ्यमिदमित्यसिद्धमतथ्यञ्च विरुद्धम्…… पूर्वापरधियामेककर्तृतया विनिश्चयः'।[१२५] प्रसङ्गेऽस्मिन् प्रकाशिकाटीकाया-

मुच्यते– 'योऽहं रूपमुपलब्धवान् सोऽहं स्पृशामीति पूर्वापरयोरेककर्तृकता-साक्षात्कारोऽनेककर्तृकाद्व्यावृत्त एककर्तृकत्वं साधयति'।[१२६]

अत्र पूर्वपक्षी शङ्कां समुपस्थायेत् यत्, पूर्वापरज्ञाने एककर्तृत्वस्य निश्चय उपादानोपादेयभावेनापि सिद्ध्यति अर्थाद् उत्तरज्ञानं प्रति पूर्वज्ञानं नियमत उपादानकारणं भवति, अतः तेनैव सिद्धे सति पूर्वापरज्ञानाश्रयभूतस्थिरात्मनः कल्पनमनुचितमेवेति। परन्त्वियमपि शङ्कानुचिता, यतो हि क्षणभङ्गप्रकरणे भावानां स्थिरत्वं सिद्धमस्ति। अतः स्थिरपक्षे पूर्वज्ञानमुत्तरज्ञानस्य कारणं नैव भवति, अपि तु स्थिरात्मा पूर्वाज्ञानानामुपादानकारणमेव भवति। अत उच्यते प्रकाशटीकायाम्– 'स्थैर्यपक्षे भासनं मिथो नोपोदानोपादेयभाव इत्याह'।[१२७]

एवं *भाषापरिच्छेद*ग्रन्थेऽपि भिन्नरीत्यानुमानेनैवापरदेहस्थात्माऽनुभवशक्य इति विश्वनाथपञ्चाननेन दर्शितम्। तत्र च दर्शितम्, अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते। अत्र प्रवृत्तिर्नाम चेष्टा शारीरकक्रिया वा। चेष्टा वस्तुतः प्रयत्नसाध्या। अतः परदेहे चेष्टायाः सत्त्वात् चेष्टोपपादः प्रयत्नाश्रय आत्मानुमीयते। तत्र दृष्टान्तो यथा– रथस्य गतिं दृष्ट्वा गतिरूपकर्मणा सारथिर्यथा अनुमीयते तथैव चेष्टात्मककर्मणा परमात्मा अनुमीयते। तत्र च गद्यते–

'प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः'।[१२८]

***न्यायकुसुमाञ्जलिग्रन्थे* आत्मसद्भावे प्रमाणम्–**

तार्किकशिरोमण्युदयनाचार्यो *न्यायकुसुमाञ्जलिग्रन्थे* प्रधानतयेश्वरसत्ता प्रतिस्थापिता। ग्रन्थो यथायथरूपेण पर्यालोच्यते चेद् द्रष्टुं शक्यते निरीश्वरवादिनां मतखण्डनपूर्वकमीश्वरसत्तास्थापनमेवोदयनाचार्यस्य प्रधानोद्देश्यं वर्तते।

वस्तुसत्ताप्रतिपादनाय यथा बाधकप्रमाणाभावोऽपेक्षते तथैव साधकप्रमाणमप्यपेक्षते। अस्योद्देशस्य परिपूरणायानुमानप्रमाणस्यास्त्ररूपेण व्यवहार उदयनाचार्येण कृतः। अर्थात् प्रत्यक्षप्रमाणेन नास्त्यपित्वनुमानप्रमाणेनेश्वरप्रतिष्ठा भवति। अन्धो यदाऽन्धत्ववशात्कदा-चिद्वृक्षस्योपरि विनिपतति तत्र वृक्षस्य कश्चन दोषो न तिष्ठति। एवमेवानुमानेनेश्वरस्य प्रामाण्यं प्रतिस्थापयत्यज्ञानवशाद्विपक्षिभिस्तदवगन्तुमपि न शक्यते। अतः पञ्चमस्तवके प्रथमकारिकायामुच्यते आचार्येण–

‘कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः’॥[१२९]

अर्थात् कार्यायोजनधृतिपदप्रत्ययश्रुतिवाक्यसंख्याविशेषरूपहेतुभिरीश्वरसिद्धि-र्भवति। प्रसङ्गादत्रोल्लेखनीयमस्ति यद् धृत्यादेरितिपदघटितादिपदेन विनाशरूपहेतोर्ग्रहणान्नव हेतवोऽत्र भवन्ति।

साधकप्रमाणेष्वादिप्रमाणं भवति कार्यमिति। कार्यं सर्वदा कारणविशिष्टम्। अतोऽस्य जगद्रूपकार्यस्यावश्यं किमपि कारणं विद्यत एव, एवञ्चास्य कारणमीश्वर एव। उत्पद्यमानं विनश्यमानं वा वस्तु सर्वदा कार्यमेव भवति। एवञ्च तत्सावयवमपि भवति। एतेषामवयवानां मेलनेनैवावयवी निर्मीयते। अर्थादवयविशिष्टत्वमेव कार्यत्वम्। किञ्च यत्कार्यत्वविशिष्टन्तत्कारण-विशिष्टमेव। नैयायिकमतानुसारेण जगत् कार्यवस्तु वर्तते सावयवत्वात्। अवश्यन्तत्कस्मादपि कारणादेवोत्पद्यते। अनुमानप्रमाणेनैव जगतः सकर्तृकत्वं सिद्ध्यति। कार्यद्रव्यमात्रं सकर्तृकम्। जगतः कार्यत्वात्तदवश्यं कर्तृविशिष्टम्। अत आचार्यविश्वनाथेन न्यायसिद्धान्तमुक्तावल्यामुच्यते– 'क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवत्'।[१३०] अर्थाद्घटप्रभृतिकार्यं यथा कर्तृजन्यं तद्वत्क्षित्यङ्कुरप्रभृत्यपि कर्तृजन्यम्। क्षित्यङ्कुरप्रभृतीनां कर्ता कश्चन साधारणपुरुषो भवितुं नार्हति। यतः कर्तुरवश्यमुपादानकारणस्य साक्षाज्ज्ञानम्, प्राप्तीच्छा, साधनेच्छा चावश्यकम्।[१३१] केवलं यः सर्वज्ञः सर्वशक्तिसम्पन्नस्तस्य कृते एवास्य सूक्ष्मतमपदार्थस्य साक्षाज्ज्ञानं भवितुमर्हति। तस्य सर्वज्ञसर्वशक्तिसम्पन्नस्येच्छावशाज्जीवानां कर्मानुसारेण जगतः सृष्टिरिति।

ईश्वरस्थापनस्य द्वितीयसाधकप्रमाणमायोजनमिति। आयोजनशब्दार्थो भवति कर्म। न्यायवैशेषिकदर्शने परमाणुवादः स्वीक्रियते। जागतिकसर्ववस्तूनां मूलं परमाणुः। अर्थात्परमाणोः द्व्यणुकादिक्रमेण संयोगेनैव

सावयवद्रव्यमुत्पद्यते। एतत्संयोगनिमित्तमवश्यं संयोगिनोः स्पन्दनक्रियाऽपेक्षते स्वभावाद् द्वयोर्निष्क्रियवस्तुनोः संयोगदर्शनाभावात्। परमाणोर्जडत्वात्तेषामवश्यं गतिसञ्चारोऽपेक्षते। एवञ्च जगत्सृष्टिनिमित्तं यत्परमाणुसंयोगो विद्यमानो वर्तते तेषां स्पन्दनक्रियात्वात्तदनुकूलसञ्चारत्वेन कश्चनावश्यं स्वीकर्तव्यः। अतस्तत्रेश्वर एव स्पन्दनसञ्चारकः, नान्यः। अतष्टीकायां यथार्थमेवोच्यते– 'सर्गाद्यकालीन-द्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वादस्मदादि-शरीरक्रियावत्'।[१३२]

ईश्वरसाधकस्तृतीयहेतुर्धृतिरिति। धृतिपदस्यार्थः पतनाभावः। अर्थाद्गुरुत्वविशिष्टवस्तु कर्षणवशादेव पतति। एतद्व्यतिक्रमे सत्यवश्यं गुरुत्वविशिष्टपदार्थस्याश्रयः कश्चन स्वीकर्तव्यः। यथा कस्यचिज्जनस्य हस्ते फलं भवति चेत्तद्भूमौ नैव पतति, परन्तु वृक्षात् पतनसमये तद्भूमौ पतत्येतस्यानाश्रयत्वमेव पतनकारणं पुरुषस्य च हस्त आश्रयत्वात्पतनाभावश्च वर्तते। एवमतिगुरुभारविशिष्टपृथिव्या अनाश्रितावस्थानं ज्ञापयत्यत्रापि कस्यापि विशेषप्रयत्न एव फलम्। एतत्कारणादेव पृथिव्याः पतनाभावः परिलक्ष्यते। अत्र च पृथिव्याः पतनाभाव एव धृतिः। अत एवोच्यते– 'ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितम्, धृतिमत्त्वात्, वियतिविहङ्गम-धृतकाष्ठवत्' ।[१३३] धृत्यादेरिति पदघटकादिपदेन विनाश इत्यर्थो ज्ञाप्यते। तदर्थमेव

टीकायामुच्यते– 'धृत्यादेः इत्यादिपदान्नाशपरिग्रहः। ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात्पाट्यमानपटवत्'।[१३४]

ईश्वरसाधनस्य चतुर्थभूमिः पदमिति। 'पद्यतेऽनेनेति व्युत्पत्त्या 'पदम्' व्यवहारः'।[१३५] अर्थात्पदं नाम व्यवहारः। तन्तुवायस्य पटादिनिर्माणे यथा नैपुण्यं तथैव बालकानां लिप्यादिप्रयोग एव व्यवहारः। वृद्धपुरुषेणैव पूर्णशिक्षा लब्धुं शक्या। एकः शिशुर्यथार्थप्रदर्शकेन प्रदर्शनपूर्वकमेवाक्षरज्ञानानन्तरं लेखने समर्थो भवति। अर्थात्प्रयोगकौशलज्ञानानन्तरं निर्माणकौशलमपेक्षते। एवञ्च कस्मिंश्चिद्विषये यथार्थज्ञानानन्तरमेव तद्विषये ज्ञानप्रदानं सम्भवति। तथा चैतद्वैचित्र्यपूर्णविश्वस्य विचित्रकलाकौशलाभिज्ञोपदेशकरूपेण सूक्ष्मातिसूक्ष्म-विषयाभिज्ञस्योपदेशकरूपेण च कस्यापि स्वीकारो भवति चेत्सोऽवश्यमीश्वर एव। यतो नित्यः सर्वज्ञ ईश्वर एव निरपेक्षरूपेणास्य विश्वस्य निर्माणे समर्थो नान्यः। टीकायां सम्यक्तयोच्यते– 'पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः, व्यवहारत्वादाधुनिकलिप्यादिव्यवहारवत्'।[१३६]

ईश्वरसाधकः पञ्चमहेतुः प्रत्यय इति। प्रत्ययो नाम प्रमाणम्। वैदिकज्ञानस्याभ्रान्तत्वेऽपि वेदस्य प्रामाण्यविषये दार्शनिकेषु मतपार्थक्यं दरीदृश्यते एव। नैयायिका वेदस्य सर्वज्ञपुरुषकल्पितत्वं स्वीकुर्वन्ति। अत एव न्यायसूत्रकारेणोच्यते– 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रमाण्यमाप्तप्रामाण्यात्'।[१३७] वेदस्य सूक्ष्मातिसूक्ष्मविचारोऽपि कदाचित्साधारणपुरुषस्य ज्ञानातीतो वर्तते। अत

एव वेदस्य रचयितृरूपेणैतादृशः कश्चन स्वीकर्तव्यो यः कालत्रयज्ञानविशिष्टः, इन्द्रियातीतविषयस्य साक्षाज्ज्ञाता। एतादृशश्चेश्वरं विहाय नान्यो भवितुमर्हति। ईश्वरज्ञानरूपवाक्यमेव वेदः। वैशेषिकदर्शने यथार्थमेवोच्यते– 'तद्वचनादाम्नायस्य प्रामाण्यम्'।[१३८]

ईश्वरसाधकं षष्ठप्रमाणं श्रुतिरिति। श्रुतिर्नाम वेदः। अभ्रान्तवेदो वाक्यमयत्वादवश्यमीश्वरकर्तृकम्। श्रुतावीश्वरास्तित्वं स्वीक्रियत एव। *बृहदारण्यकोपनिषद्युच्यते*– 'स वा एष महानजः आत्मा अन्नादो वसुदानो विन्दते वसु ष एवं वेद'।[१३९] अपि तु *श्वेताश्वतरोपनिषदि* चोच्यते– 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्व्वहुतात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'।[१४०] एवं श्रुतिवाक्यादीश्वरसत्तावश्यं सिद्ध्यत्येव। श्रुतेरभ्रान्तत्वादीश्वरस्यानस्तित्वस्यावकाशो नास्त्येव।

ईश्वरस्थापनस्य सप्तमहेतुर्वाक्यमिति। वाक्यत्वहेतुविशिष्टत्वाद्वेदोऽवश्यं पौरुषेयः। उच्यते च– 'किञ्च वेदः पौरुषेयो वाक्यत्वाद् भारतादिवद्। वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवत्'।[१४१]

ईश्वरसत्तास्थापनस्याष्टमसाधकः संख्याविशेष इति। संख्याविशेष इति शब्दस्यार्थो द्व्यणुक-त्र्यणुकप्रभृतिपरिमाणस्य जनको द्वित्वत्रित्वादिसंख्या-विशेषः। द्वयोः परमाण्वोः संयोगेन यद् द्व्यणुकमुत्पद्यते तत्परमाणुगतद्वित्व-

संख्याविशेषादेव। द्वित्वसंख्याज्ञानमीश्वरं विना कस्मिन्नपि स्थातुं नार्हति। अतष्टीकायां यथार्थमुच्यते– 'द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयजन्यत्वे सति जन्यपरिमाणत्वात्'।[१४२]

विश्वसंसारमञ्चस्य नियन्त्रकरूपेण सर्वजनविदित ईश्वरः । सोऽवश्यमेव सर्वद्रष्टा, सर्वज्ञाता, सर्वशक्तिमांश्चास्मिन् विषये नास्ति कोऽपि सन्देहः। प्रत्यक्षातीत ईश्वरोऽवश्यमेवानुमानगम्यः। अन्तरालस्थितेनेश्वरेणैव नियन्त्रितं जगत्संसाररूपमिदम्। *श्रीमद्भगवद्गीताया*ं यथार्थमुच्यते–

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्त्यव्यय ईश्वरः'।।[१४३]

**निष्कर्षः**– कस्यचिद्वस्तुनः प्रामाण्यं केवलं बाधकानां खण्डनेनैव न भवति, अपि तु साधकप्रमाणानां सद्भावोऽपि अपेक्षते। अत *आत्मतत्त्वविवेक*ग्रन्थे आत्मसत्तास्थापनाय साधकप्रमाणरूपेण यथा प्रत्यक्षप्रमाणस्य ग्रहणं दृश्यते तथैव अनुमानप्रमाणस्यापि। अपरपक्षे *न्यायकुसुमाञ्जलि*ग्रन्थे ईश्वरसत्तास्थापनाया-नुमानप्रमाणमास्त्ररूपेण व्यवह्रियते।

वस्तुतो ग्रन्थद्वये क्षणिकत्ववादादीनां बहुविस्तृततया प्रतिपादनं वर्तते। परन्तु शोधप्रबन्धेऽस्मिन् समयाभावात् विस्तारभयात् च क्षणिकत्ववादादयः सामान्येनैव प्रतिपादिता इति शम्।

## तथ्यसूत्राणि–

१. ‘शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः’॥– *वे. सा.*, सम्पा. विपदभञ्जनपालः, पृ.– २४।

२. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– १०।

३. दीधितिः, तदेव, पृ.– १५।

४. *न्या.* द.(प्र. खण्डः), सम्पा.फणिभूषणतर्कवागीशः, पृ.– ६९।

५. *श्री. गीता*, सम्पा. विनायकगणेशः आपटे, १०/१०, पृ.– ३०२।

६. व्याख्याविवृतिः, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १२।

७. तदेव, १/३, पृ.– १३।

८. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– ६।

९. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, १/९, पृ.– ४१।

१०. तदेव, १/१४, पृ.– ५८।

११. तदेव, ५/१, पृ.– १९३।

१२. दीधितिः, *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २५।

१३. तत्रैव।

१४. तत्रैव।

१५. तत्रैव।

१६. तत्रैव।

१७. तत्रैव।

१८. तदेव, पृ.– २२।

१९. 'यत्सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा इमे
सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा'।–

*सर्व. बौ ओ दर्श.*, सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– १५।

२०. *आत्म. वि.*(प्र. खण्डः), सम्पा. दीननाथत्रिपाठी, पृ.– ३५।

२१. 'न प्रतिबन्धासिद्धेः'।– *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २२।

२२. तदेव, पृ.– ३४।

२३. कल्पलता, तत्रैव।

२४. दीधितिः, तदेव, पृ.– ३६।

२५. 'सामर्थ्यं हि करणत्वं वा योग्यता वा'।– तदेव, पृ.– ३४।

२६. तत्रैव।

२७. 'साध्याविशेष इत्याह'।– तदेव, पृ.– ३७।

२८. 'तथा चापाद्यानुमेयाभ्यामापादकानुमापकयोरविशेषप्रसङ्गादित्यर्थः'।– तत्रैव।

२९. तदेव, पृ.– ४६।

३०. 'तद्धि तादात्म्यं वा, निरुपाख्यत्वं वा, तत्कार्यत्वं वा, व्यापकत्वं वा, अभावत्वमेव वेति'।– तदेव, पृ.– २२३।

३१. तत्रैव।

३२. 'तथाचासिद्धमसिद्धेन साधयतः कस्ते प्रतिमल्लः'।– तदेव, पृ.– २२६।

३३. 'यदि वा स्वदेशकालवत् कालान्तरदेशान्तरयोरपि नास्तितानुषङ्गेऽस्तित्वप्रसङ्गः'।– तदेव, पृ.– २२८।

३४. 'अशक्तेः कथमस्तु शक्तेः सत्तालक्षणत्वात्'।– तत्रैव।

३५. 'अथ कालान्तरकार्यं प्रति स्वकालेऽशक्तिरसत्त्वम्, किं वा स्वकार्यमपि प्रति कालान्तरेऽशक्तिरसत्त्वम्'।– तत्रैव।

३६. तदेव, पृ.– २३०।

३७. तदेव, पृ.– २३१।

३८. तत्रैव।

३९. 'तुच्छस्य कीदृशं जन्मेति चेत्'।– तदेव, पृ.– २३२।

४०. 'तर्हि न घटनिवृत्तिः क्वापि कदापि सर्वत्रैव सदैव वेति स्यात्'।– तत्रैव।

४१. तदेव, पृ.– २३४।

४२. 'आद्ये भावस्यैव सदातनत्वप्रसङ्गः, द्वितीये तु निवृत्तिरेवेति'।– तत्रैव।

४३. तदेव, पृ.– २३५।

४४. 'तस्यापि कार्यम् इति पक्षे विरोधात्, तस्यैव कार्यम् इत्यसिद्धेः'।– तत्रैव।

४५. तत्रैव।

४६. कल्पलता, तदेव, पृ.– २३६।

४७. 'कार्यमेव विनाश इति तु केनानुरोधेन व्यवहर्तव्यम्, किं तद्विरहवत्त्वात् कार्यस्य, किं वा तद्विरहरूपत्वात्'।– तदेव।

४८. 'न द्वितीयः, स हि कार्यकाले कारणस्य योग्यानुपलम्भनियमाद्वा भवेत्, व्यवहारानुरोधाद्वा, अतिरिक्तविनाशे बाधकानुरोधाद्वा इति'।– तदेव, पृ.– २३८।

४९. तदेव, पृ.– २४०।

५०. तत्रैव।

५१. 'न तर्हि व्यवहारबलमपि'।– तत्रैव।

५२. तदेव, पृ.– २४२।

५३. तदेव, पृ.– २४९।

५४. तदेव, पृ.– २५८।

५५. तत्रैव।

५६. 'यत्र धूमस्तत्राग्निरिति साहचार्यनियमो व्याप्तिः'।– *तर्क. सं.,* सम्पा. निरञ्जनस्वरूपब्रह्मचारी, पृ.– ९१।

५७. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– २५८।

५८. तत्रैव।

५९. 'भविष्यत्तामात्रेण व्यापकत्वमस्तीति चेदस्तु, न त्वेतावता हेत्वन्तरानपेक्षत्वसिद्धिः, अद्यतनघटस्य श्वस्तनकपालमालयैवानैकान्तिकत्वादिति'।– तत्रैव।

६०. 'विनाशो न जायते अभावत्वात् प्रागभाववत्'।– तदेव, पृ.– २६०।

६१. तत्रैव।

६२. 'अजातोऽपि वा न निवर्तते। अजातत्वात्, आकाशवत् शशविषाणवत् वेतिवदसाधनत्वात्'।– तदेव, पृ.– २६१।

६३. 'भावावच्छिन्नव्याप्तिकत्वादप्रयोजकत्वम्, प्राक्प्रध्वंसाभावग्राहकप्रत्यक्षबाधः, प्राक् पश्चाच्च कार्योन्मज्जनप्रसङ्गलक्षणप्रतिकूलतर्कश्च'।– तदेव, पृ.– २६३।

६४. तत्रैव।

६५. 'अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात्'।– *सर्व. बौ. ओ दर्श.*, सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– १३।

६६. *न्या. वि.*, सम्पा. सञ्जितकुमारसाधुखाँ, पृ.– ११५।

६७. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, १/१६, पृ.– ६७।

६८. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ५०।

६९. तत्रैव।

७०. कल्पलता, तदेव, पृ.– ५१।

७१. प्रकाशिका, तदेव, पृ.– ५२।

७२. दीधितिः, तदेव, पृ.– ५३।

७३. तत्रैव।

७४. कल्पलता, तदेव, पृ.– ७८।

७५. तत्रैव।

७६. प्रकाशिका, तदेव, पृ.– ७९।

७७. दीधितिः, तदेव, पृ.– ८१।

७८. तदेव, पृ.– ७७।

७९. हरिदासी, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– ६८।

८०. तदेव, पृ.– ६९।

८१. 'अस्तु तर्हि नैरात्म्यम्, अनुपलब्धेरिति'।– *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ७३९।

८२. तत्रैव।

८३. 'दृश्यत्वविशेषणान्नैवमिति'।– तत्रैव।

८४. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, पृ.– २१२।

८५. 'क्षित्यादिकं यदि ईश्वरकर्तृकं स्यात् तदा तद्वत्तया उपलभ्यते'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १०२।

८६. *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ३३१।

८७. 'तथा च फलेच्छाजन्य उपायेच्छा तज्जन्या प्रवृत्तिरिति परम्परया फलेच्छाजन्यायाः प्रवृत्तेः व्यापकत्वं फलेच्छायामिति व्यापकीभूतफलेच्छाभावात् कर्तृत्वाभावसिद्धिः'।– व्याख्याविवृतिः, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १०३।

८८. 'कस्यापराधेन पुनर्योग्योऽप्यात्मा तदानीं नोपलभ्यते? सामग्रीवैगुण्यात्'।– *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ३१३।

८९. तदेव, पृ.– ३२५।

९०. तत्रैव।

९१. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, १/४, पृ.– १२।

९२. *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ३२५।

९३. हरिदासी, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १०१।

९४. *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, ३/३, पृ.– ३३०।

९५. तत्रैव।

९६. तदेव, पृ.– ३३१।

९७. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, ३/२, पृ.– २३४।

९८. प्रकाशः, *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– ३२९।

९९. 'न चासिद्धमिदं विशेषणं देहस्यैव चेतनत्वात्। मैवम्। देहत्वमूर्तत्वभूतत्वरूपादिमत्त्वादिभ्यः'।– *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ८०८।

१००. तत्रैव।

१०१. 'नापि प्रत्येकपर्यवसितम्। करचरणाद्यवयवविश्लेषे तदनुभूतस्य स्मरणायोगात्'।– तत्रैव।

१०२. तदेव, पृ.– ८०९।

१०३. तत्रैव।

१०४. तत्रैव।

१०५. तत्रैव।

१०६. हरिदासी, *न्या. कु*, सम्पा. श्यामापदमिश्रः, पृ.– ३४।

१०७. *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, १/४, पृ.– ४१।

१०८. प्रकाशः, तदेव, पृ.– ४२।

१०९. हरिदासी, *न्या. कु.*, सम्पा. श्यामापदमिश्रः, पृ.– ३४।

११०. प्रकाशः, *न्या. कु.*, सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराजशास्त्री च, १/४, पृ.– ४१।

१११. *न्या. कु.*, सम्पा. श्रीमोहनभट्टाचार्यः, २/१, पृ– १२१।

११२. *श्री. गीता.,* सम्पा. विनायकगणेशः आपटे, २/२७, पृ.– ६१।

११३. व्याख्याविवृतिः, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– ८९।

११४. 'तथा च सर्वज्ञाः कपिलादय एव वेदकर्त्तारः अदृष्टाधिष्ठातारश्चेति न नित्यसर्वज्ञसिद्धिरिति भावः'।– तत्रैव।

११५. *न्या. कु.*, सम्पा. पादपद्मोपाध्यायः ढुण्ढिराजशास्त्री च, पृ.– २१०।

११६. *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ७४३।

११७. 'न चायमवस्तुकः सन्दिग्धवस्तुको वा, अशाब्दत्वादप्रतिक्षेपाच्च'।– तत्रैव।

११८. 'न च लैङ्गिकः, अननुसंहितलिङ्गस्यापि स्वप्रत्ययात्। न च स्मृतिरियम्, अननुभूते तदनुपपत्तेः'।– तत्रैव।

११९. 'तस्माद्वासनामात्रवादं विहायागन्तुकमपि किञ्चित् कारणं वाच्यम्, तत्त्वाप्तानाप्तशब्दौ वा लिङ्गतदाभासौ वा प्रत्यक्षतदाभासौ वेति'।– तदेव, पृ.– ७४५।

१२०. तदेव, पृ.– ७४६।

१२१. 'स्वसम्बन्धिशरीरादावयं स्यादिति वाच्यम्, तत्र कः स्वार्थः इति वचनीयम्'।– तदेव, पृ.– ७४७।

१२२. तदेव, पृ.– ७४९।

१२३. 'कः पुनरत्र न्यायः**?** प्रतिसन्धानम्'।– *आत्म. वि.*, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी लक्षणशास्त्रिद्राविडश्च, पृ.– ७५२।

१२४. कल्पलता, तदेव, पृ.– ७५२-५३।

१२५. तदेव, पृ.– ७५२।

१२६. प्रकाशिका, तदेव, पृ.– ७५४।

१२७. तदेव, पृ.– ७५४।

१२८. *भा. परि.*, सम्पा. अनामिकारायचौधुरी, पृ.– १३२।

१२९. *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १९३।

१३०. *भा. परि.*, सम्पा. अनामिकारायचौधुरी, पृ.– ४६।

१३१. 'सकर्तृकत्वम् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्'।– हरिदासी, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १९४।

१३२. तत्रैव।

१३३. तत्रैव।

१३४. तत्रैव।

१३५. तत्रैव।

१३६. तत्रैव।

१३७. *न्या. दर्श.*, सम्पा. गङ्गानाथझा, ३/२/६९, पृ.– ३४१ ।

१३८. *वै. सूत्र.*, सम्पा. अमितभट्टाचार्यः, १/१/३, पृ.– ४।

१३९. बृहदारण्यकोपनिषद्, *उप. सं.*, सम्पा. चित्तरञ्जनघोषालः, ४/४/२२, पृ.– ५९७।

१४०. श्वेताश्वत्तरोपनिषद्, तदेव, ६/११, पृ.– १३९।

१४१. हरिदासी, *न्या. कु.*, सम्पा. चन्दनभट्टाचार्यः, पृ.– १९४।

१४२. तत्रैव।

१४३. *श्री. गीता*, सम्पा. विनायकगणेशः आपटे, १५/१७, पृ.– ४३७।

## उपसंहारः

'प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते' अर्थात् प्रयोजनं विना प्रमत्तजनोऽपि स्वकार्ये प्रवृत्तो न भवति। अतो निबन्धारम्भ एव शोधप्रबन्धोद्देश्यं सुस्पष्टतयोच्यते। *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोरात्मविषये तुलनात्मकसमीक्षा इति शोधप्रबन्धस्यास्य मुख्यविषयः। शोधप्रबन्धेऽस्मिन् स्वपक्षविपक्षभ्यां वक्तव्यस्योत्थापनेन खण्डनेन चात्मविषये ग्रन्थद्वयस्य तुलनात्मकसमीक्षा यथासाध्यमुपस्थापिता। न केवलं तुलनात्मकसमीक्षा, अपि तु गूढतत्त्वमपि यथामति प्रतिपादितम्। उद्देश्यपूरणार्थं शोधप्रबन्धोऽयम-ध्यायपञ्चकेन विभज्यते। तत्राध्यायपञ्चके कथं विषयाणां प्रतिपादनं वर्तते तद्विषये सामान्येनात्र पर्यालोच्यते।

प्रथमेऽध्याये उदयनाचार्यस्य जीवनपरिचयं कृतित्वञ्च प्रत्यालोकपातः क्रियते। उदयनाचार्यस्य यथा जन्मस्थानविषये तथैवाविर्भावकालविषये यथेष्टं मतविविधता वर्तते चेदपि दशमशताब्द्यामुदयनाचार्य आविर्बभूवेति प्रमाणाधारेण प्रतिपादितम्।

द्वितीयेऽध्याये न्यायदर्शनानुसारेणात्मस्वरूपविचारः क्रियते। आत्मन्निति शब्देन जीवात्मनः परमात्मनो गृहीतत्वाद् उभयोरात्मनोर्विषये पर्यालोचनं विहितम्। तत्र च जीवात्मनस्स्वरूपपर्यालोचनेन जीवात्मनो वैशिष्ट्यमपि परिलक्ष्यते। यथा– जीवात्मा देहादिव्यतिरिक्तः, सगुणः, नित्यः, बहुः,

निरवयवश्च। अपरपक्षे जगतः सृष्टावीश्वर उपादानकारणं न भवति चेदपि निमित्तकारणं भवति। जगतः सृष्टिस्थितिप्रलयानां नियन्ता परमात्मेश्वर एव। एवंरूपेण जीवात्मनः परमात्मनश्च द्वितीयेऽध्याये मोक्षोपयोगिता वर्णिता।

तृतीयेऽध्याये *आत्मतत्त्वविवेक*ग्रन्थस्यात्मविषयक-पर्यालोचनं क्रियते। तत्र बौद्धस्वीकृतस्य क्षणभङ्गवादस्य, बाह्यार्थभङ्गवादस्य, गुणगुणिभेद-भङ्गवादस्य, अनुपलब्ध्यभावसाधकवादस्य च खण्डनेनात्मस्थापनं वर्तते।

चतुर्थेऽध्याये *न्यायकुसुमाञ्जलि*ग्रन्थस्यात्मविषयक-पर्यालोचनं क्रियते। *न्यायकुसुमाञ्जलावी*श्वरस्य मननात्मकोपासनार्थं पञ्चस्तवके पञ्च विप्रतिपत्तिवाक्यानि प्रदर्शितानि। एतत्सर्वं प्रतिपाद्य तस्य खण्डनं च कृत्वा पञ्चदर्शनानां यथा चार्वाकः, मीमांसकः, बौद्धः, जैनः, सांख्यदर्शनञ्चेत्येतेषां मतस्य क्रमेण खण्डनं कृत्वा परमात्मनः प्रतिपादनं वर्तते।

पञ्चमेऽध्याये आत्मविषये ग्रन्थद्वयस्य तुलनात्मकमालोचनं क्रियते। *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वयस्य विषयपर्यालोचनेन सादृश्यं विद्यते चेदपि वैसादृश्यस्य सद्भावात् पृथग्ग्रन्थरूपेण स्वीकृतिर्भवत्येव। *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति स्वतन्त्रग्रन्थद्वयस्यात्मतत्त्व-प्रतिपादनमेव मुख्यविषयो वर्तते। *आत्मतत्त्वविवेक*ग्रन्थे जीवात्मविषयकमालोचनं वर्तते। पूर्वपक्षिरूपेण बौद्धान् स्वीकृत्य तेषां

विविधमतानां खण्डनपुरःसरं न्यायसम्मतस्य शरीराद्यतिरिक्तनित्यविभुज्ञान-वत्सुखादेराश्रयरूपेण जीवात्मनः प्रतिपादनं कृतम्। परन्तु *न्यायकुसुमाञ्जलि*ग्रन्थे परमात्मविषयकमालोचनमर्थाद् ईश्वरविषयकमालोचनं विद्यते। ईश्वरस्य मननात्मकोपासना ग्रन्थस्यास्य मुख्यविषयः। एवंरूपेणाध्यायपञ्चकेन प्रबन्धस्योद्देश्यपरिपूरणायात्मविषये दृष्टिप्रदानेन मोक्षप्राप्तिमार्गः प्रशस्यते।

भारतीदर्शनपरम्परायां स्वीकृतेषु पुरुषार्थेषु परमपुरुषार्थो भवति मोक्षः। मोक्षप्राप्तिमार्गे दर्शनं महत्त्वपूर्णां भूमिकामावहति। अत्र प्रश्न उत्पद्यते यत्, मोक्षः कथं सम्भवति दर्शनेनेति? उत्तरे कथयितुं शक्यते यत्, दर्शनादात्मसाक्षात्कारो जायते आत्मसाक्षात्काराच्च मोक्षः प्राप्यते। आत्मन्निति शब्देन यथा जीवात्मा संसूच्यते तथैव परमात्मापि ज्ञापितो भवति। जीवात्मनः तथा परमात्मन आलोचनं बहुत्र स्वल्पाधिक्येन दृश्यते चेदप्युदयनाचार्येणा*त्मतत्त्वविवेके* तथा *न्यायकुसुमाञ्जलौ* पूर्वपक्षिमतखण्डनपूर्वकं न्यायसम्मतात्मतत्त्वं व्यवस्थाप्य न्याय-वैशेषिकप्रस्थाने विजय-वैजयन्ती पौनःपुन्येन प्रतिस्थापिता। न केवलं पूर्वपक्षिणां खण्डनमेव, अपि तूपनिषदादिप्रमाणेनापि *न्यायकुसुमाञ्जलि*ग्रन्थे ईश्वरमननात्मकोपासनारूपदुरूहकार्यं सम्पादितम्।

शोधप्रबन्धेनानेनोपस्थापितात्मविषयकपर्यालोचनयैवञ्चात्मविषये एव तुलनात्मकसामीक्षामाध्यमेनात्मविषयकधारणा इतोऽपि प्राञ्जलीक्रियते। येन च मोक्षप्राप्तिमार्ग इतोऽपि प्रशस्तीक्रियते।

वस्तुतो जीवनस्य प्रधानोद्देश्यं दुःखस्यात्यन्तिकी निवृत्तिः। यतो ह्यात्मविषयकज्ञानं विना मिथ्याज्ञाननिवृत्तिर्न सम्भवति, मिथ्याज्ञाननिवृत्तिमृते आत्यन्तिकदुःखनिवृत्तिर्न सम्भवति, अत आत्मविषयकं सम्यग् ज्ञानमपेक्षते। अपि च व्यतीत्य ईश्वरानुग्रहं सात्मयोगोऽपि न सम्भवति, अत ईश्वरविषयकज्ञानमात्मसाक्षात्कारेण मुक्तिकारणं भवति। अत एव शोधप्रबन्धेऽस्मिन्नुपस्थापितात्मविषयकसमीक्षयात्मानुसन्धित्सवोऽध्यापका विद्यार्थिनश्च सर्वे स्वल्पाधिक्येनोपकृता भविष्यन्ति। न केवलमेतदपि तु शोधप्रबन्धेऽस्मिन् पूर्वपक्षिणां खण्डनेन सिद्धान्तिनां मतं प्रतिस्थापितम्। तेन पाठका यथा सिद्धान्तज्ञानं प्राप्नुयुस्तथैव पूर्वपक्षिमतानां ज्ञानमपि प्राप्नुयुः। तेन पाठकानां यौक्तिकज्ञानकौशलमपि वर्धयेत।

**भाव्यनुसन्धानविषयः**–

'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोः तुलनात्मक-समीक्षा' इति शीर्षकमादाय शोधनिबन्धनिर्माणावसरे दृष्टं यत्, *न्यायकुसुमाञ्जलि*ग्रन्थमाश्रित्य यद्यपि संस्कृतवाङ्मये बहुकार्याणि जातानि तथापि *आत्मतत्त्वविवेक*ग्रन्थमाश्रित्य तादृशकार्यं न जातम्। ग्रन्थगाम्भीर्यं काठिन्यञ्च दृष्ट्वैतदवश्यं वक्तुं शक्यते, ग्रन्थयो: प्रत्येकमेवाध्यायो नूतनगवेषकानां कृते गवेषणायोग्यविषयो भवितुमर्हति। एवञ्च ग्रन्थद्वयवर्णितबौद्धमतवादोऽपि शोधछात्राणां कृते उत्तमान्वेषणयोग्यविषयो

भवितुमर्हति। न त्वात्मविषये ग्रन्थद्वयस्य तुलनात्मकसमीक्षेत्येव विषयः, अपि तु ग्रन्थद्वयस्य तुलनात्मकसमीक्षणेनाऽपूर्वविषयानामुपस्थापनमपि सम्भवति।

यथामत्यालोचनेन श्रीभगवच्चरणे श्रद्धां प्रणामञ्च विनिवेद्य निबन्धोऽयं परिसमाप्यते–

'यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै:
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।
ख्यातावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनः
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः'॥

# ग्रन्थसूची

## (क) आकरग्रन्थाः–


उदयनाचार्यः। *आत्मतत्त्वविवेकः*। सम्पा. केदारनाथ-त्रिपाठी। वाराणसी : चौखम्बा-संस्कृत-सीरीज-अफिस, १९९७।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*। सम्पा. ढुण्ढिराज-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-सीरीज-अफिस, १९९७।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*। सम्पा. विन्ध्येश्वरी-प्रसाद-द्विवेदी लक्षण-शास्त्री-द्राविडश्च। कलिकाता : द्य रयाल एसियाटिक् सोसाइटि अफ् वेङ्गल, १९३९।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*(प्रथमः खण्डः)। सम्पा. दीननाथ-त्रिपाठी। कलिकाता : संस्कृत-कलेज, १९८४।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*(द्वितीयः खण्डः)। सम्पा. दीननाथ-त्रिपाठी। कलिकाता : संस्कृत-कलेज, १९८९।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*(तृतीयः खण्डः)। सम्पा. दीननाथ-त्रिपाठी। कलिकाता : संस्कृत-कलेज, १९९०।

उदयनाचार्यः। *न्यायकुसुमाञ्जलिः*। सम्पा. चन्दन-भट्टाचार्यः। कलकाता : महाबोधि-वुक-एजेन्सी, २०१४।

उदयनाचार्यः। *न्यायकुसुमाञ्जलिः*। सम्पा. पद्मप्रसादोपाध्यायः ढुण्ढिराज-शास्त्री च। वाराणसी : चौखम्बा-संस्कृत-सीरिज, १९५७।

उदयनाचार्यः। *न्यायकुसुमाञ्जलिः*। सम्पा. श्रीमोहन-भट्टाचार्यः। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९९५।

उदयनाचार्यः। *न्यायकुसुमाञ्जलिः*। सम्पा. श्यामापद-मिश्रः। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १३९०(बङ्गाब्दः)।

उदयनाचार्यः। *लक्षणावली*। सम्पा. विन्ध्येश्वरी-प्रसाद-द्विवेदी। वेनारस : राज-राजेश्वरी, १८९७।

**(ख) सहायकग्रन्थाः–**

अन्नंभट्टः। *तर्कसंग्रहः*। सम्पा. नारायण-चन्द्र-गोस्वामी। कलकाता : संस्कृत-पुस्तक-भाण्डार, १४१३(बङ्गाब्दः)।

अन्नंभट्टः। *तर्कसंग्रहः*। सम्पा. निरञ्जनस्वरूप-ब्रह्मचारी। कलकाता : संस्कृत-वुक-डिपो, २०१३(पुनर्मुद्रणम्) (प्रथमं संस्करणम् २००५)।

ईश्वरकृष्णः। *सांख्यकारिका*। सम्पा. दिवाकरानन्दः। कलकाता : संस्कृत-पुस्तक-भाण्डार, १३७५(बङ्गाब्दः)।

उदयनाचार्यः। *किरणावली*। सम्पा. नरेन्द्र-चन्द्र-वेदान्ततीर्थः। कलकाता : दि एशियाटिक-सोसाइटि, २००२(प्रथमं संस्करणम् १९५६)।

उद्द्योतकरः। *न्यायवार्त्तिकम्*। सम्पा. विन्ध्येश्वरी-प्रसाद-द्विवेदी। वाराणसी : चौखम्बा-संस्कृत-सीरिज, १९१३।

कणादः। *वैशेषिकदर्शनम्*। सम्पा. प्रद्योत-कुमार-मण्डलः। कलकाता : प्रग्रेसिभ-पावलिशार्स, २००४।

कणादः। *वैशेषिकदर्शनम्*। सम्पा. अमित-भट्टाचार्यः। कलकाता : संस्कृत-वुक-डिपो, २०१२।

कपिलः। *सांख्यसूत्रम्*। सम्पा. रामशङ्कर-भट्टाचार्यः। वाराणसी : भारतीय-विद्या-प्रकाशन, १९६६।

कुमारिलभट्टः। *श्लोकवार्त्तिकम्*। सम्पा. पार्थसारथी-मिश्रः । वाराणसी : चौखम्बा-संस्कृत-सीरिज, १९१३।

कुमारिलभट्टः। *श्लोकवार्त्तिकम्*। सम्पा. राम-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-सीरिज, १९५५।

गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः*। सम्पा. कामाख्यानाथ-तर्कवागीशः। तत्त्वचिन्तामणौ ईश्वरानुमानम्। कलकाता, १८९३।

गौतमः। *न्यायसूत्रम्*। सम्पा. गङ्गानाथ-झा। न्यायदर्शने; वात्स्यायनभाष्यसहितः। काशी : चौखम्बा-संस्कृत-संस्थान, १९२५।

गौतमः। *न्यायसूत्रम्*। सम्पा. फणिभूषण-तर्कवागीशः। *न्यायदर्शनम्*(प्रथमः खण्डः)। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०११(प्रथमं संस्करणम् १९८१)।

गौतमः। *न्यायसूत्रम्*। सम्पा. फणिभूषण-तर्कवागीशः। *न्यायदर्शनम्*(तृतीयः खण्डः)। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०००(प्रथमं संस्करणम् १९८२)।

गौतमः। *न्यायसूत्रम्*। सम्पा. फणिभूषण-तर्कवागीशः। *न्यायदर्शनम्*(चतुर्थः खण्डः)। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९८८।

गौतमः। *न्यायसूत्रम्*। सम्पा. नारायण-मिश्रः। *न्यायदर्शनम्*। वाराणसी : चौखम्बा-संस्कृत-संस्थान, १९८३।

घोषालः, चित्तरञ्जनः। *उपनिषद् संग्रहः*। कलकाता : ग्रन्थिक-संस्करणम्, १३९४।

जयन्तभट्टः। *न्यायमञ्जरी*। सम्पा. पञ्चानन-तर्कवागीशः। कलिकाता : कलिकाता विश्वविद्यालय, १९३९।

जयन्तभट्टः। *न्यायमञ्जरी*। सम्पा. प्रवाल-कुमार-सेनः। कलकाता : संस्कृत-वुक-डिपो, २०१३(द्वितीयं संस्कणम्), (प्रथमं संस्करणम् २००८)।

भट्टाचार्य्यः, दीनेश-चन्द्रः। *बाङालीर सारस्वत अवदान*-बङ्गे नव्यन्याय चर्चा(प्रथमः भागः)। कलकाता : बङ्गीय-साहित्य-परिषत्, १४१४(बङ्गाब्दः) (प्रथमं संस्करणम् १३५८)।

धर्मकीर्तिः। *प्रमाणवार्त्तिकम्*। सम्पा. द्वारिकादास-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-संस्थान, १९६८।

धर्मकीर्तिः। *न्यायविन्दुः*। सम्पा. सञ्जित-कुमार-साधुखाँ। कलकाता : सदेश,२००७।

नारायणभट्टः। *मानमेयोदयः*। चेन्नाइ : थियोजफिकाल सोसाइटि, १९३३।

नारायणभट्टः। *मानमेयोदयः*। सम्पा. दीननाथ-त्रिपाठी। कलकाता : संस्कृत-पुस्तक-भाण्डार, १९९०।

पतञ्जलिः। *पातञ्जलदर्शनम्*। सम्पा. पूर्णचन्द्र-शर्मा। कलकाता : पश्चिमवङ्ग- राज्य-पुस्तक-पर्षद्, २००५(द्वितीयं संस्करणम्) (प्रथमं संस्करणम् १८९८)।

मधुसूदनसरस्वती। *अद्वैतसिद्धिः*। सम्पा. अनन्तकृष्ण-शास्त्री। मुम्बाइ : निर्णय-सागर-प्रेस, १९३७।

मनुसंहिता। सम्पा. अशोक-कुमार-वन्द्योपाध्यायः। मनुसंहिता; सप्तमोऽध्यायः (राजधर्मः)। कोलकाता : सदेश, २०१३।

माधवाचार्यः। *सर्वदर्शसंग्रहः*। सम्पा. सञ्जित-कुमार-साधुखाँ। सर्वदर्शनसंग्रहे बौद्धदर्शन ओ जैनदर्शन। कलकाता : सदेश, २०११(प्रथमं संस्करणम् २००५)।

*याज्ञवल्क्यसंहिता*। सम्पा. गुरुप्रसादजी-शास्त्री गिरिजाप्रसादजी-शास्त्री च। याज्ञवल्क्यस्मृतिः; भाष्यटीकासहितः। लखनऊ : नवलकिशोरप्रेस, १९३०।

रायः, सुशीलः। *शिक्षातत्त्व ओ शिक्षादर्शन*। कलकाता : सोमा वुक एजेन्सी, २००४।

वाचस्पतिमिश्रः। *सांख्यतत्त्वकौमुदी*। सम्पा. नारायण-चन्द्र-गोस्वामी। कलकाता : संस्कृत-पुस्तक-भाण्डार, १९८२।

विनायक-गणेशः आपटे। *श्रीमद्भगवद्गीता*; आनन्दगिरिकृतटीकासंवलितशांकर-भाष्यसमेता। पुने : आनन्दाश्रममुद्रणालय, १८५८।

विश्वबन्धुः। *ऋग्वेदः*। होशिआरपुर : विश्वेश्वरानन्द-वैदिकशोधसंस्थान, १९६४।

विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. अनामिका-रायचौधुरी। कलकाता : संस्कृत- पुस्तक-भाण्डार, २००४।

विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. पञ्चानन-भट्टाचार्यः। कलकाता : संस्कृत- पुस्तक-भाण्डार, १३७७(बङ्गाब्दः)।

विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. हरिराम-शुक्लः। वेनारस : चौखम्बा-प्रकाशन, २०१८।

वेदव्यासः। *ब्रह्मसूत्रम्*। सम्पा. चण्डी-प्रसाद-शुक्लः कृष्णपन्त-शास्त्री च। ब्रह्मसूत्रशाङ्करभाष्य-रत्नप्रभाभाषानुवादसहितः। काशी : अच्युतग्रन्थमालाकार्यालय, १९९३।

*श्रीमद्भगवद्गीता*। गोरक्षपुरः : गीताप्रेस, २०१४(अष्टादशसंस्करणम्)।

श्रीहर्षः। *खण्डनखण्डखाद्यम्*। सम्पा. हनुमानदासजी-षट्शास्त्री। वाराणसी : चौखम्बा-संस्कृत-सीरिज, १९७०।

सदानन्दयोगीन्द्रः। *वेदान्तसारः*। सम्पा. विपद्भञ्जन-पालः। कलकाता : संस्कृत-पुस्तक-भाण्डार, १४१७ (वङ्गाब्दः) (प्रथमं संस्करणम् १९८२)

सेनः, अतुल-चन्द्रः सीतानाथ-तत्त्वभूषणः महेश-चन्द्र-घोषश्च। *उपनिषद्*। कलकाता : हरफ-प्रकाशनी, १९९८(प्रथमं संस्करणम् १९७२)।

गोस्वामी, राधामाधवः। *न्याये आत्मतत्त्व-समीक्षा*। *अन्वीक्षा* : भोल. ३०। कलकाता : यादवपुरविश्वविद्यालय, २००९।

सिंहः, मनीषा। *न्यायवैशेषिकदर्शने ईश्वरः*। *अन्वीक्षा* : भोल. ३३। कलकाता : यादवपुरविश्वविद्यालय, २०१२।

Dasgupta, S.N. *A History of Indian Philosophy* (vol.1). Delhi : Motilal Banarsidass, 1988.

Hiriyanna, M. O*utline of Indian Philosophy*. Delhi : Motilal Banarsidass, 2009(rpt.) (1993 1st Ed.).

NarayanaBatta. *Manameyodaya*. Ed. C. Kunhan Raja & S. S. Suryanarayana Sastri. Madras : Theosophical Publishing House, 1933.

S. Kuppuswami Sastri. *A Primer of Indian Logic.* U.S : Franklin Classics Trade Press, 2018.